सटीकशांकरदिग्विजयारंभः

॥श्रीगणेशायनमः॥श्रीमद्विष्णुमजाभिवंद्यचरणंगोपादिकैराधितंवंदेपूर्णविकल्पसौम्यवदनंसंसारतापापहं॥सत्यंज्ञानम
नंतमाद्यविधुरंगोभारसंहारकंसर्वात्मानमपास्तसर्वममलंविद्येश्वरंशंकरं॥१॥नुमःश्रीबालगोपालतीर्थान्व्यासमुखान्मु
नीन्॥विघ्नहर्तॄन्गणेशादीनपि श्रुतांश्चविमत्सरान्॥२॥व्याख्यानरहितस्यास्यव्याख्यानंक्रियतेमयाऽल्पधी॥कोपयतस्त्वीयबो
धायप्रमादःक्षम्यतांबुधैः॥३॥निखिलानर्थनिवृत्तिपूर्वकपरमानंदाविर्भावलक्षणपरमपुरुषार्थानन्यसाधनाद्वैतज्ञान
विजयपर्यवसन्नंश्रीमच्छंकराचार्यविजयमाविष्कर्तुंग्रंथमारभमाणःश्रीमन्माधवाचार्यस्तन्निर्विघ्नसमाप्त्यादिसिद्धये

श्रीगणेशायनमः॥प्रणम्यपरमात्मानंश्रीविद्यातीर्थरूपिणं॥प्राचीनशंकरजयेसारःसंगृह्यतेस्फुटं॥१॥

परीतशिष्टाचारानुमितश्रुतिप्रमितकर्तव्यताकंविषयप्रयोजनसूचकंमंगलमाचरन्चिकीर्षितंप्रतिजानीते॥प्रणम्ये
तिपरमात्मानंपरमेश्वरंप्रणम्यप्राचीनशंकरजयेसारःमयामाधवेनसंगृह्यतेसंग्रहत्वेनास्फुटत्वमाशंक्याहस्फुटं
यथास्यात्तथेतिपरमात्मानंविशिनष्टिश्रीविद्यारण्यभारतीतीर्थरूपिणंअनेनस्वगुरोःश्रीविद्यातीर्थस्येश्वरावतार
त्वंतत एवसर्वज्ञत्वंसूचितंअन्येषामपिपरमात्मनिस्वगुरोश्चतुल्यभक्त्यैवनिःश्रेयसप्राप्तिरित्यपिध्वनितंतथा
चश्रुतिः॥यस्यदेवेपराभक्तिर्यथादेवेतथागुरौ।तस्यैतेकथिताह्यर्थाःप्रकाशंतेमहात्मनइति।यद्वा।परंपरमेश्वरं

सर्वात्मानंशिवंप्रणम्येत्यर्थः॥तंविशिनष्टिश्रीविद्यातीर्थरूपिणं।तार्किकादिकल्पितैःकुतर्कैःमलिनीकृतायाःविद्यायाःसरस्वत्या
स्तन्मलापकरणेनशोधकत्वात्तुविद्यातीर्थःश्रियाब्रह्मविद्यात्मकयायुक्तःश्रीविद्यातीर्थोभगवान्भाष्यकारस्तद्रूपिणं
तथाचोक्तंसंक्षेपशारीरकाचार्यैःयत्कारुण्यासाद्ययमेवनित्यासरस्वतीस्वार्थसमन्वितासीत्।निरस्तदुस्तर्ककलंकपंकानमा
मितंशंकरमर्चितांघ्रिंइतिशिवावतारत्वंचभगवतोभाष्यकारस्यशिवपुराणादवगंतव्यं।तथाचोक्तंशिवपुराणे।व्याकुर्वन्व्या
ससूत्रार्थंश्रुतेरर्थंयथोचिवान्।श्रुतेर्न्याय्यःसएवार्थःशंकरःसवितानन इति।यद्वाआत्मानंप्रत्यगभिन्नंपरंपरमेश्वरंश्रीमा
यीशब्देनपरापरवेद्यतत्प्राप्त्यामोक्षदेवलोकोच्यतेतीर्थशब्देनतीर्थंशास्त्राध्वरक्षेत्रपात्रोपाध्यायमंत्रिषुअवतारर्षि

यद्दूराणांपटलोविशालोविलोक्यतेल्पकिलदर्पणेपि॥तद्वन्मदीयेलघुसंग्रहेस्मिन्नुदीक्ष्यतांशांकरवाक्यसारः॥२॥

उष्टाभःस्त्रीरजस्कःच्युविश्रुतमितिविश्वोकानिशास्त्रादौनिरद्यतेतद्रूपिणंसर्वात्मकमित्यर्थः।सर्वंखल्विदंब्रह्म।एक
मेवाद्वितीयमित्यादिश्रुतेस्तथाचश्रीमच्छंकरजयनिरूपणेनतदुक्तस्यब्रह्मात्मभावस्यैवजयइतिसएवाज्ञातःसन्विषयो
ज्ञातःसन्प्रयोजनंआचार्यविजयज्ञानंतत्वांतरप्रयोजनमितिपरमेत्यादिनासूचितंअभानेकार्थशब्दन्यासात्श्लेषालंकार
स्तदुक्तंनानार्थसंश्रयःश्लेषइति।देवतावाचकाःशब्दायेचभद्रादिवाचकाः।तेसर्वेनैवनिंद्याःस्युर्लिपितोगणतोपिचेत्क
कत्वाज्जगणादिप्रयोगोनदोषायेहइतिमंतव्यं॥१॥ननुप्राचीनशांकरजयउदाहृतानांशांकरवाक्यानांसारस्त्व
दीयेसंग्रहेकथमवलोकनीयस्त्वत्संग्रहस्याल्पकत्वादितिचेत्तत्राह।यद्दूरत्घपनांकुंभानामिभशिरसांवाद्रिशृंगा

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

णांगापटल: समुदायो विशालो विस्तृतो ऽस्येति दर्पणे विलोक्यते किलेति प्रसिद्धं तद्वत् अस्मिन् बुद्धिस्थे मदीये लघुसंग्र
॥२॥ ग्रहे शंकरयाख्यानां सारउद्वीक्ष्यतां सम्यगवलोक्यतां उपमालंकारः साधर्म्यमुपमाभेदे इत्युक्तेः इंद्रोपेंद्रवज्राभि
श्रणादुपजातिवृत्तं अनंतरोदीधितिलक्ष्मभाजौ पादौ मदीयावुपजातयस्ता इति लक्षणात् ॥२॥ प्राचीनशंकरैस्यवे य २
य्यर्थमाशंक्याह। यथातिरुच्येऽत्यंतमभिलाषो विषये मधुरे रुच्युत्पादाय रुच्यंतरस्य सलवणस्य योजनार्हा योग्या
तथा एषामस्मद्ग्रन्थनिवेशभंगी मदीयानां पद्यानां निवेशस्य विन्यासस्य भंगी रीतिरपि प्राचः कवेः तद्ग्रंथेषु मनोज्ञेषु पद्ये

यथातिरुच्ये मधुरेऽपि रुच्युत्पादाय रुच्यंतरयोजनार्हा॥ तथैष्यतां प्राक्कविवृद्धपद्येष्वेषापि मत्पद्यनिवेशभं
गी॥३॥ स्तुतोऽपि सम्यक्कविभिः पुराणैः कृत्यापि नस्तुष्यतु भाष्यकारः॥ क्षीराब्धिवासी सरसीरुहाक्षः क्षीरं पुनः किं न कमे

धुरुच्युत्पादाय इष्यतामित्यर्थः॥३॥ यद्यपि पुराणैः प्राचीनैः कविभिः सम्यक्स्तुतस्तथापि नो अस्माकं कृत्या
भाष्यकारस्तुष्यतु अभ्यर्थनायां लोट् बहुवचनं चाञ्जिनः कायाभिप्रायेण ननु स्तवस्य यातयामत्वात् कृत्या कथं तस्य तुष्टिरि
त्याशंक्याप्तकामस्य परमेश्वरस्य भक्त्या कृतेन स्वल्पेनाप्यधिकादधिकतरा तुष्टिरित्याह क्षीराब्धिवासीति
क्षीराब्धिं क्षीरसमुद्रं वसितुं शीलमस्यास्तीति तथा कमलसदृशे अक्षिणी नेत्रे यस्य स सरसीरुहाक्षो भगवा ॥२॥
न् विष्णुर्गोष्ठे व्रजे प्रेमभराक्रांताभिर्गोपीभिर्दीयमानमल्पं दुग्धं किं पुनर्न चकमे अपितु कामितवानेवेत्यर्थः॥

व्रजः स्याद्गोकुलं गोष्ठमिति वैजयंती। अत्र स्तुतिक्षीरयोर्बिंबप्रतिबिंबभावाद्दृष्टांतालंकारः। पुनरेतेषां सर्वेषां प्रतिबिंबनमित्युक्तेः॥४
तस्माच्छिवं सुखं करोतीति शिवंकरः अतएव सुशंकर इत्यभिधासंज्ञा यस्य शिवंकरश्चासौ सुशंकराभिधश्च स चासौ जगतां गुरुश्च
तस्य शिवंकरसुशंकरस्य जगद्गुरोर्भगवतो भाष्यकारस्य प्रायशो यशो हृदयशोधकं कलयितुमनुसंधातुं कथयितुं वा समीहाम
हे। संपूर्वकस्य चेष्टार्थकस्य ईहधातोर्लटि रूपं सम्यक्चेष्टां प्रयत्नं कुर्मः क्वचिदन्यपयशसोऽपि कथनासौ यशरा इत्युक्तं तं विवि

पयोब्धिवैरीसुनिःसृतसुधाधौरीमाधुरीधुरीणभणितिस्ताधरीकृतफणाधराधीशितुः॥ शिवंकरसु
शंकराभिधजगद्गुरोः प्रायशो यशो हृदयशोधकं कलयितुं समीहामहे॥५॥ श्रीशंकरायनमः॥

नष्टिपयोब्धेः क्षीरसमुद्रस्य विवरेभ्यः सूक्ष्मछिद्रेभ्यः सुनिःसृताया सुधाया अमृतस्य सरीणां सूक्ष्मप्रवाहाणां मा
धुरी मधुरता तस्याः सकाशात् धुरीणं श्रेष्ठं अतिमधुरं यत् भणितं भाषितं तेन माधुरीकृतः फणाधराणां सर्पाणां अधी
शितानियंता शेषो येन तस्य अत्र रेफस्यासकृदावृत्त्या वृत्त्यनुप्रासः शब्दालंकारः एकस्याप्यसकृत्परइत्युक्तेः पृथ्वीवृ
त्तं जसौजसयला वसुग्रहयतिश्च पृथ्वी गुरुरिति लक्षणात्॥५॥ शंकरगुणानुवर्णने स्वस्यानर्हतामाशंक्य परिहरति॥ के

३ तिसदेव सौम्येदमग्र आसीदेकमेवाद्वितीयमित्यादिश्रुत्युक्तसदद्वितीयस्य बोधकत्वात्सद्गुरुः सतां वा गुरुः शंकरश्चासौ सद्गुरुश्च
तस्य गुणानां गणाः समूहाः दिग्जालस्य कूलं रोधं कषंति घ्नंतीति दिग्जालकूलंकषाः सर्वकूलेत्यादिना खच् अरुर्द्विषदजंतस्य
स्येति मुम् दिग्जालमुल्लंघ्य गता इत्यर्थः ॥ कालेन वसंतादिकालेनोन्मीलितानां प्रफुल्लितानां मालतीत्युपलक्षणं मल्लि
कादिपुष्पाणां परिमलो धिमर्दः सौजन्यमनोहरो गंधस्तस्याचष्टंभस्य स्तंभस्य मुष्टिंधया मुष्ट्या निष्पीय धयंति पिबंती
ति ते कालोन्मीलितमालतीपरिमलघनादप्यधिकतरसुखकरा इत्यर्थः ॥ नाडीमुष्ट्योश्चेति खश्प्रत्यये प्रसिद्धाः क्वाहं

क्वेमे शंकरसद्गुरोर्गुणगणा दिग्जालकूलंकषाः कालोन्मीलितमालतीपरिमलाचष्टंभमुष्टिंधमाः ।
क्वाहं हंत तथापि सद्गुरुकृपापीयूषपारंपरीमग्नोन्मग्नकटाक्षवीक्षणबलादस्मि प्रशस्तार्हता ॥ ६ ॥

तु रसं तावयोग्यः क्व यद्यपीत्यध्याहार्यं हंतेति हर्षे तथापि सद्गुरोर्धिया तीर्थस्य शंकरस्य या कृपा रूपस्य पीयूषस्या
मृतस्य पारंपर्यं परंपरायां मग्नेनोन्मग्नेन च कटाक्षेण निमीलने मग्नत्वस्योन्मीलनेऽभ्युन्मग्नत्वस्यारोपः वीक्षणमे
व बलं तस्मात्प्रशस्ता योग्यता मम अस्तीत्यर्थः ॥ अननुरूपयोर्धर्मधर्मिणोर्वर्णनेन विषमं वर्ण्यते यत्र घटनानुरूपयोरित्यु
क्तेन विषमेण प्रासाद्या अनर्हताया चिन्त्यार्थरूपकेण प्रतिषेधाद्देपालंकारस्य आक्षेपः स्वयमुक्तस्य प्रतिषेधो वि ३
चारणादित्युक्तस्य आभ्यां संकरः अधिभ्रांतिजुषामात्मन्यंगांगीत्वं तु शंकरदूत्युक्तेः स्वयमित्यैर्मसमस्तस्ताः स्वगुरवः शं

अधन्यन मकृतार्थमात्मानं धन्यं मन्यंत इति धन्यंमन्या असज्जनं दुर्जनमात्मानं सुजनं मन्यंत इति सुजनंमन्या उक्तसूत्रेण मुम् अब्धेः
समुद्रस्य कन्या लक्ष्मीः सेव नटी चंचलत्वान्नर्तकीव तस्या नर्त्येन नर्तनेनोन्मत्ताः धन्यंमन्याश्च ते वि वे कश्रून्याश्च सुजनंमन्या
श्चाब्धिकन्यानटीनृत्येनोन्मत्ताश्चेति द्वंद्वो वा द्वावेर्द्वयोः कर्मधारये द्वंद्वो वा तेन चेते नराधमेभ्योऽप्यधमाश्च तेषां कथा अद्रा तेषां
नराधमानां अधमाश्च ताः कथाश्च तासां संमर्दः संघर्ष एव दुष्कर्दमा दुष्पंकाः तैर्दिग्धां लिप्तां मे गिरं वाचं मधुरं शंकरगु
रोः क्रीडया समुद्यद्यशा एव पारावारः समुद्रः पारावारः सरित्सरिति रिल्लमरस्तस्य समुद्यल्लद्जलङ्गैर्वारिभि र्वाहैः
संक्षालयामि स्फुटं यथा स्यात्तथा सम्यक्प्रक्षालयामीत्यर्थः ॥ तथा चोक्तं भगवता वेदव्यासेन असत्कीर्तनकांतारपरिवर्तिनी

धन्यंमन्यविवेकशून्यसुजनंमन्याब्धिकन्यानटीनृत्योन्मत्तनराधमाधमकथासंमर्ददुष्कर्दमैः । दिग्धां मे गिरमद्य शंकरगु
रुक्रीडासमुद्यद्यशः पारावारसमुच्छलज्जललवैः संक्षालयामि स्फुटं ॥ ७ ॥ रथ्याकर्त्रनुरथ्यरीथिपाणसहस्रा क्ष्माक्षिती
द्रहमारेरौदार्यस्यादिवर्णनकलादुर्वासनावासितां ॥ मद्वाणीमधिवासयामि यमिनस्त्रैलोक्यरंगस्थलीनृत्यत्कीर्ति
नटीपटीरपटलीचूर्णैर्विकीर्णैः क्षितौ ॥ ८ ॥

पांसुलां वा च इति गैरिकथालाल्तनुप्रासयोरन्योन्यनिरपेक्षयोरेकप्रसमावेशा
त्तिलतंडुलवत्संसृष्टिः सैषा संसृष्टिरेतेषां भेदेन यदिह स्थितिरित्युक्तेः ॥ ७ ॥ वध्या सुतेन गर्दभी शृंगेणाचतुष्पेनतुल्याये क्ष्माद्र
णां क्षितीन्द्राणां राज्ञां क्षमारोऽर्यो दार्यदयादयस्तेषां वर्णनस्य या कला तल्लक्षणया दुर्वासनया दुर्गंधिना वासितां दुर्गंधिस्था
सास्य यात्रयमिनोः यतेः श्रीशंकरस्य त्रैलोक्यरक्षणाया रंगस्थल्यां नृत्यभूमिप्रदेशे नृत्यंती चासौ कीर्तिलक्षणा नटी तस्याः
पटीरस्य चंदनस्य पटली समूहस्तस्याश्चूर्णैः क्षितौ पृथिव्यां विकीर्णैः प्रसृतैः अधिवासयामि सुगंधयामि ॥ ८ ॥ श्रीशंकरः ॥

Dr BHAU DAJI MEMORIAL
Dr BHAU DAJI MEMORIAL

४ अयं प्रौढो नवकालिदासस्य माधवस्य कविता संततिरूपः संतानकः कल्पवृक्षो अस्य समुद्गतः सुमनसां पंडितानां हर्षलक्षणा
मोदपरंपरां दध्यात् यथा कल्पवृक्षः सुमनसां देवानां आमोदस्यातिरम्याकर्षिणो गंधस्य संततिं तद्वदित्यर्थः ॥ तं विशिनष्टि पी
यूषधुतेरमृतांशोरखंडस्य रवंडःशकलः मंडनमलंकारो यस्य तस्य श्रियस्य रूपाया; रूपालरस्य श्रिया श्रीगुरुरस्य गुरोर्यत्प्रेम
स्थेम्ना स्थैर्येण समर्हणं सम्यक्पूजनं तस्मिन्नर्हा योग्या मधुरा व्याहारा उक्तय एव प्रसूनानि पुष्पाणि तेषामुत्करो निचयो
यस्मिन् स अत्र कविता संतानस्य कल्पवृक्षेण अभेदेन रूपेपारंजनाद्रूपकालंकारस्तदुक्तं विषयभेदतादूप्यरंजनं विषय

पीयूषद्युतिरवखंडमंडनरुपारूपालरश्रीगुरुप्रेमस्थेमसमर्हणार्हमधुरव्यापारसूनोत्करः ॥ प्रौढोयं नवका
लिदासकवितासंतानसंतानको दृश्यादस्य समुद्गतः सुमनसामामोदपारंपरी ॥९॥ सामोदैरनुमोदितां मृग
मदैरानंदितां चंदनैर्मंदारैरभिनंदितां प्रियगिरा काश्मीरजैः स्मेरिताम् ॥ वाचं माधवकालिदासविदुषो दोषोज्झितां
दुष्कविव्रातैर्निष्करुणैः कृता विकृता धूर्तैस्तरुष्कैरिव ॥ १० ॥
स्यचद्रूपं रूततादृति ॥९॥ सुमनसां सुखकरमपि
वस्तु कुमनोभिर्विकृतं क्रियत इत्यालोच्य स्ववाचो विकारप्राप्तिं संभाव्याह ॥ सामोदैरिति आमोदेन हर्षेण वा सहितैः
मृगाणां मदैः कस्तूरिकासंज्ञकैः अनुमोदिता श्लाघिता सामोदैरित्यस्योत्तरत्रापि संबंधः सामोदैश्चंदनैरानंदि
ता अभिनंदिता तथा सामोदैर्मंदारैः प्रियगिराभिनंदिता तथा सामोदैः काश्मीरजैः प्रियगिरास्मेरिता विकासिता श्ला ४
घिता दोषैर्वर्जिताऽपि धनुर्धरा दोषाराशिस्तस्या मुखिताः स्वस्थानाद्विमुक्ता निष्करुणास्तरुष्कैर्म्लेच्छैर्यथा
विकृता क्रियते। तरुष्कः म्लेच्छके जातावित्यभिधानात् तथैवंभूतास्वं दोषविनिर्मुक्ता नवीनकालिदासस्य विदुषो

माधवस्यैषा वाग्दुष्टानां कवीनां समुदायैरत एव निष्करुणैः विकृता विकारमन्यथाभावं प्रापिता क्रियेतेत्यर्थः ॥१०॥ एवं प्रासंगिकं
नतां चितां काव्यकरणे प्रतिबंधकां वारयति। यद्वेति। यद्वा दीनेषु दयालवः सहृदयाः परकीयश्रमाद्यभिज्ञाः सौजन्यात्मि
कायां कल्लोलिन्यां नद्यां दोलांदोलनमितस्ततो भ्रमणं तदात्मकं यत्खेलनं तस्मिन्नेकं मुख्यं रसिकस्वांतं मनो येषां ते प
रोक्तिं मौक्तिकवत्संजुषंतीति तथाभूताः अमी संतः संति अतो नंतया चिंतया किं न किमपि साध्यं कर्तव्यमित्यर्थः ॥ तेषां दौर्लभ्यमा
शंक्याह। यद्वा कारुण्यरत्नाकरः समुद्रः परगुरुः श्रीशंकरस्तुष्यति तथा च तत्संतुष्ट्यर्थं मवतरं पतितव्यमिति भा
वः अत्र पूर्वश्लोकात् प्राप्तचिंताया यद्वेत्यादिना प्रतिषेधादाक्षेपालंकारः ॥ तदुक्तं आक्षेपः स्वयमुक्तस्य प्रतिषेधो विचारणात् ॥ ११

यद्वा दीनदयालवः सहृदयाः सौजन्यकल्लोलिनीदोलांदोलनखेलनैकरसिकस्वांताः समंतादमी ॥ संतः
संति परोक्तिमौक्तिकजुषः किं चिंतया नंतया यद्वा तुष्यति शंकरः परगुरुः कारुण्यरत्नाकरः ॥११॥ उपक्रम्य
स्तोतुं कतिचन गुणान् शंकरगुरोः प्रभग्नाः श्लोकाद्यैः कतिचन तदर्धार्धरचने ॥ अहं तु स्तोतुं स्तानहहच
लयेन्नीतिकिरणाकराभ्यामाहर्तुं व्यवसितमतेः साहसिकता ॥ १२ ॥
ननु यत्र श्रीशंकरगुणवर्णने ब्रह्मादयोपि प्रभग्नास्तत्र प्रवृत्तस्य
तव साहसमात्रमेवेति चेत्सत्यं तथापि गुरुकटाक्षा अघटितमपि मदभीष्टं घटयितुं शक्ता इत्याहोपक्रम्येति द्वाभ्याम् ॥ श्रीशंकरगुरो
रितिया अहं तान् तथाभूतान् गुणान् स्तोतुं स्तोतुमिच्छुरहहाश्चर्यं शीतकिरणं चंद्रं कराभ्यां हस्ताभ्यामाहर्तुं व्यवसित
मतेः व्यवसिता निश्चिता मतिर्यस्य तस्य बालस्य साहसिकताकलयं संपादयामि अत्र अस्मिन् तद्वत् साहसिकताप

दार्थारोपान्निदर्शनालंकारः पदार्थवृत्तिमप्येके वदंत्यन्यां निदर्शनामितिलक्षणात् ॥ १२ ॥ यद्यप्येवं तथापि विपुलानां दुग्धाब्धेः क्षीरसमुद्रस्य लहरीणां प्रवाहाणां लसतश्चकासंतो ये कल्लोला बृहत्तरंगास्तेषामालीपंक्तिस्तस्या लसितपरिहासैकरसिका मुख्यरसिकास्ततो प्यतिस्वच्छा मतिपतेर्धिषातोर्भस्य शंकरस्य चामी कटाक्षा मूकानपि वाचालयितुं वाक्याः समर्था मपि उल्लसंत अघटितं यदभीष्टं तस्य मम माघटिताभीष्टस्य घटने भवाम निशायेनवाका इत्यत्र किंचित्रं किमप्याश्चर्यं न भवतीत्यर्थः भवामघटिताभीष्टस्य घटने किंचित्रमिति वा ॥ १३ ॥ एवमपि

तथाप्यज्ञं भंते मयि विपुलदुग्धाब्धिलहरीलसत्कल्लोलालीलसितपरिहासैकरसिकाः । अमी मूकान्वाचालयितुमपि शक्ता यतिपतेः कटाक्षाः किंचित्रं भवामघटिताभीष्टघटने ॥ १३ ॥ अस्मज्जिह्वाग्रसिंहासनमुपनयतु स्वोक्तिधारामुदारामद्वैताचार्यपादस्फुटकृतसुकृतोदारताचारदांवा ॥ नत्यक्तं संकजयोश्रीर्मुकुलटकुटीनिस्रवत्स्वः स्रवंतीकल्लोलोद्वेलकोलाहलमदलहरीरंगदुर्घांदुस्यहृद्यां ॥ १४ ॥

तस्यैर्यमलभमानो जगज्जननीं सरस्वतीं प्रार्थयते अस्मदिति । अद्वैताचार्यपादस्फुटा श्रीशंकराचार्यपादस्फुटा कृतं संपादितं यत्सुकृतं पुण्यं तेनोदारता यस्याः कृतं सुकृतं येन तास्मिन्ममयि उदारता यस्या इति वा साशारदांवान्त्यतोभक्तं जयस्य शिवस्यो श्रीर्मुकुलटकुटान्निस्रवंती या स्वः सरित् गंगा तस्याः कल्लोलानामुद्वेलो निर्वलो यः स्वर्थो यः कोलाहलस्तस्य यो मदो गर्वस्तस्य लहरीणां रंगं दुर्घं खंडुनकर्तृ यस्या स्वां इत्यनेन हृद्यां मनोज्ञां उदारां धिशालां स्वीयां व्याहारधारां अस्मज्जिह्वाग्रमेव सिंहासनमुपनयतु जिह्वाग्रलक्षण सिंहासन समीपं प्रापयतु अभ्यर्थनायां लोट् स्त्रग्धरा म्रभ्नैर्यानां त्रयेण त्रिमुनियति युता स्त्रग्धरा कीर्तितेयमिति लक्षणात् ॥ ४

ननु दुर्घटेऽर्थे तवयाच्ञः पलायनमेवयुक्तं मध्येसामर्थ्यवशान्निरस्तो विशार्जितयशोनाशसंभयादिति चेदिदमेवाधिचार्य पलायितवतीं मद्वाचं गुरोर्गौरियाद्वलाद्या ? स्वाहृत्य कविगणो नियुंक्त इत्याह केति हे शंकरस्य गुरोः सुचरितं काहं वराकी क्षुद्रा क अतश्चिरार्जितं मम यशः कथं कुतो निर्वंध्नासि नाशयसि अंबुधो समुद्रे मां मम यशो वा किमर्थं मज्जयसि इदस्फुटत्का पलायितवतीं चपलां वाच्यं बलात्स्वाहृत्स शंकरस्य गुरोर्गुणास्तुतो कविसमुहो नियुंक्ते प्रेरयतीति चित्रं गुरोर्गौरवं शार्दूलवि० १५

केदं शंकरसद्गुरोः सुचरितं काहं वराकी कथं निर्बध्नासि चिरार्जितं मम यशः किं मज्जयस्यंबुधौ ॥ इत्युक्त्वा चपलां पलायितवतीं वाचं नियुंक्ते बलात्स्वाहृत्य गुणस्तुतौ कविगणाश्चित्रं गुरोर्गौरवं ॥ १५ ॥ रुक्षैकाक्षरयादि धंदुरारणैर्शोणादिकप्रत्ययप्रायैर्हन्तयडंतैदंतुरतरैर्दुर्बोधदूरान्वयैः ॥ क्रूराणां कविता वलोकतिपयैः कष्टैर्न रुक्षैः पदैर्हा हास्यास्पदता गता किरातचिततेरणीव वाणी मम ॥ १६ ॥ श्री शंकरायनमः

काव्यरचनायां प्रवृत्ता मद्वाणी क्रूराणां कवितावतां शैलीमनुसरिष्यतीति साक्रोशमाह । रुक्षेति । रुक्षा वासावेकाक्षरा चासौ वाक्च सा च निघंटुः कोशाश्च शरणं येषां तैः औणादिकाः प्रत्ययाः प्रायेण येषु तैर्यङंतानि च तानि दंतुरतराणि विषमतराणि च दंतुरं चाच्चवद्वुधाद्वैषम्यो न्नतदंतमोरिति विश्वप्रकाशः यङंताश्च दंतुरतराणि चेति दिवा दुर्बोधानि च तानि दुरान्वयानि च दुर्बोधानि च दुरान्वयानि चेति तैः कष्टैर्न रुक्षैः क्रूराणां कवितावतां पतिपयैः कैश्चित्पदैर्हा हा मम वाणी च नागा स्यात् यथा एणीमगीकिरातानां चितते यंत्रे स्तद्दित्यर्थः ॥ १६ ॥

एवंतर्हि किमर्थं काव्यस्य नायां प्रवृत्तस्त्वमिति चेत् श्रीशंकराचार्यस्य गुणानुवर्णनेन स्वस्य कृतकृत्यतासंपादनार्थं भिसाशयेनाह ॥ नेतायत्रेति । यत्र यस्मिन् काव्ये भगवत्पादेतिसंज्ञा यस्य स महेशोनेता मुख्यः स्वामी वर्ण्यः इति यावत् । उल्लसति प्रकाशते तस्य काव्यस्य तदादिदोषेशब्दार्थौ सगुणवर्णनलंकृती पुनः कापीस्कृतस्वरूपस्य प्रभुसंमितशब्दप्रधानवेदादित्रास्त्रोयः सुहृत्संमितार्थतात्पर्यवदितिहासपुराणादिभ्यश्च शब्दार्थयोर्गुणभावेन रसांगभूतव्यापारप्रवणतया विलक्षणस्य काव्यस्य सरसतापादनेनाभिमुखीकृत्योपदेशकर्तुर्लोकोत्तरवर्णनानिपुणस्य कवेः कर्मणः कर्ता व्यासइवाचलः स्थिरश्चासौ कविश्रेष्ठश्चेति व्यासाचलकविवरो माधवोधन्यः कृतकृत्यः न च विद्याक्षतिपूर्वकब्रह्मानंदप्राप्त्याकृतकृत्यतायावेदांतसिद्ध

नेतायत्रोल्लसतिभगवत्पादसंज्ञोमहेशः शांतिर्यत्रप्रकचतिरसः शेषवानुज्ज्वलाद्यैः ॥ यत्राविद्या क्षतिरपिफलंतस्यकाव्यस्यकर्ता धन्योव्यासाचलकविवरस्तत्कृतिज्ञाश्च धन्याः ॥ १७ ॥ ५ ॥

त्वात् कथं तदप्रतिपिकरसयुक्तकाव्यकरणेन कृतकृत्यतेत्यत आह । आहयत्रयस्मिन्काव्ये शांतिः शांतिसंज्ञोरसः प्रकचतिप्रकाशते रसविशेषणमिति उज्ज्वलाद्यैः शेषैरुपसर्जनभूतैः शेषवान् शेषीप्रधानभूत इतियावत् । उज्ज्वलः शृंगारः शृंगारः शुचिरुज्ज्वलः इत्यमरः । आद्यपदेन वीरकरुणाद्भुतहास्यभयानकबीभत्सरौद्रारव्यारसागृह्यंते यत्र यस्मिन् काव्ये अविद्याक्षतिरपिफलमक्षतेरन्यत्र फलत्वाभावादपिशब्दः तथाचैवंविधकाव्यकर्ता धन्य एवेतिभावः । अस्य माधवस्य कृतिंपठंजानंतीतितत्कृतिज्ञास्तेपिधन्याः मंदाक्रांतांबुधिरसनगैर्मोभनौतौगयुग्मे इतिलक्षणात् ॥ १७ ॥ अथशांकरीकथा

मंदाक्रांता

विस्तरेण निरूपयितुं प्रथमं तावच्छ्रोतुः सुखप्रतिपत्तये षोडशसर्गैर्निरूप्यां तां संक्षिप्य दर्शयति ॥ तत्रेत्यादिना तत्र षोडशसर्गात्मके काव्ये आदिमे आद्ये सर्गे उपोद्घातः स्थितां प्रकृतसिद्ध्यर्थामुपोद्घातं प्रवक्षतइत्युक्तेः द्वितीये देवतासंवादादिरूपो निरूपितः द्वितीयसर्गे तु तस्य भगवतो महेशस्योद्भव आविर्भावः तृतीयसर्गे अमृतमंधोऽन्नं अदनीयं येषां अदेनुमन्धोन्नअदनं केयाव्येत्यमरः अनुमागमोदस्य धादेशश्च तेषां तेषामनृतांधसां देवानामवतारस्य निरूपणं जस्यतस्यामृतांधसोवतारस्येति वा ॥ १८ ॥ चतुर्थे सर्गे अष्टमवर्षात् प्राक् चरितमष्टमप्राक्चरितं तदुक्तं तदृष्टमाप्राक्चरितं च तस्य महेशस्य अष्टम

तत्रादिमउपोद्घातोद्वितीयेतुतदुद्भवस्तृतीयेतत्तदमृतांधोवतारनिरूपणं ॥ १८ ॥ चतुर्थसर्गेतस्याष्टम प्राक्चरितं स्थितं ॥ पंचमेतद्योग्यस्करवाश्रमप्राप्तिनिरूपणं ॥ १९ ॥ महतानेहसायेषा संप्रदायागता गताः ॥ तस्याः शुद्धात्मविद्यायाः षष्ठेसर्गेप्रतिष्ठितिः ॥ २० ॥ तद्व्यासाचार्यसंदर्शविच्छित्रंसप्तमे स्थितं ॥ स्थितोष्टमेमंडनार्यसंवादोनवमेमुनेः ॥ २१ ॥ वाणीसाक्षिकसार्वज्ञनिर्वाहोपायचिंतनं । दशमेयोगशक्त्या भूपति

प्राक्चरितं शुद्धत्वं च प्राकृतचारित्र्यर्थाश्रमस्य प्राप्तेर्निरूपणं योग्यस्य स्करवाश्रमस्येति वा ॥ १९ ॥ याएषाशुद्धात्मविद्या संप्रदायादागता महता कालेन संप्रदायस्य विच्छिन्नत्वाद्गतातस्याः शुद्धात्मविद्यायाः प्रतिष्ठितिः सम्यक्स्थापनं षष्ठेसर्गे स्थितं ॥ २० ॥ सप्तमे सर्गे तस्य शंकराचार्यस्य व्यासाचार्यस्य च परस्परसंदर्शनात्मकं विचित्रमाश्चर्यं स्थितं अष्टमे सर्गे मंडनाचार्ययतीश्वरभाष्यकारयोः संवादः स्थितः ॥ २१ ॥ नवमे सर्गे सरस्वतीसाक्षिकमुनेर्यत्सार्वज्ञत्वं तस्य यो निर्वाहस्तदुपायस्य चिंतनं स्थितं दशमे सर्गे योगशक्त्या भूपतेरमरकाभिधस्य राज्ञः कायशरीरप्रवेशनं स्थितं ॥ २२ ॥ ॥ ६ ॥

५ विलक्षणत्वं पंचमसर्गेतस्य योग्यायाजीवन्मुक्तिरूपसाधनस्य च तु ५

७ मीनध्वजस्य कामस्य कलाबुधाबालासां कलानां प्रसंगस्य प्रपंचनं प्रतिपादनमिति पूर्वेणान्वयः एकादशे सर्गे तु भैरवाभि
धस्य कापालिकस्य निर्जयः स्थितः ॥२३॥ द्वादशे सर्गे हस्तामलकार्य तोटकाभयसंश्रयः इयोः शिष्यत्वेनाश्रयणं स्थितं त्रयो
दशे सर्गे तु वार्तिककांतायाः श्रुतिविद्यायाश्चालनप्रचारः स्थितः ॥२४॥ चतुर्दशे सर्गे पद्मपादस्य तीर्थयात्रायां निरूपणं
पंचदशे सर्गे तु तस्य शंकरस्य राजपातकं कौतुकमुक्तं दिग्विजयस्य कौतुकमिति वा ॥२५॥ षोडशे सर्गे तस्य महा
त्मनः शारदापीठवासः स्थितः इत्येवं प्रकारेण षोडशभिः सर्गैः शांकरीकथा प्रतिपादनीया ॥२६॥ सैषा शांकरीकथा कलि

बुध्या मीनध्वजकलास्तत्प्रसंगप्रपंचनं ॥ सर्ग एकादशे तु स्यभैरवाभिध निर्जयः ॥२३॥ द्वादशे हस्तधात्र्याये
तोटकाभयसंश्रयः ॥ वार्तिकांतश्रुतिविद्याचालनं तु त्रयोदशे ॥२४॥ चतुर्दशे पद्मपादतीर्थयात्रानिरू
पणं ॥ सर्गे पंचदशे प्रोक्तं तद्राजयकौतुकं ॥२५॥ षोडशे शारदापीठवासस्तस्य महात्मनः ॥ इति षोडश
भिः सर्गैः सा ग्राह्या शांकरीकथा ॥२६॥ सैषा कलिमलध्वंसकृत् श्रवणापि कामदा ॥ नानाप्रश्नोत्तरे रम्या
विशामारभ्यते मुदा ॥२७॥ एकदा देवता रूप्याचलस्थमुपतस्थिरे ॥ देवदेवं तुषारांशुमिव पूर्वाचलस्थितं ॥२८॥ ॥

मलनाशकर्त्री सकृत् श्रवणेनापि काम्यमानपुरुषार्थचतुष्टयप्रदाना नानाप्रश्नोत्तरैर्मनोज्ञा विदुषां प्रमोदार्थमारभ्यते ॥
॥२७॥ इत्थं संग्रहेण शांकरीकथां निरूप्य तस्या विस्तरेण निरूपणं प्रतिज्ञाय तदुपोद्घातत्वेन कथां प्रस्तौति एकदेति एक
दा एकस्मिन् काले रूप्याचले कैलासे स्थितं देवानामिंद्रादीनां देवं महादेवं पूर्वाचलस्थं चंद्रमिव देवता उपतस्थिरे उ ७
पासांचक्रिरे देवता ब्रह्माद्याः अत्र ग्राह्याः निगमाचार्यैरपरित्यक्तनागमाचाररसान्वित आदिवर्णानवलोक्य सत्य

लोकं गतेन नारदेन प्रेरितो ब्रह्मा सप्तऋष्यादिसहितः शिवलोकमागत्य प्रणिपत्य पंचवक्त्रं शिवमुवाचेति प्राचीनविजयोक्तेः ॥२८॥ ॥
उपास्य यत्कृतवंतस्तदाह । उपासनया प्रसादितस्य प्रसन्नतारूपेण लिंगेनानुमिता स्वार्थस्य सिद्धिर्याभिस्ता अमुकुला निमुकुलीकृता
नि हस्तकमलानि याभिस्ता द्वंद्वांजलयो देवं प्रणिपत्य प्रकर्षेण नम्रीभूय विनयेन व्यजिज्ञपन् विज्ञापनं कृतवत्यः ॥२९॥ तदेवाह हरिति
हे भगवन् नोऽस्माकं हिताय बुद्धवपुर्धारी जनार्दनः सुगतान् वंचयन् यदि धत्ते स्म त्वया विज्ञातमेव ॥३०॥ यद्यपि जनार्दनो ऽस्मद्धिताय

प्रासादानुमितस्वार्थसिद्धयः प्रणिपत्य तं ॥ मुकुलीकृतहस्ताब्जा विनयेन व्यजिज्ञपन् ॥२९॥ विज्ञातमेव भगव
न्विधत्ते यद्धितायनः । वंचयन्सुगतान् बुद्धवपुर्धारी जनार्दनः ॥३०॥ तत्प्रणीतागमालंबे बौद्धैर्दर्शनदूषकैः ॥ व्या
प्तेदानीं प्रभो धात्री रात्रिः संतमसैरिव ॥३१॥ वर्णाश्रमसमाचारान्दूषयंति श्रुतिद्विषः ॥ ब्रुवंत्याम्नायवचसां जी
विकामात्रतां प्रभो ॥३२॥ न संध्यादीनि कर्माणि न्यासं वा न कदाचन ॥ करोति मनुजः कश्चित्सर्वे पाषंडतां गताः ॥३३॥
श्रुतेऽपि दधति श्रोत्रे क्रतुरित्यक्षरद्वये ॥ क्रियाः कथं प्रवर्तेरन् कथं क्रतुभुजो वयं ॥३४॥ श्रीशंकराय ॥

दैत्यान् पूर्वं वंचितवान् तथापीदानीं तेन बुद्धेन प्रणीता रचिता ये आगमास्तदालंबे बौद्धैर्दर्शयेतैः कर्मोपासनाज्ञानं च येन यस्मि
न् दूषितवातद्दर्शनं कर्मादिप्रतिपादकं वेदादिशास्त्रं तद्दूषकैर्बौद्धैः धात्री पृथ्वी व्याप्ता यथा संतमसैर्गाढांधकारैः रात्रिस्त
द्वत्तेषां निराकरणे त्वमेव प्रभुरिति सूचयितुं प्रभो इति संबोधनं त्वयि प्रभौ सतीदमस्माकमनुचितमिति वा संबोधनाशयः ॥
॥३१॥ अनर्थरूपं तेषां कृत्यमाहुः वर्णाश्रमाणां ये सम्यगाचारास्तान् दूषयंति यतः श्रुत्याम्नायं वेदं तपो ब्रह्म च विद्विषंतीति

ब्रह्मविदुषः अतएव वेदवचनानां जीविकामात्रतां ब्रुवंति वेदाजीविकार्थं निर्मिता इति कथयंति हे प्रभो।३३। न्यासं संन्यासं गताः प्राप्ताः॥३३। कलुरित्यक्षरद्वये श्रुतेपि सति श्रोत्रे पिदधति कर्णपिधानं कुर्वंति।३४।स्पष्टार्थः।३५। यथा साध्वी पतिव्रता अनन्येनैव भावेन स्वपतिमनुसरंती महोन्मत्तैर्दुष्टैर्दूष्यते तथा उत्तमपूरुषं क्षराक्षरातीतं परमात्मानं अनन्येनैव भावेन गच्छंती श्रुतिः साध्वी मदक्षीबैः शाक्यैर्बौद्धैः कापालैर्दूषिता अपितु सर्वैर्दूषिता तत्पाचालमपूरुषेण त्वया स्वप्रतिपादका श्रुतिरवश्यं रक्षणीयेति भावः॥३६॥ सद्यः कृतानि छिन्नानि द्विजानां शिरांस्येव पंकजानि तैरर्चितो भैरवो यैस्तैः कापालिकाधमैर्लोकमर्यादा कावा न ध्वस्ता किंतु सर्वैव नाशितेत्यर्थः।३७। पदं दत्वा गत्वा।३८। तत्तस्मादुत्साद्य विनाश्य श्रौ

शिवविद्यागमपरैर्लिंगचक्रादिचर्चिते। पाषंडैः कर्मसंन्यस्तं कारुण्यमिव दुर्जनैः॥३५॥अनन्येनैव भावेन गच्छंत्युत्तमपूरुषं॥ श्रुतिः साध्वी मदक्षीबैः कापालशाक्यैर्न दूषिता॥३६॥सद्यः कृतद्विजशिरःपंकजार्चितभैरवैः॥ न ध्वस्ता लोकमर्यादा का वा कापालिकाधमैः॥३७॥अन्येपि बहवो मार्गाः संति भूमौ सकंटकाः॥ जनैर्येषु पदं दत्वा दुरंतं दुःखमाप्यते॥३८॥तदुत्साद्याखिलाकरक्षार्थं मुत्साद्याखिलान्खलान्॥ वर्त्मस्थापय लुप्तं श्रौतं जगच्चेन सुखं व्रजेत्॥३९॥तुल्यकोपरतान्देवानुवाचागिरिजाप्रियः॥मनोरथं पूरयिष्ये मानुष्यमचलं ध्रुवं॥४०॥दुष्टाचारविनाशाय धर्मसंस्थापनाय च॥भाष्यं कुर्वन्ब्रह्मसूत्रतात्पर्यार्थविनिर्णयं॥४१

तं वर्त्म वैदिकं मार्गं।३९।मानुष्यमचलं ब्रह्मभावमाश्रित्य वो युष्माकं मनोरथं वांछां पूरयिष्ये॥४०॥ किं कुर्वन्नित्यपेक्षायामाह। दुष्टाचारविनाशायेति। ब्रह्मप्रतिपादकानां सूत्राणां तात्पर्यार्थस्य विशेषेण निर्णयाय न तत्तु अल्पाक्षरमसंदिग्धं सारवद्विश्वतोमुखं अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुकारिभिः स्वपदा

मोहनमज्ञानं प्रकृतिरूपादानं यस्य तच्च तद्द्वैतमेव ध्वांतं गाढं तमस्तस्य निरसनेन मध्याह्न सूर्यैश्चतुर्भिश्चतुरैः कुशलैः शिष्यैः सहितश्चतुर्भुजो हरिः॥४२॥ यतींद्रो नाम्ना शंकरो महीतले भविष्यामि तथा भवंतोपि मानुषीं तनुमाश्रिताः सर्वे स्वर्गवासिनो देवास्तं यतींद्रशंकरं आ अनुसरिष्यंति तदा भवतां मनोरथः पूर्णः स्यान्निर्विघ्नतिर्न संशयः अस्मिन्नर्थे संशयो न कर्तव्य इत्यर्थः॥४३॥४४। ततो यदुक्तं तदाह भुवन्निति। एवमनेन प्रकारेण द्विविधः देवान्प्रति ब्रुवन्स अन्यदुर्लभान् कटाक्षान् कुमारेरवामिकार्तिके निदधे यथा सूर्यः पंकजे

मोहनप्रकृतिद्वैतध्वांतमध्याह्नभानुभिः॥ सचतुर्भिः सहितैः शिष्यैश्चतुरैर्हरिवद्भुजैः॥४२॥ यतींद्रः शंकरो नाम्ना भविष्यामि महीतले॥ मद्वत्तयाभिसंधीतावि मानुषीं तनुमाश्रिताः॥४३॥ तं मामनु सरिष्यंति सर्वे त्रिदिववासिनः॥ तदा मनोरथः पूर्णो भवतां स्यान्न संशयः॥४४॥ ब्रुवन्नेवं द्विविधः कटाक्षानन्यदुर्लभान्। कुमारे निदधे भानुः किरणानिव पंकजे॥४५॥ क्षीरवारिनिधेर्वीचिसाचिवानुप्राप्य तानुगुहः॥ कटाक्षान्मुमुदे रत्नभीत्कुद्व्यानैदत्तानिव॥४६॥अथ चंद्रनंदनं स्कंदममंदं चंद्रशेखरः॥ दत्तचंद्रातपानंदि हारकल्पचकोरकः॥४७॥ शृणु सौम्य वचः श्रेयो जगदुद्धारगोचरं॥ कांडत्रयात्मके वेदे प्रोद्धृते स्यात् द्विजे द्युतिः॥४८॥ तद्रक्षणे रक्षितं स्यात् सकलं जगतीतलं। तदधीनत्वतो वर्णाश्रमधर्मततः स्तत:॥४९॥

किरणानुस्थापयतिनद्धदित्यर्थः॥४५॥ क्षीरनीरनिधेः क्षीरसमुद्रस्य वीचिविलसत्कल्पान् कटाक्षान्प्राप्य गुहः कुमारो मुमुदे यथा क्षीराब्धिवीचिविरहकृतान्न तुल्यान् चंद्रसंबंधिनो रश्मीननुप्राप्य जलधिर्मोदमाप्नोति तद्वत्॥४६॥ चंद्रशेखरः शिवः स्वसुतममंदबुद्धिमंतं स्कंदमवदत् उक्तवान् चंद्रस्य शेखरो शिवाशे नष्टिदत्तात्मके श्रयदातपेश्चंद्रज्योत्स्नाभिः आनंदिनो हारको दयाः पक्ष्यचकोरकाय स्यद्दृत लक्षणानां चंद्राणामानयेरेति यापांगतरंतु क्रियायां विशेषणं॥४७॥ शृणुयात्व

९ तदुदाहरति। जगदुद्धारविषयं श्रेयःसाधनं वचनं हे सौम्य शृणु श्रोतुं सावधानो भव कांडत्रयात्मके कर्मोपासनाद् ज्ञानभेदेन वेदत्रयात्मके वेदे प्रकर्षेणोद्धृते सति द्विजानां उद्धृतिः स्यात्॥४८॥ तेषां द्विजानां रक्षणे सति समस्तं जगतीतलं रक्षितं स्यात् वर्णाश्रमधर्मा पांतले संततः तदधीनत्वतः द्विजाधीनत्वतः तत उक्तं तदन्वयी॥४९॥ ततस्तस्मादिदानीमिदमुद्धार्यमित्यभिप्रायवतो मेमे तदु

द्धर्त्तीमिदमुद्धार्यमिति रतिमतः पुरा॥ मम गूढाशयविदौ विष्णुशेषौ समीपगौ॥५०॥ मध्यमं कांडमुद्धर्तुमनुज्ञातौ मया ततो॥ अवतीर्यांशतो भूमौ संकर्षणपतंजली॥५१॥ मुनी भूत्वा तदोपास्ति योगकांडकृतौ स्थितौ॥ अग्निमं ज्ञानकांडं तु उद्धरिष्यामि तिदृयता॥५२॥ संप्रति प्रतिजाने स्म जानात्येव भवानपि॥ जैमनीयनयांभोधेः शरत्पर्वशशीमिव॥५३॥ विशिष्टं कर्मकांडं तु मुद्धर्तुं ब्रह्मणः कृते॥ स्कंद ब्रह्मणपदं इति रव्यालिंगमिष्यसि तलोधुना॥५४॥ नगर्मी कुरु मर्यादामवतीर्य महीतले॥ निर्जित्य सौगतान् सर्वान् आम्नायार्थविरोधिनः॥५५॥ ब्रह्मापि लसहायार्थं मंडनो नाम भूसुरः॥ भविष्यति महेन्द्रोपि सुधन्वा नाम भूमिपः॥५६॥ तथेति प्रतिजग्राह विधेर्विधिधायिनीं॥ बुधानीकपतिर्वाणीं सुधाधारामिव प्रभोः॥५७॥ अथेंद्रोन्वपतिर्भूत्वा प्रजाधर्मेण पालयन्॥ दिवं चकार पृथिवीं स्वपुरीममरावतीं॥५८॥ सर्वज्ञोप्यसतांशास्त्रे कृत्रिमश्रद्धयान्वितः [illegible]

तान् पूर्वं गूढाशयाभिज्ञौ विष्णुशेषौ मम समीपगौ मध्यमकांडं देवताकांडमुद्धर्तुं तौ मयैवानुज्ञातौ भूमावंशतोऽवतीर्य संकर्षणपतंजली मुनी भूत्वा मुद्रोपास्ति योगकांडस्य कृतौ कर्तारौ स्थितौ करणार्थमिति वा अग्निमं ज्ञानकांडं तु अहमुद्धरिष्यामीति दृयता: प्रति संप्रति प्रतिजाने स्म प्रतिज्ञां कृतवानस्मि भवानपि जानात्येव त्वं तु जैमिनीयन्यायसमुद्रस्य शरत्सौर्णमासीचंद्रोम भूता च ब्रह्मणः कृते ब्राह्मणस्य वेदस्य हिरण्यगर्भस्य तपसः परब्रह्मणा श्चार्थं विशिष्टकर्मकांडस्योद्धरणाद्धुना स्कंद ब्रह्मण्य इति रव्या ९

तिं गमिष्यसीति पंचानां योजना॥५०॥५१॥५२॥५३॥५४॥ नैगमीं वैदिकीं आम्नायार्थस्य वेदार्थस्य विरोधिनः॥५५॥ भूसुरः ब्राह्मणः॥५६॥ प्रभोः शिवस्य वाणीं वाक्यं विधेर्हिरण्यगर्भस्यापि विधायिनीं प्रवर्तिकां बुधानीकपतिर्देवसेनापतिर्गुहः तथास्त्विति सुधाधारामिव प्रतिजग्राह॥५७॥ दिवं स्वर्गं॥५८॥ कृत्रिमया रचितया श्रद्धया युक्तः क्रौंचारी क्रौंचाख्यपर्वतस्यारातिः गुहः॥५९॥ सतारकस्यैदृसारिरोस्यारातिः शत्रुः स्कंदः महीतले अजनिष्ट प्रादुरभूत् यस्य भट्टपादस्य सन्निधासंज्ञादिक्सुदृशां दिग्गतानां भूषा अलंक्रिया अभूत्॥६०॥ अवतारकसंदृशीयत्रि स्फुटयन्निति जैमिनास्त्रे: सूचितं वेदस्य तात्पर्यं स्फुटयन्ना भूत् अराजत यथा अनूरुणा अरुणेन व्यंजितं प्रकाशितं जगत् सम्यक् भासयन् सहस्रांशुः सूर्यो राजते तद्वदित्यर्थः॥६१॥

ततः स तारकारातिरजनिष्ट महीतले॥ भट्टपादोभिधायस्य भूषा दिक्सुदृशामभूत्॥६०॥ स्फुटयन्वेदतात्पर्यमभाज्जैमिनिसूत्रितं॥ सहस्रांशुरिवानूरुव्यंजितं भासयन् जगत्॥६१॥ राज्ञः सुधन्वनः प्राप नगरीं सज्जनप्रियः॥ प्रत्यूहभ्यस्तितो द्रोपि चिरं विवत्तमपूजयत्॥६२॥ सोपि तं ब्राह्मणोपमासीनं कांचनासने॥ सो सभायां भवामास सत्करं विदुषवनीमिव॥६३॥ सभासमीपे निर्दिष्टस्थितकोकिलकूजितं॥ श्रुत्वा जगाद तत्रोजा राजानं पंडिताग्रणीः॥६४॥ मलिनैश्चेन्न संगस्ते नीचैः काककुलैः पिक॥ श्रुतिदूषकनिर्ह्रादैः श्लाघनीयस्तदा भवेः॥६५॥ श्रीशंकर॥

सभट्टपादः प्रत्यूहस्य प्रभातस्य आगमनं विधाय पुरुषं प्राप्य ... पुनस्तस्य चिर आगते प्रभातस्यानामिवाद्यं पुनस्तान् अतिपद्यते इति भावः॥६२॥ सुकरविः सुधाधिः वसंताद्यक वनीं स्वर्गवनीं॥६३॥ सभायाः समीपे विटपिनं वृक्षं श्रितस्य कोकिलस्य कूजितं मधुरभाषितं श्रुत्वा तद्राजा तन्निषण्णराजानं प्रति पंडिताग्रणीर्भट्टपादो जगाद बभाषे॥६४॥ यदुक्तवान् तदुदाहरति पिक हे कोकिल मलिनैर्नीचैः श्रुतेः कर्णस्य दूषकः पीडाकरो निर्ह्रादः शब्दो येषां तैः काककुलैः तव संगो न स्यात्तर्हि एतत् श्लाघनीयः स्कंदो भवेः एतद्राजन मलिनैः नीचैः काकवद्दस हृदयो नास्ति केवेद

३ दत्ताश्चेतरक कांतिर्येषां तैः बभौ चकाशे बालातपेनाताम्रैः ईषद्रक्तैः सरोरुहैः कमलैः सरसीव ॥ ६८ ॥ ६३
३ तेषु भट्ट

१० दूषकाभिरहार्दैः तत्संगेन स्यात्त्वं तदा त्वं श्लाघनीयो भवेरिति राजानं प्रत्युक्तवानित्यर्थः ॥ मूढो किरलंकारो मूढोत्करं न्याद्दूस्यथेव घद्दयंप्रति
कथ्यतद्रूपकते ६५ षड्भिज्ञाः बौद्धाः निराम्यथ्रुत्वा ॥ ६६ ॥ कुद्धसिद्धुलएव शाख्यीवृक्षस्तं स भट्टपादः युक्तिकुठारेण छित्त्वा तेषां बुद्धानां
ग्रंथैरेवंधनैः चीवैरुपचितैः क्रोधज्वालामवर्धयत् ॥ ६७ ॥ सा सभा तेषां बुद्धानां वदनै मुखैः रोषेण कोपेण पाटलादिषु साक्षे
पं यथा स्यात्तथा प्रतिपादनं कुर्वन्त्यस्तथा परस्परं खंडनं कुर्वत्स्वसत्स्वपूत्कलविहारयन्त्र निर्घोषेणनादः उदतिष्ठत ॥ ६९ ॥ यथा
देवानामिंद्रेण पक्षेषु पृथुलेन कर्कशेन वज्रेण क्षताः धराधराः पर्वताः अधः निपतुस्तथा देवेंद्रस्थानीयेन बुधानां पंडितानां
मिंद्रेण भट्टपादेन तथागताः सुगताः धर्मराजस्तथागतः इत्यमरः त एव धराधरास्तत्क्षणं तस्मिन्नेव क्षणे मूढो निम्यस्तः पृथुलो

षड्भिज्ञा निराम्य भांयाचंतात्पर्यगर्भितां ॥ भितरां चरणस्पृष्टा भुजंगा इव चुक्रुधुः ॥ ६६ ॥ छित्वा युक्तिकुठारेण बुद्ध
सिद्धांतशाखिनं ॥ सत द्रुथैर्धनैश्चीर्णैः क्रोधज्वालामवर्धयत् ॥ ६७ ॥ सा सभा वदनैस्तेषां रोषपाटलकांतिभिः
बभौ बालातपाताम्रैः सरसीव सरोरुहैः ॥ ६८ ॥ उपन्यस्यत्सु साक्षेपं खंडयत्सु परस्परं ॥ तेषूद्दीतध्वनिर्घोषा
किंदृन्निव रसातलं ॥ ६९ ॥ अधः पेतुर्बुधेंद्रेणक्षताः पक्षेषु तत्क्षणं ॥ पृथुकर्कशतर्केण तथागत धराधराः ॥ ७० ॥ स
सर्वज्ञपदं धिन्नो सहमानश्च विद्विषां ॥ चकारचित्रविन्यस्तानेतान्मौनविभूषितान् ॥ ७१ ॥ ततः प्रक्षीणदर्पेषु बौद्धेषु वसु
धाधिपं ॥ बोधयन्न्बहुधा वेदश्चोसि प्रशशास सः ॥ ७२ ॥ बभाषे स धराधीशो विधायतौ जयाजयौ ॥ यः पतितांगिरः शृंगाद्व्यय

वास्त्वासौ कर्कशो दृढश्च सत्वासौ तर्कश्च तेन पक्षे पुक्षता खंडिता अधः पेतुः निरूष्टतां प्राप्ता इत्यर्थः ॥ ७० ॥ सविशेषेण
सर्वं जानातीति वित्तः सर्वज्ञः भट्टपादः द्विषां शत्रूणां सुगतानां सर्वज्ञपदमसहमानश्च यद्दस न्वयः ७१ ॥ सप्रदृपाह ॥ ७२ ॥ अथ बौ
द्धानां पराजयानंतरं बभाषे उवाच ॥ विधाधीनौ जयपराजयौ नहि कस्य मतं श्रेष्ठं कस्याश्रेष्ठमिति निर्णयः कथं स्यादि
त्येवं तत्राह ॥ यः पर्वतस्य शृंगात्पतितो विनाशरहितः स्यात्तस्य मतं श्रेष्ठं अन्यस्याश्रेष्ठमित्यर्थः ॥ ७३ ॥

तदाकर्ण्य राज्ञोक्तं श्रुत्वा अन्ये सौगताः ॥ परस्परं मुखानि अवलोकयन्निलन्वयः ॥ द्विजाग्र्यः द्विजोत्तमः भट्टपादस्तु स्वरक्षार्थं विहायत्सम
रन् पर्वतस्य शृंगं अरुरोह ॥ ७४ ॥ दूसे संघोषयता शब्दं कुर्वता न्यपाति गिरेः शृंगान्निपतितं ॥ ७५ ॥ किमुचितं कं दोषं हितैरसुरकादि
भिः दत्त ययाति धर्मस्याश्वयनस्य संबंधनिमित्तेन तत्तादात्म्य संभावनस्य सत्त्वाद्दुरंसक्षा संभावनास्यादुरंसक्षाय स्तुहेतु फल

तदाकर्ण्य मुखान्यन्ये परस्परमलोकयन् ॥ द्विजाग्र्यस्तु स्मरन्वेदानारुरोह गिरेः शिरः ॥ ७४ ॥ यदि वेदाः प्रमा
णं स्युर्भूयात्का पिन्न मे क्षतिः ॥ इति घोषयता तस्मान्न्यपाति सुमहात्मना ॥ ७५ ॥ किमुदोहितत्र दृत्ते पि पुण्यधिल
यमाश्रिते ॥ ययातिश्च्यवते स्वर्गात्पुनरित्यूचिरे जनाः ॥ ७६ ॥ अपि लेकि गुरुः शैलात्तूलपिंड इवापतत् ॥ श्रुतिरात्म
शरण्यानां व्यसनं नो भिनत्ति किं ॥ ७७ ॥ श्रुत्वा तदद्भुतं कर्म द्विजादिभ्यः समाययुः ॥ घनघोषमिवाकर्ण्य निकुंजे
भ्यः शिखावलाः ॥ ७८ ॥ इष्टातमहत्तं राजा श्रुतिषु संदधे ॥ निनिंद बहुधात्मानं खलसंसर्गदूषितं ॥ ७९ ॥
सौगतास्तु ब्रुवन्नेदं प्रमाणं मतनिर्णये ॥ मणिमंत्रौषधैरेव देहरक्षा भवेदिति ॥ ८० ॥ दुर्विधैरन्यथा नीते प्र
त्यक्षेर्थे विपार्थिवः ॥ भ्रुकुटी भीकर मुखः संधामुग्रतरां व्यधात् ॥ ८१ ॥ श्रीशंकराचार्याय नमः ॥

तमेनत्यक्तं ॥ ७६ ॥ श्रुतिरात्मा स्वियमशरण्यं येषां तेषां व्यसनं दुःखं किं नो छिनत्ति अपितु छिनत्त्येव ॥ ७७ ॥ घनघोषितं मेघ
गर्जितं निकुंजेभ्यो लतादिपिहितादुदरेभ्यः शिखावलाः मयूराः ॥ ७८ ॥ धैर्यं खलानां दुर्जनानां सौगतानां संसर्गेण संब
धेन दूषितं ॥ ७९ ॥ ८० ॥ दुर्विधैः खलैः बौद्धैः प्रत्यक्षेर्थे अपि अन्यथा नीते सति राजा भ्रुकुटीभीकरं भयंकरं मुखं यस्य सः
प्रतिज्ञां मुग्रतरां व्यधात् विहितवान् ॥ ८१ ॥ तामेव आह एष्वामीति द्वाभ्यां ॥ मंत्रापलेषु यंत्रा कारसुपाषाणेषु ८२ १०

इत्येवं संश्रुत्य प्रतिज्ञां विधाय गोत्राधिपः पृथिवीपतिः। गोत्रा कुः पृथिवी इत्यमरः तस्याः ईशो राजा आशीविषः सर्पः। द्विजाश्च सौगताश्च तानु॥
॥८०॥८१॥ वा पुंसि पद्मं नलिनमित्यमरात् पद्माः इति पुल्लिंगप्रयोगः। कंठप्रमाणे पाथसि जले प्रमाणे द्वयसच् प्रत्ययः। क्रमणि स्व
यं प्रतिपद्य द्विजा ब्राह्मणाः स भानुः॥८२॥ घटे न्यस्तोऽथ वायी विष्णुरस्तीति कथनीयां शं संदिह्य उपस्थित्य सौगता अपि घटस्थि

पृच्छामि भवतः किंचिदुक्तं न प्रभवंति ये। यत्रोपलेषु सर्वास्तान् धातयिष्याम्यसंशयं॥८३॥ इति संश्रुत्य गो
त्रेशो घटमाशीविषान्वितं। अनयात्र किमस्तीति पप्रच्छ द्विजसौगतान्॥८४॥ वक्ष्यामहे वयं भूप श्वः प्रभा
ते स्पनिर्णयं। इति प्रसाद्य राजानं जग्मुर्भूसुरसौगताः॥८५॥ पश्चाद् व्रतपरास्तेषु कंठद्वयसपाथसि प
द्मसंधिं प्रति भद्रेशः सोऽपि प्रादुरभूत्ततः॥८६॥ संदिह्य पन्नगोऽनीयां ग्रामांदि स्थलं तु हि ते द्विजाः। आजग्मुरपि
निश्चित्य सौगताः कलशास्थितं॥८७॥ ततस्ते सौगताः सर्वे भुजंगोऽस्तीत्यवादिषुः। भोगीशभोगशाय
नो भगवानिति भूसुराः॥८८॥ श्रुत्वा भूसुरवाक्यस्य वदनं पृथिवीपतेः। कासारशोषणम्लानसार १७
सश्रियमाददे॥८९॥ अथ प्रोवाच वाग् दिव्या याकस्मात् जमशारीरिणी। नुदंती संशयं तस्य सर्वेषामपि शृण्वतां॥

तं वस्तु निश्चित्याजग्मुः॥८५॥ भुजंगः सर्पः अथादिषुः। कथितवंतः भोगीशस्य शेषस्य भोगः शरीरे शायनं यस्य सः
विष्णुरित्यर्थः॥८७॥ श्रुतं भूसुराणां वाक्यं येन यथोक्तं निहितादन्यस्यार्थस्य प्रतिपादकं येन तस्य भूपतेर्मुखं कासा
रस्तडागः पद्माकरस्तडागोऽस्त्री कासारः सरसी सरः इत्यमरः। तस्य शोषणेन म्लानस्य सारसस्य कमलस्य श्रि

यमाददे॥८८॥ अथानंतरमशरीरिणी दिव्या वाग् तस्य राज्ञः शृ
ण्वतां च सर्वेषां संशयं नाशयंती राजानं प्रोवाचेति॥८९॥

मि

हे महाराज ब्राह्मणा यदुक्तवंतस्तत्सत्यमेव तत्र तदुक्ते संशयं मा कुरु सत्यप्रतिश्रवः सत्यप्रतिज्ञो भव॥९०॥ मधुद्विषः विष्णोः सुराधिपः इं
द्रः॥९१॥ विन्यस्ता तद्घटस्थापिता दर्शीविषादिता रस्य मधुद्विषो दर्शनं तस्माद् हेतोर्निरस्ता अपगता अखिलाः संदेहा यस्मात्
सः॥९२॥ आसेतोः रामसेतुपर्यंतं तथा हिमालयपर्यंतं तद् वृद्धबालकं चाभिव्याप्य यो न हंत्यसौ सौगतान् हंतीति समयाहं तस्य इति
वचसा नन्वराग्रहः सत्यसवान्॥९३॥ ननु स्वगुरु कुलं न स्त्री कुलतया दिष्टानां वधाय किं स्वबाधानां कुतवानित्यत आह इत्थमपीति पित्रा

सत्यमेव महाराज ब्राह्मणा यदभाषिरे। मा कृथाः संशयं तत्र भव सत्यप्रतिश्रवः॥९०॥ श्रुत्वा नारीं गिरं सौवा
गीं दृष्ट्वा च सत्पथाधिपः। मूर्तिं मधुद्विषः कुंभे सुधामिव सुराधिपः॥९१॥ निरस्ताखिलसंदेहो विन्यस्तेतरदर्श
नात्। व्यधादाज्ञां ततो राजा वधाय श्रुतिविद्विषां॥९२॥ इत्थेऽपि दृष्टदोषश्च वध्य एव महात्मनां। जननीमपि
किं साक्षान्नावधीद् भृगुनंदनः॥९३॥ स्कंदानुसारि राजेन जैनाधर्मद्विषो हताः। योगींद्रेण वियोगज्ञा विश्वास्त

नियुक्ता भृगुनंदनः। परशुरामः साक्षाज्जननीमपि किं नावधीत् पितुर्हितवार्य एव अत्र पूर्वोक्तिबोद्धव्या ज्ञानरूपस्य विशेष
स्य पस्य समर्थनाय सामान्यमुपन्यस्य विशेषांतरोपन्यासाद् द्विकस्वरालंकारः। यस्मिन् विशेषसामान्यविशेषाः
स विकस्वरः इत्युक्तेः॥९४॥ पद्मपादानुसारि राजेन सुधन्वना धर्मद्विषो बौद्धा धनाग्निभिः ताः तत्वावित्ते बिना योगींद्रेण
योगभाशाकाविष्ठा व्याधिस्थानसंश्रयप्रमादालस्याविरतिभ्रांतिदर्शनालब्धभूमिकत्वानवस्थितत्वादयोऽतरायो
गतास्तोक्ता इत्यर्थः॥९५॥

तेषु दुष्टेषु बौद्धेषु हतेषु कोविदः पारिन्तो भट्टपादः श्रौतमार्गपरितस्तारः सर्वतः प्रसारितवान् यथा तमिस्रेषु अंधकारेषु नष्टेषु सूर्यो महस्तेजो विस्तारयति तद्वत् ॥९६॥ कुमारिलो भट्टपाद एव मृगेंद्रः सिंहस्तेन निष्प्रत्यूहं निर्विघ्नं ॥९७॥ उपोद्घातरूपां स्कंदावतारकथां उपसंहरन् शिवावतारकथां ग्रंथप्रतिपाद्यामुपक्षिपति प्रागित्थमिति ज्वलनादनलाद्भवतीति ज्वलनभूस्तेन सर्वज्ञेन भट्टपादेन पूर्वमनेन प्रकारेण अस्मिन् कर्ममार्गे प्रवर्तिते सति ततः संसारसागरे निम

हतेषु तेषु दुष्टेषु पारिस्तारकोविदः ॥ श्रौतवर्त्म तमिस्रेषु नष्टेष्वेव रविर्महः ॥९६॥ कुमारिलमृगेंद्रेण हतेषु जिनहस्तिषु ॥ निष्प्रत्यूहमवर्धंत श्रुतिशारवाः समंततः ॥९७॥ प्रागित्थं ज्वलनभुवा प्रवर्तिते स्मिन् कर्माध्वन्यखिलधिया कुमारिलेन ॥ उद्धर्तुं भुवनमिदं भवाब्धिमग्नं कारुण्यांबुधिरिति येषु चंद्रचूडः ॥
॥९८॥ ॥ इति श्रीमाधवीये तदुपोद्घातकथापरः संक्षेपशंकरजये सर्गोऽयं प्रथमोऽभवत् ॥ ॥१॥ संख्या
११८

ग्नं भुवनमिदं तत्रास्त्रलवेनोद्धर्तुं कारुण्यजलधिश्चंद्रशेखरो महादेव ईयेष इच्छति स्म प्रहर्षणी वृत्तं । त्र्यौ ग्लौ गस्त्रिदशयतिः प्रहर्षणीयामिति लक्षणात् ॥९८॥ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यबालगोपालतीर्थश्रीपादशिष्यदत्तवंशावतंसरामकुमारसूनुधनपतिसूरिकृते श्रीमच्छंकराचार्यविजयडिंडिमे प्रथमः सर्गः ॥१॥ ॥

श्रीगणेशाय नमः ॥ शंकरावतारं विस्तरेण वर्णयितुं पीठिकां रचयति । ततइति । ततः कर्ममार्गप्रवृत्त्यनंतरं करुणासमुद्रः अनंगं कामं दहतीत्यनंगधक् महेशः केरलेषु देशविशेषेषु श्रीमद्वृषसंज्ञके गिरौ पूर्णानदीपुण्यतटे ज्योतिर्लिंगात्मना आविरासीत् प्रादुरभूत् उपजातिः छंदः ॥१॥ तेन लिंगात्मना विर्भूतेन महेशेन प्रेरितः कश्चन राजशेखराख्यो महीपः पुनः पुनः स्वप्ने दृष्टस्तदीयो वैभवो येन स एकं प्रासादं देवालयं परिकल्प्य तस्य विभोः संपूजनं प्रवर्तितवान् स्वादिंद्रवज्रात

ततो महेशः किल केरलेषु श्रीमद्वृषाद्रौ करुणासमुद्रः ॥ पूर्णानदीपुण्यतटे स्वयंभूर्लिंगात्मनानंगधगाविरासीत् ॥१॥ तत्र्चोदितः कश्चन राजशेखरः स्वप्ने मुहुर्दृष्टतदीयवैभवः ॥ प्रासादमेकं परिकल्प्य सुप्रभं प्रावर्तयत्तस्य समर्हणं विभोः ॥२॥ तस्येश्वरस्य प्रणतार्तिहर्तुः प्रसाद तत्प्राप्त निरीतिभावः ॥ कश्चित्तदभ्यागतो ग्रहारः कालध्यामिरस्यो स्तिमहात्मनो तः ॥३॥ कश्चिद्द्विपश्चिद्दहिनिश्चलधी विरेजे विद्याधिराजइति विश्रुतनामधेयः ॥ रुद्रो वृषाद्रिनिलयो वतरीतुकामो यत्पुत्रमात्मपितरं समरोत्त्वयत्सः ४

तेजेरसंयुते ॥२॥ तस्य प्रणतार्तिहर्तुरीशस्य प्रसादात्प्राप्तो निरीतिभावो येन यस्क अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः शुकाः ॥ अत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः इत्युक्ताः षड्बाधा ईतयः एवंविधस्तस्य प्रासादस्य समीपगतः कश्चित्कालटिसंज्ञोऽतिरम्योऽग्रहारो ब्राह्मणप्रधानो ग्रामोऽस्ति ॥३॥ इहास्मिन्नग्रहारे विद्याधिराज इति श्रुतनामधेयो निश्चलमतिः कश्चित्पंडितो विरेजे सः वृषाद्रिनिलयोऽवतरीतुकामोऽवत

रुपाद्युर्यं स्मपुत्रमात्मपितरं समरोत्त्वयस्सः पितेजेत्तितान्वयः
उक्तं च सततिलकं तमस्त्राङ्गोगः ॥४॥

१३ तस्य विद्याधिराजस्य पुरा पूर्वमनेकजन्मस्वार्जितैः पुण्यैः सुष्ठु ब्रह्मतेजो यस्य स शिवगुरुसंज्ञः पुत्रो भवत् यो
ज्ञानेशिवायवचनेन गुरुर्बृहस्पतिस्तस्य पुत्रस्य स्ववर्णो विचक्षणो विद्याधिराजो ऽर्थनामार्थानुरूपं नामा कृतसंज्ञा
कृतवान् धीमान् सूरिः कृती कृष्टिर्लब्धवर्णो विचक्षण इत्यमरः स्यादिद्रूढ ज्ञाय इतो जगोग ॥ ५ ॥ एवं शिवगुरोः
जन्मोत्कालं चरितमाह । स शिवगुरुः ब्रह्मचारी गुरुगेहवासी सैलस्तस्य गुरोः कार्यकारी विहिताभिक्षयाल
ब्धं गुरवे निवेदितमन्नं भोक्तुं शीलमस्यास्तीति तथा कृतातर्कृतभुजं वह्निं सेवितं शीलमस्यास्तीति तथाऽव्रते

पुत्रोऽभवत्तस्य पुरात्तपुण्यैः सुब्रह्मतेजाः शिवगुर्वभिख्यः ॥ ज्ञाने शिवायोवचने गुरुस्तस्या
न्वर्थनामा कृतलब्धवर्णः ॥ ५ ॥ स ब्रह्मचारी गुरुगेहवासी तत्कार्यकारी विहितान्नभोजी ॥ सायं
प्रभातं च कृताग्निसेवी व्रतेन वेदं निजमध्यगीष्ट ॥ ६ ॥ क्रियाद्यनुष्ठानफलोऽर्थबोधः स नोपजायेत
विना विचारं ॥ अधीत्य वेदानथ तद्विचारं चकार दुर्बोधतरो हि वेदः ॥ ७ ॥ वेदेष्वधीतेषु विचारिते
ऽर्थे शिष्यानुरागी गुरुराह तं स्म ॥ अपाठि मत्तः सषडंग वेदो मचारि कालो बहुरप्यगात ॥ ८ ॥

न ब्रह्मचर्यनियमेन स्वीयं वेदमध्यगीष्टाधीतवान् ॥ ६ ॥ यतः क्रियाद्यनुष्ठानं फलं यस्य स अर्थबो
धो विचारं विना नैव जायते न त्वधीतस्याग स्वाध्यायस्तदर्थस्य यमेव कुतो नावबुद्ध्यानिति चेत्तत्राह हि य
स्माद्वेदो दुर्बोधतरो विचारं विना तिशयेन दुर्घटो यथार्थबोधो यस्य स उपेद्ध चक्रातनजास्त तोगो ॥ ७ ॥ वेदे
ष्वधीतेषु सत्सु तदर्थे च विचारिते सति शिष्यानुरागी आचार्यस्तं शिवगुरुमाह स्म प्राकवान् षडूभिः शिक्षाक

यद्यपि त्वं समर्थस्तथापि संप्रतीदानीं गेहं व्रज संबंधिजनोऽपि तव दर्शनलालसः स्यात् तस्मात्कदाचिद्गत्वा स्वजनप्रमोदं विधेहि शिष्यस्य
पुत्रतुल्यत्वात्संबोधनं हे तात मातापि तव यस्याः पितं च माकुरु आत्मानकी तोज गुरुगमो जेजतावनो जेजगुरु गुरुश्च ॥ ९ ॥ चिरं बोन
कृतं स्व उत्सकं तत्र हेतुमाह । यतः इहास्मिन्लोके परत्र च विधातुमिष्टं तदा सुरारेः क्षणभंगुरता विजानता पुरुषेण पूर्वं पूर्वाणि
एव विधेयमेव मिह यस्त्वं अनागते हि कर्तुमिष्टं तदद्य विधेयमिति विनिश्चितोऽर्थस्तस्मात्मा विलंबयस्वेत्यर्थः ॥ १० ॥ किंत्वय
था काल उद्भवकाल उत्पात्क्षेत्रे रोविनाद्भुजादिह यादृत्वां सस्यं जायते तादृशं विपरीतकालान्नैव जायते तथा विवाहादि स्व

भक्तोऽपि गेहं व्रज संप्रति त्वं जनोऽपि ते दर्शनलालसः स्यात् ॥ गत्वा कदाचित्स्वजनप्रमोदं विधेहि माता
तविलंबयस्व ॥ ९ ॥ विधातुमिष्टं यदिहापराह्ने विजानता तत्पुरुषेण पूर्वं ॥ विधेयमेवं यदिह स्वइष्टं कर्तुं त
दद्येति विनिश्चितोऽर्थः ॥ १० ॥ कालोप्तबीजादिह स्याद्दशः स्यात्सस्यं न तादृग्विपरीतकालात् ॥ तथा विवाहा
दि कृतं स्वकाले फलाय कल्पेत न वेद्दृथा तत् ॥ ११ ॥ आजन्मनोगणायतो ननु तानृगताब्दान्माता पिता प
रिणयं तव कर्तुकामौ ॥ पित्रोः स्वयं प्रकृतिरेव पुरोपनीतिं यध्याय तस्तानुभवस्य तत्तो विवाहं ॥ १२ ॥

विवाहादिकाले यौवनाद्यवस्थायां कृतं फलाय पुत्रोत्पत्त्यादि रूपाय कल्पेत न चाकंभवेदन्यथा न तद्विवाहादि कृतं व्यर्थं
स्यात् ॥ ११ ॥ किंचाजन्मनो जन्मप्रभृतिननु निश्चयेन तव परिणयं विवाहं कर्तुकामौ मातापितारौ गतान् संवत्सरान् गणय
तो गणनं कुरुतः यस्मात्कारणात्पित्रोः स्वयं प्रकृतिः स्वभाव एव पूर्वं तनुभवस्यात्मजस्योपनीतिमुपनयनं ततस्तदनंत
रं विवाहं समायतः करामभिविष्यतीति यिचिंतनं कुरुतः सदूर्थः अत्र सामान्यविशेषयोरुक्तत्वादर्थान्तरन्यासाल

१३

अपिच सत्कुलीनपितरस्तत्सत्कुलीनपुरुषस्य विवाहकर्मकामं स्पृहयंति परिणयकर्मगोचरां स्पृहामत्यंतं कुर्वंति यतस्तत्सत्कुलीनपितरः पिंडप्रदात्पु
२४ रुषस्य संततिं विसततिं वा पिंडाविलोपं स्फुटं समीक्षमाणाः ॥ वसंततिलकं ॥१३॥ न केवलमेतावदेवापितु सहोभोच्चरतां धर्ममित्याद्यद्वि
त्यासद्वितीयस्य कर्मविधाने धिकार श्रवणात्तदर्थमपि विवाहमवश्यं कुर्यादित्याह अर्थेति । एष विचारोऽर्थावबोधनफलोऽर्थस्यावबोधनं
परिज्ञानं फलं यस्य स एतस्य विचारस्यार्थपरिज्ञानं फलं तत्त्वार्थावबोधनं विचित्राणां यज्ञानां विधानार्थं अत्र विचित्रेषु यज्ञविधाने वि
वाहं कृत्वा सद्वितीयः द्वितीयया पत्न्या सहवर्तमानोऽधिकारं गच्छति प्राप्नोतीति वेदविदां प्रवादः ॥१४॥ एवमुक्तः द्विपुरुरूपाच्च सत्यमित्या
दिना स्वस्यमित्यर्धांगीकारे कृपुरोः गुरोः सकाशात् अधीतो वेदो येन स गृही एव भवति अन्यपदमन्याश्रमं न प्रयातीति नियमो नास्ति

सत्कुलीनपितरः स्पृहयंति कामं तत्सत्कुलीनपुरुषस्य विवाहकर्म । पिंडप्रदात्पुरुषस्य स संततिर्विपिंडाविलोपमु
परि स्फुटमीक्षमाणाः ॥१३॥ अर्थावबोधनफलो हि विचार एष तत्त्वापि चित्रबहुकर्मविधानहेतोः । तत्राधिकार
मधिगच्छति सद्वितीयः कृत्वा विवाहमिति वेदविदां प्रवादः ॥१४॥ सत्यं गुरोर्न नियमोऽस्ति गुरोरधीतवेदो गृही भव
ति नान्यपदं प्रयाति ॥ वैराग्यवान् व्रजति भिक्षुपदं विवेकी नो चेद्गृही भवति राजपदं नरेंद्र तत् ॥१५॥ श्रीशंकर

ननु ब्रह्मचर्यं समाप्य गृही भवेत् गृहाद्वनी भूत्वाथ प्रव्रजेदतएवं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसाना
शकेन सह चाऽऽत्माजायो वेदइदं मे नेनांग संक्रिय तद्धर्मैदं नांगमुपधीयते विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमानः जा
यमानो वै ब्राह्मणस्त्रिभिरृणैरृणवा जायते यज्ञेन देवेभ्यः प्रजया पितृभ्यः स्वाध्याय ऋषिभ्यः इत्यादि ब्राह्मीयं क्रियते तनुः यस्यैते ऽष्टा
चत्वारिंशत्संस्काराः ऋणानि त्रीणि अपाकृत्य मनो मोक्षे निवेशयेत् । ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः इत्याद्याः
स्मृतयः चाश्रमाद् आश्रमांतरं प्रवेशस्य यज्ञाद्यनुष्ठानात् चित्तशुद्धौ ज्ञानप्राप्तिश्च क्रमेण नियमं बोधयंतीति चेत् तत्राह ॥
वैराग्यवानिहामुत्रार्थभोगेषु विरक्तो विवेकी नित्यानित्यवस्तुविवेकवान् उपलक्षणमेतत् साधनचतुष्टयसंपन्नः इत्यर्थः अतु २४

तुर्थाश्रमं गच्छति । अयमर्थः । यदि चेतरथा ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वा पूर्वजन्मनि यज्ञरूपादिकर्मणा न प्रजयाधनेन त्यागेनैके
अमृतत्वमानशुरित्यादि श्रुत्यनुरोधेन मध्यमाधिकारिणा एव क्रमनियमानुष्ठानं सत्त्वस्योत्कृष्टवैराग्यवतो मुख्याधिकारिणो जा
यमान इत्यस्यापि गृहस्थः संपाद्यमानं दुःखमित्यर्थः । गृहस्थस्यापि सत्त्वशुद्ध्यर्थमेव ऋणापाकरणं तदित्युक्तं नो चेद्वितीये
काद्विमान्न भवति चेत्तर्हि गृही भवतीति तद्वत् राजपदं राजमार्गः ॥१५॥ तथा तर्हि किं कर्तव्यमित्यपेक्षायामाह । श्रीनैष्ठिकाश्रमं
मरणांतब्रह्मचर्यं परिगृह्य चिरायुरहं तव पार्श्वगतः समीपे स्थितो दंडाजिनेत्यस्तदुक्ति दंडाजिनी क्षिनयेनं सहवर्तते दृ ति
स्थिनयो हि बुधसर्वज्ञ अग्नौ जुहुवे मं कुर्यन्वेदं पठन् पठितस्य विस्मृतेर्हानिमभावमिच्छन्वयसामिवासं कशिष्याम्यहं

श्रीनैष्ठिकाश्रममहं परिगृह्य यावज्जीवं वसामि तव पार्श्वगतश्चिरायुः ॥ दंडाजिनी सविनयो बुधजिद्वदग्नौ वेदं पठ
न्पठितविस्मृतिहानिमिच्छन् ॥१६॥ दारग्रहो भवति तावदयं सुखाय यावत्स तोऽनुभवगोचरतां गतः स्यात् । प
श्चाद्धनेन विरसतामुपयाति सोऽयं किं निकृष्टमनुभूतिपदं महात्मन् ॥१७॥
वर्तमानसमीपे वर्तमानवद्वेति लट् ॥१६॥ नन्व
ति सुखकरं दारग्रहं विहाय कथमति दुःखदं नैष्ठिकाश्रमं अंगीकुरुषे इति चेत्तत्राह । दारग्रह इति अयं दारग्रहस्तावत्सुखाय भव
ति यावत् स तोऽनुभवगोचरतां गतः प्राप्तः स्यात् अनुभवविषयतां प्राप्तिपर्यंतमित्यर्थः । पश्चादनुभवगोचरतां प्रा
प्यानंतरं सोऽयं दारग्रहो विरसतां वैरस्यमुपयाति प्राप्नोति हे महात्मन् अक्षुद्रस्वभाव अनुभूतिपदमनुभवगम्यं किं
निकृष्टमल्पमसि अपलाप्य तु मन्यामहे इत्यर्थः ॥१७॥ नन्वैहिकसुखाभावे विविधा हि कृते यागाद्यनुष्ठानेन पारलौकि
कं तत्सुखमस्तीति चेत्तत्राह । यागो पीति यागा विधिना यथाविधि कृतश्च स्वर्गफलदानं च तथा कर्तुमशक्यतत्साहस्रा
यस्तत्सम्यक्करणं बुद्धिदुर्लभं तद्विनानुकूलं न लभ्यते हि यस्मात्काम्यादियागयागफलमेतत्सर्वथा हि तत्कर्मणि फलं यदि न स्यात्

हि दैववशाद्यथोक्तचिरेहफलदुर्गतत्वं भवती त्यर्थः॥ तथा च नपारकोकिफस्करखमाप्नोतिगआदिपदेन चित्राद्दियागफलं पश्चादिकं गृ
१५ ह्यते॥ १८ नेकवलं स्वखाभावत्वाद्यपितु दुःखमपीत्याशयवानाह॥ यद्दिगृही निस्वो निर्धनो भवत्तर्हि नूनं निश्चयेन सनिरयी
नरकयातनिरयित्वमेवस्फोरयति यो गृहमपि भोक्तुं दातुं च न क्षमते समर्थो न भवति सनूनं निरयी ति संबंधः ननु श्रीमत्कुलो
त्पन्नस्य तपनाऽस्ति दुःखमिति चेत्तत्राह॥ पूर्णापि समृद्धिर्पूर्णा तामपि भंतुमशक्नुवन्यो मोहेनाविवेकेन तस्मिन्नत स्मिन्विषयेरां
सुखं नमनुते सोपि नूनं निरयीत्यर्थः॥ विषयसंपत्तेस्तृष्णानिवर्तकत्वात्सर्वानर्थबीजभूततृष्णानुवृद्धेस्तेतस्सः सुखा

यागोपि नाकफलदो विधिना न कृतश्चेत्सायः समग्रकरणं भुवि दुर्लभं तत्॥ तृष्ण्यादि यन्नहि फलं यदिह कर्मणि
स्यादिष्टा यथा कृपिरिहफलदुर्विधत्वे॥ १८॥ निस्वो भवेद्यदि गृही निरयी स नूनं भोक्तुं न दातु मपि यः क्ष
मते पुमान्॥ पूर्णापि संपत्तिमपि भंतुमशक्नुवन्यो मोहेन नो नमनुते सलु तन्नते नृ॥ १९॥ यावत्स्कसत्स्क
परिष्कृतिरथो अमीषां साधो गृहोपकरणेषु सहान्विचारः। एकत्र संहतयतः स्थितपूर्वनाशात्तत्रापयाति पुनरप्य

त्रापि दुःखावाप्तिसत्वान्निरयित्वमेवेति भावः तथा चोक्तं। न जातु कामः कामानामुपभोगेन शाम्यति। हविषा कृष्णवर्त्मेव भूय ए
वाभिवर्द्धते इति। याभ्येतानि दुरं तानि दुर्जराण्युन्नतान्यपि। तृष्णावत्स्याः फलानीह तानि दुःखानि राध्ययावतीयावती जग
तोरिद्धो रुद्दिर्यथा यथा तावतीतावती दुःखबीजमुष्टिप्ररोहतीति च॥ १९॥ अतोनतःकारणान्तहेसाधो गृहोपकरणेषु
सहान्विचारो वर्तति यावत्स्कसत्स्क अमीषां संबंधिजनानां परिष्कृतिः परिपूर्णतास्यादमीषां गृहस्थानामिवानथा
चैवविचार्यमाणस्य प्रयत्नेन कस्मिंश्चिदस्थाने संहतवंतः संचयं कृतवतः स्थितपूर्वनाशाएतत्संचयात्पूर्वं स्थितस्यसं
चितस्य नाशो भवति च पुनस्तदपि पश्चात्संचितमप्यपयाति नस्यति पुनरथ परेण योगः संयोगो भवेति तथा च गृह १५

एवमुक्तप्रकारेणाशिवगुरौ वदति सति तस्याशिवगुरोर्जनकः पिता गृहे स्थः सुतं गृहं प्रति निनीषुर्नेतुमिच्छु रागच्छत आगतवान्
आगत्य यदकरोत्तदाह। चरुधं बरुधानुनयं विनयं कृत्वा तेन शिवगुरुणा गुरवे बकुलं दक्षिणाद्रव्यं प्रदाप्य गृहीतविद्याय न साशि
वगुरुर्यत्नात्निकेतनमनायि आनीत इत्यर्थः॥ २१॥ असौ शिवगुरुर्निकेतनं गत्वा मातरं स्वं ददर्श जननी पुत्रमाश्लिष्य तस्य
पुत्रस्य चिरकालज्जातं पुत्रतापमोज्झतं स्पर्शवतीत्यत्र हेतुमाह यत्पुत्रगात्रालिंगनेन नाम धयं तत्र्यद नरसादपि प्रायेण शी
तलमतरूप्यर्थः॥ अत्रार्थांतरन्यासः यद्वा परितापत्यागस्तस्य प्रायेणेत्यादिना समर्थनात्काव्यलिंगालंकारः समर्थ
नीयस्यार्थस्य काव्यलिंगसमर्थनमिस्कके॥ २२॥ अथानंतरं गुरोर्गृहाच्चिरादागतं तं शिवगुरुं कृत्वा तद्बंधुस्तत्संबंधिवर्गः

एवं गुरौ वदति तज्जनको निनीषुरागच्छत्तत्र तनयं स्वगृहं गृहेस्थः॥ तं वानुनीय बकुलं गुरये स दत्त्वा
श्निकेतनमनायि गृहीतविद्यः॥ २१॥ गत्वा निकेतनमसौ जननीं ववंदे सालिंग्य तं दृहरज्जं परितापमोज्झत्॥
प्रायेण चंदनरसादपि शीतलं तं यत्पुत्रगात्रपरिरंभण नामधेयं॥ २२॥ कृत्वा गुरोः सदनतश्चिरमागतं तं
तद्बंधुरागमदथ त्वरितेक्षणाय। प्रस्फुरन्मादपि रसाचपि बंधुतायाः संभावनां व्यधित चित्तकुलानुरूपां॥ २३॥
वेदपदक्रमजटादिषु तस्य बुद्धिं संवीक्ष्य तज्जनयिता वसुधराया विधा

शीघ्रमवलोकनाय अगमत्॥ असौ शिवगुरुरपि बंधुतायाः बंधुसमूहस्य प्रत्युद्गमप्रणामादिना चित्तकुलानुरूपां
संभावनां सपर्यां व्यधित व्याहितवान् धातोर्लुङ् तङ्। साध्वोरित्ये तीकारः सिचः कित्वाद्गुणाभावः ह्रस्वादंगादिति स
कारलोपः॥ २३॥ तत्तायकृतं तदाह वेदपदादिषु आदिपदेन मालाशिखादिषु तस्य बुद्धिं वीक्ष्य तस्य जनकः बहून्
प्रत्नान् कृतवान् संगताय धाधिराजत्तिस्तपं वान्यं यस्य तद्विधाधिराजश्च प्रथितं नाम यस्यास्य वसुधरायाम् भवन्स व
कुशोप्यपक्षादित्यर्थः॥ २४

चकार [illegible] स्वमेवहितमाचष्ट॥ २०॥ [illegible] यावत्स्कसत्स्क [illegible] १५

[illegible] भवनमस्य॥ २४॥

१६

कुत्रोप्यस्य धृति विर्णोति। भाट्टनये भट्टपादसिद्धांतगुरुः प्रभाकरः कणभुक् कणाद आदिनागौतमसांख्यमता दि
संप्रेयग्रहस्तनयस्य मतिं बाहु भिक्षुः प्रश्नं कृतवान् एवं पित्रोदितः एषः शिष्यस्तस्य पुत्रः शिवगुरुरपि समाधानमुवाचतं
पिशिनः स्वपूर्वं नतो नमस्कृतो गुरुर्यं नास्मितेन मंदहसितेन युक्तं मुखं यस्य तत एव हसितमीषद्विकसितं यदंबुजं तथाभूतमा
स्यं यद्दनयस्य सः ॥ २५ ॥ प्रश्नोत्तरे स्वमतस्थापने परमतखंडने च तां तथा भूतां निपुणतां कुशललतां दृष्ट्वा स्यतं तोषं प्राप
आपुत्रस्य वाक्यात्। स्वतः शास्त्रतो विहीनापि सुखरूपा सा शास्त्रतः सुखरूपेति किमु वक्तव्यं के मुख्ये नार्थसंसिद्धिः

भाट्टनये गुरुमते कणभुङ्मतादौ प्रश्नं चकार तनयस्य मतिं बुभुत्सुः। शिष्योप्युवाच नतपूर्वगुरुः समाधिं पि
त्रोदितः स्मितमुखो हसितांबुजास्यः ॥ २५ ॥ वैदेश्वरा स्वेन च सिरिक्ष्य बुद्धिं प्रश्नोत्तरावेदोपि नैपुणीं तां ॥ हृ
ष्टात्तु तोषातितरां पितास्य स्वतः सुखायाः किमु शास्त्रतो वाक् ॥ २६ ॥ कन्याप्रदातुमनसो बहवोपि विप्रि
२७ प्रास्तन्मंदिरं प्रतियुर्गुणपात्रकृष्टाः। पूर्वं विवाहसमयादपि तस्य गेहे संबंध एव किल बभूव वरीतुकामैः
वकर्थदायिषु बकुध पिसल्कदे रेकन्याप्रदातृषु परीक्ष्य विशिष्ट जन्मा कन्यामयाचत सुताय स विप्रवर्यो विप्र

काव्यार्थापत्तिरिष्यते ॥ २७ ॥ ततः किं वृत्तमित्याकांक्षायामाह। कन्यामिति। कगुणलक्षणपाशेनाकृष्टाः कन्याप्रदातुः
मनसो बहवोपि विप्रास्तस्य मंदिरं प्रतिययुर्जग्मुरतो विवाहकालात्पूर्वं अपि तस्य विद्याधिराजस्य शिवगुरोर्वा गृहे
वरीतुकामैः कुमारवरणार्थिभिर्विप्रैः संबंध एव बभूव संतत। एवं तस्मिन्नुद्दरे बरथ्थ दायिषु कन्याप्रदातृषु बकुधपि सत्सु
विशिष्टं श्रेष्ठं जन्म परीक्ष्य प्ररख्यातानुभावः स विप्रवर्यो विद्याधिराजो यं प्रतिविशिष्टकुलोत्पन्नं मघपंडिताभिधं कन्याअया
चतअर्थ तंचेति कर्म संपूरउ कनामको

प्ररख्याताबद्धीयिभूतिर्ययोस्तयोः कुलवृत्ता कन्यापितुर्वरपितुश्च संविवाद असीत्तत्र कन्यापितुर्वचनमुदाहरति अस्मद्गृह आगत्य
पुत्रस्य विवाहस्तया कार्यो वरपितुर्वचनमाह अस्मदीयं सत्पुत्री मानीयमसुताय सुता प्रदेया ॥ २९ ॥ एवमुक्तो मघपंडितः अहेतावद्
नं दास्यामीति संकल्पिता द्विगुणमर्थं धनं प्रदास्ये यदि गृहमागत्यायं विवाहः कृतश्चेत्तद्विद्याधिराज आह हे द्विज यदि कन्यकाम
स्मद्गृहमागता तर्हि अर्थं विनैव पुत्रेण परिणयं कारयिष्ये ॥ ३० ॥ एवं विवदमानयोस्तयोर्मध्ये तस्याः कन्यकायाः पितरं समाहूय

विद्याधिराजमघपंडितनामधेयो स्तत्र स्वयं व्रतनुतामपि शृण्वदेव ॥ प्रत्यग्मुहूर्तं नवलग्नविचारणेयामो हूर्तिकाकृति
परस्परमूचिवांसो ॥ २८ ॥ उद्वाहशास्त्रविधिनाविहिते मुहूर्ते तौ संमदं बेकुमवापतुरात्तकामौ ॥ कन्यापितुर्वर
पितुश्च विवाद आसीदिसंतयोः कुलजुषोः प्रथितोरुभूस्योः। कार्यस्त्वयापरिणयोर्गृहमेत्य पुत्रो मानीय स
त्प्रतनयाय सुता प्रदेया ॥ २९ ॥ संकल्पिताद्विगुणमर्थमहं प्रदास्ये मद्गृहमेत्य परिणीतिरियं कृता चेत्। अर्थं विना
परिणयं द्विज कारयिष्ये पुत्रेण मगृहगता यदि कन्यका स्यात् ॥ ३१ ॥ कश्चित्तु तस्याः पितरं बभाण मिथः
समाहूय विशेषवादी। अस्मात्सुगेहं गतवत्सु मुष्मै विप्राय कन्याम परः प्रदद्यात् । ३२ ॥ तेनानुनीतो वरतो
तभाषितं द्विजो नुमेने वरस्त्रूपमाहितः। दृष्टा गुणः संवरणाय कल्पते मंत्राभिजापाच्चिरकालभावितः ॥ ३३ ॥

कश्चित्तु विशेषवादी जगाद अस्मात्सुगेहं गतवत्सु अपरो मिथः परस्परं वरद्वय विग्रहं भेदं विधाय अमुष्मै कन्यां प्रदद्यात् ॥
संभावनायां लिङ्। मिथो रहसि समाहूय इति वा आ० ३२ ॥ तेन विशेषवादिना केनचिदनुनीतो अनुनयप्रापितो मघपंडितः
पुत्री मानीय सत्प्रतनयाय सुता प्रदेयेत्येवं वरपितुर्भाषितमनुमेने स्वीकृतवान् यतो वरस्य रूपेणाहितः यस्मात् दृ
ष्टागुणः संवरणाय कल्पते योग्यो भवति यथा अभिजापाच्चिरकालभावितो बहुकालेन भ्यस्तो मंत्रः संवरणाय कल्पते तद्वत्
सर्वकलुषापमावशास्य द्वयरामिश्रितत्वादुपजातिस्तत्रुक्तं र्थं केलान्यासमिमिश्रिता सुस्मरति जातिष्विदमेवनाम

१६

१७ विद्याधिराजमद्यपंडितसंज्ञोसम्यक् मुहूर्त्तमवलंब्य दैवगणपत्यादि कुलदेवं च सम्यक् अभिपूज्य वाक्यदानरूपं संप्रत्ययं व्यतनु
तां विस्तारितवंतो ततश्च विवाहार्थं मौहूर्तिकाः ज्योतिर्विदो विचारणीया इति परस्पर मुक्तवंतो वसंत०३३ तथैव तौ विहिते मुहूर्ते
शास्त्र विधिना तौ विद्याधिराज मद्य पंडितौ उद्वाह्य विवाहं कृत्वा बहु विपुलं समदं प्रमोदम् अवापतुः यतः प्राप्ताभिलाषौ तत्
आगतो बंधुवर्गश्चास्यंतमोदं प्राप्तवान् किं बहुना कथितेन सर्वोपि बंधुबंधुसमुदायो मुदं प्रापेत्यर्थः॥३४॥ तौ सती शिव

> विद्याधिराजमद्यपंडितनामधेयौ संप्रत्ययं व्यतनुताम् अभिपूज्य देवं॥ सम्यक् मुहूर्त्तम् अवलंब्य विचारणीया
> मौहूर्तिका इति परस्परमूचतुर्मासो॥३३॥ उद्वाह्य शास्त्रविधिना विहिते मुहूर्ते तौ सं मदं बहुम् अवापतुः आप्तकामौ॥
> तत्रागतो भृशम् अमोदत बंधुवर्गः किं भाषितेन बहुना मुदम् आप वर्गः॥३४॥ तौ दंपती सुवसनौ शुभदंतपंक्ती संभूषितौ
> विकसिताबुजरम्यवक्त्रौ॥ सश्रीडहाससुखवीक्षणसंप्रहृष्टौ दंपती अवापतुर् अनुत्तम शर्म नित्यं॥३५॥ अग्नीन् अथा
> धित महोत्तर यागजातं कर्तुं विशेषकुशलैः सहितौ द्विजेन्द्रैः॥ ततस्फलं हि यद् अनाहित हव्यवाहः स्याद् उत्तरेषु विहिते

गुरुसंज्ञौ दंपती सुवस्त्रौ शुभा दंतपंक्तिर्ययोस्तौ सुष्ठु अलंकृतौ विकसितकमलवद् रम्यं मुखं ययोस्तौ श्रीडया लज्जया सह वर्त
माने न हासेन मंदहसितेन युक्तया सुखया वीक्षणेन सम्यक् प्रकर्षेण हृष्टौ तौ दंपती पार्वती महादेवाविवानुत्तमं सुखम् अवापतुः १८
॥३५॥ अथ विवाहानंतरं तत्तद्यागकर्तव्यता विशेषकुशलैर् ऋत्विग्भिः सहितौ द्विजेन्द्रैः शिवगुरुस्तत्फलम् अहत्वानु
त्तरेषां अयस्थ्याधानात् उद्धानाम् इस्तमानां वा यागानां समूहं कर्तुं अग्नीन् गार्हपत्याहवनीयदक्षिणाख्यान् अधि
तअग्न्याधानं कृतवान् हि प्रसिद्धं यद्यस्मादनाहिताग्निः पुमान् विहितेषु अपि उत्तरेषु यागेषु अधिकारो नस्यात्तस्मादित्यर्थः॥३६॥

भुवनानि स्वर्गादीनि जिज्ञुकामो बहुवित्तसाध्यैर् अनेकैर् यागैर् अयष्ट यजनं कृतवान् तेषां यागानां आख्यायेषां तैर्यतो दिने दिने सेवितायज्ञभागायैस्तै दैवै
रमतं व्यस्मारि विस्मृतं अत्रामृतसंबंधि स्मरणसंबंध पितृसंबंधवर्णनात्संबंधातिशयोक्तिरलंकारः योगेप्ययोगः संबंधातिशयो
क्तिरितीर्यत इत्युक्तेः आ०॥३७॥ पितृदेवमानुषान् अभिवांछितैः सह तत्तत्पदार्थैः संतर्पयन् तैर् विशिष्टं विद्यादिलक्षणं वित्तं येषां तैर्दे
वतास्थानीयैः सुमनोभिर् विद्वद्भिरर्चितं पूजितं यद्वा विशिष्टानि चतानि वित्तानि तैरेव सुमनोभिः पुष्पैरर्चितं व्याप्तं शिवगुरुं जंगमकल्प

> यागैरनेकैर् बहुवित्तसाध्यैर् विजेतुकामो भुवनान्ययष्ट॥ व्यस्मारि दैवैरमृतं तदा यैर् दिने दिने सेवितयज्ञभागैः॥३७॥ संत
> र्पयंतं पितृदेवमानुषांस्तत्तत्पदार्थैर् अभिवांछितैः सह॥ विशिष्टवित्तैः सुमनोभिरर्चितं तमेनिरे जंगमकल्पपादपं॥३८
> परोपकारव्रतिनो दिने दिने व्रतेन वेदं पठतो महात्मनः॥ श्रुतिस्मृतिप्रोदित कर्म कुर्वतः समाव्यतीयुर्दिनमाससम्मि
> ताः॥३९॥ रूपेषु मारः क्षमया वसुंधरा विद्यासु वृद्धो धनिनां पुरःसरः॥ गर्वानभिज्ञो विनयी सदानतः सनोपलेभेत
> नयान नं जरन्॥४०॥

दृश्यं जनाभेनि रेस्वर्गस्थः कल्पपादपः स्थावर इति ततोस्य व्यतिरेकाभिधानाद्व्यतिरेकालंकृतिः व्यतिरेको विशेषश्चेदुपमानो
पमेययोः इत्युक्तत्वात् उ०॥३८॥ दिनमासपरिमिताः समाः संवत्सराः व्यतीयुः व्यतिक्रांताजतो नुचं शास्य मुदीरितं जरो॥
॥३९॥ मारः कामः वसुंधरा भूमिः विद्यासु वृद्धः सर्वोत्तमः धनिनां पुरः सरोऽग्रगण्यः एवंभूतोपि गर्वानभिज्ञो गर्वरहितः य
तो विनयी विनयवान् यतः सदानतो नम्रः एवंविधः शिवगुरुर्जरन् जरां गच्छन् पुत्रस्य मुखं नोपलेभे न प्राप अत्र विष
यभेदेन बहुधोल्लेखनादुल्लेखालंकारः एकेन बहुधोल्लेखोप्यसौ विषयभेदत इत्युक्तेः उ०॥४०॥ चित्रपदमाश्चर्यास्पद

निकेतनं गृहं बहुगुणैरयं संपन्न इति संभावनाया एते बहवोऽपि मोहहेतवः पुत्रहीनं शिवगुरुं नाम सुतरु न्यस्य स्मिन्नाससेव्यापादने नमोहितं न कृतवंतः॥ ४१॥ अस्यां मृतो मम संततिरजाता चेदु परिशादग्रेऽरस्य अवश्यं भविष्यतीति तस्यामप्यजाता चेत्तत उत्तरस्यां हेमं तकृतौ भविष्यतीत्येवं मनोरथैर्व्याप्तांतःकरणः कालं निनाय नीतवान् ॥ ४२॥ खिंदन् खेदयुक्तमनो यस्य कृतःकार्यस्य शेषो येन स शिवगुरुर्भार्यामिदमचष्टोक्तवान् हे सुभगे ऽतःपरं किं कर्तव्यं नौ अवयोरंगेनेंद्रियसामर्थ्यं न सहितं वयोऽर्द्धमगम

गावो हिरण्यं बहुसस्यमालिनी वसुंधरा चित्रपदं निकेतनं॥ संभावनाबंधुजनैश्च संगमो न पुत्रहीनं बहयो
प्यमूमुहन्॥ ४१॥ अस्यामजाता मम संततिश्चेच्छुरश्चयरथं भयतो परिष्टात्॥ तत्राप्यजाता तत उत्तरस्यामे
मेवं स कालं मनसा निनाय॥ ४२॥ खिंदन्मनाः शिवगुरुः कृतकार्यशेषो जायामवष्ट सुभगे किमतः परं नौ॥ सां
गं वयोऽर्द्धमगमत्कुलजेन दृष्टं पुत्राननं यदिह लोकमुदाहरंति॥ ४३॥ एवं प्रिये गतवतोः सुतदृष्यनोश्चेत्पंचत्वमे
ष्यदथ नोऽशुभमापतिष्येत्॥ अस्यास्तुपायमनिशं भुवि वीक्ष्यमाणो नेक्षे ततः पितृजनिर्विफला ममाभूत्॥ ४४॥
भद्रे सुतेन रहितौ भुवि के वदंति नो पुत्रपौत्रसरणिक्रमतः प्रसिद्धिः॥ लोके न पुष्पफलशून्यमुदाहरंति वृक्षं प्रवालस [illegible]

नमुखहे कुलजे पुत्राननं न दृष्टं यत्पुत्रमुखमिहलोक्यमिहलोके हितमुदाहरंति पुत्रेणायं लोकइति श्रुतेः॥ वसंत०॥ ४३॥ हे प्रिये एवं सुत दर्शनकामयोः गतवतोः क्षीणवयसोरपि सुतं दृष्टवतोः पंचत्वं मरणं सेष्यच्चेदथ नो अवयोः अशुभमापतिष्येदागमिष्यं दस्य पुत्रदर्श नस्यास्तुपायमनिशं भुवि वीक्षमाणो नेक्षे न पश्यामि ततस्तस्मान्मम पितृतो जनिर्जन्म निष्फलाऽभूत्॥ ४४॥ किंच हे भद्रे सुतेन रहितौ नावावां भुवि केवदंति के पि न वदंतीत्यर्थः॥ यतः पुत्रपौत्रसरणिक्रमतः लोके प्रसिद्धिर्भवति यथा बालानां पल्लवानां समय

४ एवंभूतादन्यस्याभावात् शिवोपास्तितः सकलार्थसिद्धिर्भवतीत्यत्र प्रमाणाकांक्षायामाह तत्रोपमन्योर्महिमा प्राहात्स्यं परमं प्रमाणं ४

फलितं वृक्षं विहाय पुष्पफलशून्यं वृक्षं केपि नोदाहरंति तद्वदित्यर्थः॥ ४५॥ इत्येवं भर्त्रा ईरिते कथिते सति तदीया भार्या सती प्राह जं गमरूपाणि वाक्यानि कल्पवृक्षमाश्रयावस्तस्य सेवनात् हे सुनाथ ईशो महेश्वर संबंधि स्थिरं फलं नौ अवयोर्भविता भविष्यतीति ३०॥ ४६॥ इतोऽस्मात्कारणात् भक्तेप्सितार्थपरिकल्पने कल्पवृक्षं देवं के सुखं शिवमितियावत् सकलार्थसिध्यै भजावः यद्वा इतोऽस्मात् दैवादन्यं कमपि भूतं देवं भजावः एवं हि महाभारते श्रूयते उपमन्युः किल पयः पिबतो मुनिबालकानवलोक्य स्वाग्रहेण मातरं दुग्धं या

इतीरितं प्राह तदीयभार्या शिवाख्यकल्पद्रुममाश्रयावः॥ तत्सेवनान्नौ भविता सुनाथ फलं स्थिरं जंगमरूपमे
शं॥ ४६॥ भक्तेप्सितार्थपरिकल्पनकल्पवृक्षं देवं भजाव कमितः सकलार्थसिध्यै॥ तत्रोपमन्युमहिमा परमं प्रमाणं नो
दैवतासु जड़िमा जड़िमा मनुष्ये॥ ४७॥ इत्थं कलत्रोक्तिमनुत्तमां सः श्रुत्वा सुतार्थी प्रणतेकयष्टयं॥ इयेष संतोषयि
तुं तपोभिः सोमार्धभूषं निजभार्ययामीशं॥ ४८॥

चितवान् तन्माता च दरिद्र्यवशेन दुग्धाभावात् पिष्टेन तद्दुग्धाया
यच्छत् स च तदेव पीत्वा दुग्धं मया पीतमिति मन्यमानो ननर्त तदेतत्सर्वं ज्ञात्वा कुमारा जहसुस्ततो हास्यकारणं पृष्टेऽस्मै
माता दारिद्र्यमावेदयत्तज्ज्ञात्वा महेश्वरमाराध्य क्षीराब्ध्याधिपतित्वं प्रापेति। पाषाणाद्यात्मतया जड़ाभ्यो दैवताभ्यः कथं
ऽखिलार्थसिद्धिरित्याशंक्याह। न हि दैवतासु जड़िमा जाड्यं किंतु श्रद्धाभक्तिहीने देवतास्वरूपानभिज्ञे मनुष्ये सत्यर्थः॥
॥ ४७॥ एवं प्रकारामनुत्तमां भार्योक्तिं श्रुत्वा सः पुत्रार्थी सोमस्य चंद्रस्य अर्धेनोपलक्षितो मूर्धा यस्य तं प्रणतेकयष्टय
सुमार्धसुमासहायमीशं तपोभिः संतोषयितुमियेषइच्छतिस्म ३०॥ ४८॥ ॥ तस्योपधाम धाम्नः प्रासादस्य स
मीपात् स्थिता पंगाजलवहा एका नदी तस्याः जलेस्नात्वा स शिवगुरुः पूर्वकं तिथ्येचित् दिनान्यवकं दाशनः सन्

सदाशिवमुपास्त पश्चात्स शिवचरणाद्वंद्वकमलभृंगः सनु शिवपादाब्जमकरंदातिरिक्तं केदाद्यास्वादनवर्जितः सन्नुपास्तेस्म
र्थः वसंत॰॥४९॥ तस्य भर्तुर्जाया विधिमलाढ्यस्य क्षेत्रे वसंतमजं स्वयमेवाविर्भूतं ननु केनचित्स्थापितं शिवमर्चयंतिनिय
मकृतेरुपतापे भियमाल्पके रूपतापे रिति या नियमे श्रोपतापे श्रुति वाकायं देहं चित्कूराद्यस्येवं प्रकारेण तपतोस्तपः

तस्योपधामकिलसंनिहितापयेकास्नात्वासदाशिवमुपास्तजलेसततस्याः॥ कंदाशनः कति
चिद्दयदिनानिपूर्वं पश्चात्सदाशिवपादयुगाब्जभृंगः॥४९॥ जायापितस्य विमलानियमो
पतापेश्चित्कूराकायमनिशंशिवमर्चयंती॥ क्षेत्रेवृषस्यनिवसंतमजंसभर्तुः कालोत्यगाद्
तितयोस्तपतोरनेकः॥५०॥ देवः कृपापरवशोद्विजवेषधारीप्रत्यक्षतां शिवगुरुं गतआत्त
निद्रं॥ प्रोवाचभोः किमभिवाञ्छसि किं तपस्ते पुत्रार्थितेति वचनं सजगाद विप्रः॥५१॥ ॥ १८

कुर्वतोः तयोर्दंपत्योः सप्रसिद्धः कालः अनेकोत्यगात्॥५०॥ कृपापरवशो देवो महादेवो द्विजवेषधारी प्रत्यक्षतां
प्राप्तः प्राप्तनिद्रं शिवगुरुं प्रोवाच भोः शिवगुरो किमभिवाञ्छसि किमपि नेत्याशंक्याह किं तपस्ते निष्कामस्य त
व तपः किं ना किमपि तथा च तपसि प्रवृत्तस्य ते कामना ऽस्तीत्यनुमीयत एवमुक्तः स विप्रः शिवगुरुः पुत्रार्थिता
सुतस्य प्रार्थनेति जगाद॥५१॥ २॥ १॥ २

अथ देवोपि तं शिवगुरुमपृच्छत् हे द्विजमदुक्तं सत्यं विद्धि जानीहि पाठांतरे तन्मदुक्तं सर्वज्ञं सर्वगुणोपपन्नमल्पायुषमेकमेव सु
तं ददामि किं वा विपरीतकान्विपरीतान् सर्वज्ञानल्पगुणान् भूर्यायुषो बहून् सुतांस्ते तुभ्यं ददानि एवमुक्तो द्विजेशः शिवगुरु
रवदत्॥५२॥ प्रत्युवाच तदुदाहरति बहुगुणः प्रथितानुभावः सर्वज्ञतायाः आश्रयः पुत्रो मेस्तु इत्युक्तो देवः उवाच ईदृशेति तानि
मुक्तानां गुणानां पदं अयं पुत्रं दद्यां ददास्यामि तस्मात्तपो मा कुरु पुत्रो सत्या पूर्णो भविष्यसी सतो दारे भार्यया सह द्वि

देवोप्यपृच्छदथतां द्विजविद्धिसत्यं सर्वज्ञमेकमपि सर्वगुणोपपन्नं॥ पुत्रं ददाम्यथ बहून् विपरीतकांस्ते भूर्यायुषस्त
नुगुणानवदद्द्विजेशः॥५२॥ पुत्रोस्तु मे बहुगुणः प्रथितानुभावः सर्वज्ञतापदमितीरित आबभाषे॥ दद्यां सुदी
रितपदं तनयं तपो मा पूर्णो भविष्यसि गृहं द्विज गच्छ दारैः॥५३॥ आकर्णयन्निति बुबोध स विप्रवर्यस्तं
चाब्रवीन्निजकलत्रमानंदितात्मा स्वप्नं शशांसवनिता मणिरस्य भार्या सत्यं भविष्यति तनोतनयो महात्मा
॥५४॥ तौ दंपती शिवपरौ नियतौ स्मरंतौ संप्रेक्षितं गृहगतौ बहुदक्षिणान्नैः॥ संतर्प्य विप्रनिकरं तदुदीरिता
भिराशीर्भिराप तुरनल्प मुदं विशुद्धौ॥५५॥ तस्मिन्दिने शिवगुरोरुपभोक्ष्यमाणे भक्ते प्रविष्टमभवत्कि
लरौद्रतेजः॥ भुक्तान्नविप्रवचनादुपभुक्तशेषं सा भुक्तवत्यपि निजभर्तृपदाब्जभृंगः॥५६॥ २०

ज गृहं गच्छ॥५३॥ एवं स्वप्ने संप्रकारं स्वप्नं वनुस विप्रवर्यः शिवगुरुर्बुबोध प्रबुद्धश्चानंदितात्मा स स्वभार्यां तं स्वप्नं अब्रवीत्॥
पत्कल्पे कुलाचार्य विप्रवर्यस्य भार्या योषिन्मणिः शशंस उक्तवती सत्यं अनयो महात्मा पुत्रो भविष्यत्येव संशयो नास्तीत्य
र्थः॥५४॥ विप्रानिकरं ब्राह्मणसमूहं॥५५॥ भक्ते अन्ने भुक्तमन्नं येस्तेषां विप्राणां वचनात् उपभुक्तशेषां शावतेजोयुक्तमन्नं स शि

२०

यगुरुरभुंक्तभर्त्तृचरणारविंदपूर्वमसौ सा सत्यपि अभुंक्त ॥५६॥ ततो यद्भूतं तदाह गर्भमिति असौ मृगाक्षी शिवः गर्भे मध्ये यस्य तथाभूतं
गर्भं दधार गर्भो पि शनैः वर्धत वर्धमानश्च शनैः शरीरमभवत्तद्गुप्तिनष्टि तेजसातिरेकेणातिशयेन विनिवारितो विश्वेषां दृष्टिपातो येन
तत्र राजदंतादिषु परमिति विश्वशब्दस्य परनिपातः मध्याह्नसूर्यस्यो ग्रतेजइव याशिवं धरते सा गर्भालसा भगवती किंचित् गति
मंथरं प्रापेतीदमद्भुतं न भवतिकथंभूतं भावियः पाताल महातल तलातल रसातल सुतल वितल भूतल भूर्भुवः स्वर्महर्जनतपः स
त्याख्यानि चतुर्दशापि भुवनानि विभर्तु पुनश्चयस्य शिवस्य माय सुधाजलाद्या मूर्तयस्तदुक्तं क्षितिहुतवहक्षेत्रज्ञांभः प्रभंज

गर्भं दधार शिवगर्भमसौ मृगाक्षी गर्भोप्यवर्धत शनैरभवच्छरीरं ॥ तेजोतिरेकविनिवारितदृष्टिपातविश्वं
वेदिंदिवसमध्यरवेरिवोग्रतेजः ॥५७॥ गर्भालसा भगवती गतिमांद्यमीषत् प्रापेति नाद्भुतमिदं धरते शिवं या ॥ यो विश्वमा
निबिभर्ति हि चतुर्दशापि यस्यापि मूर्तयः इमाय सुधा जलाद्याः ॥५८॥ संव्याप्तवानपि शरीरमशेषमेव नोपा
स्तिमाधिरसकावकृतान्नकांचित् ॥ यत्सूनमेव महसा दुरतिक्रमेण व्याप्तं शरीरमदसीयममुष्य हेतोः ॥५९॥ र
म्याणि गंधकुसुमान्यपि गर्भमस्येनाधातुमैशत भराल्किमु भूषणानि ॥ यद्गुरुत्वपदमस्ति पदार्थजातं तत्तद्धि

न चंद्रमस्तपनाविय दिक्षये मूर्तीर्नमो भवविभक्त इति ॥५८॥ असौ शिवः सर्वमेव शरीरं संव्याप्तवानप्यत्र शरीरे कांचिदुपास्ति
किंचिदुपक्षेयमधिकप्रक्षेपं नाधिरकृच्चैव प्रकटितवान् यद्यस्मात् दुरतिक्रमेण तेजसामुष्याः सत्यादिदं शरीरं पूर्वमेव व्या
प्तममुष्य हेतोरस्मात्कारणादित्यर्थः ॥ निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनमितिषष्ठी ॥५९॥ मनोज्ञानि गंधपुष्पाणि अ २०
प्यस्य सत्यकामनामाधातुं समर्था नाभूवन् भूषणानि किमु किंबहुना यद्यत्पदार्थजातं गुरुत्वास्पदं तस्य तस्य विधारण विधौ
अलसाकर्तव्येषु मंदाद्यभावभूव ॥६०॥

यद्यप्येवं तथापि तां सतीं दोहदं दोहदं श्रद्धालालसं च समं स्मृतमिति हृल्लघुधा दोहदं गर्भिणी मनोरथो भृशामत्यंतमबाधत शरीरं हिंसां
कुरुते गच्छतीति शरारिः पक्षिविशेष अत्र उरितीः प्रत्ययः शरारिशब्दादिरातुर्व्यत्ययमरस्तथा च यथा दुष्टः शरारिः प्रायः परं न मुंच
ति मुंचते पीति प्रसिद्धं तद्वदित्यर्थः ॥ बाधप्रकारमाह ॥ आनीतं यद्दुर्लभं तद्पोहति त्यजति अन्यद्याचते तत्प्राप्य पोह्य परित्यज्य
पुनरन्यं वस्तु स्ययवांछतीत्यर्थः ॥६१॥ तां प्रति दुर्लभमनर्घ्यममूल्यमपूर्वं वस्तु समादाय बंधुसमूह आगमत् बंधुतां विशि

६

तां सोहृदं भृशामबाधत दुःशरारिः प्रायः परं किल न मुंचति मुंचते पि ॥ आनीतदुर्लभमपोहति याचते न्यत्
तत्प्राप्य पोह्य पुनरदंतिसान्यवस्तु ॥६१॥ तां बंधुतागमदुपश्रुत दोहदार्ति रादाय दुर्लभमनर्घ्यमपूर्ववस्तु ॥
आस्वाद्य बंधुजनदत्तमसौ अहर्ष हा हंत गर्भधरणं खलु दुःखहेतुः ॥६२॥ मानुष्यधर्ममनुसृत्य मयेदमुक्तं का
पि व्यथा शिवमहोभरणे न च ध्याः ॥ सर्वव्यथाव्यतिकरं परिहर्तुकामादेवं भजंत इति तल्लघिदां प्रवादः ॥६३॥ ॥

नष्टिउपश्रुता दोहदस्य दोहदस्यार्तिर्यया सा बंधुजनदत्तमसौ सती आस्वाद्य अहर्ष हा हंत गर्भधरणं खलु दुःखहेतुरिति
जगाद चेति शेषः ॥६२॥ हा हंते तीदं मयामानुष्यधर्ममनुसृत्योक्तं यतः शिवस्य महसस्तेजसो भरणे धारणे च ध्यामम का
पि व्यथा पीडा नास्ति एतद्दृष्टि कुत इति चेत्तत्राह ॥ सर्वपीडासंपर्कं परिहर्तुकामादेवं भजंत इति तत्त्वविदां प्रवादः
इत्यतदित्यर्थः ॥६३॥ निसर्गधवलनस्वभावतः श्वेतेनातिशायेन महता श्वेतो वृषभेण समग्रं पुनश्च गीतविशार
दैः गंधर्वादिभिः आद्यैः युक्तैः तत्त्वाभिभिः वा विद्याधरप्रभृतिर्विनयेनोपसमीपयाते प्रातैः स

२१ गीयमानमात्मानं प्राह निद्रामासती रक्षन ॥ ६४ ॥ पुनश्च जय जयेति रक्षेति मा त्वां द्दशा कृपाद्दष्ट्या अवलोकयेति शब्द
रं दधाना प्रयच्छती सती आकर्णयत् ॥ श्रुत्वापि स्मयं प्राप्तो स्थितवती तस्ततो निरीक्षमाणा सा पुनरुक्त शब्दं न श्टणो
तिस्म अकर्ण्य नो स्थितवती इति वा संबंधः ॥ ६५ ॥ किंच यं चन्तरस्य स्फुरत्तस्य मंचस्य शय्याया रोहे आरोहणे अ

उक्ष्णानि सर्गधवलेन महीयसा सा स्वात्मानमैक्षत समूढमुपात्तनिद्रा ॥ संगीयमानमपि गीतविशा
रदाद्यैर्विद्याधरप्रभृतिभिर्विनयोपपाते ॥ ६४ ॥ आकर्ण्य जय जयेति वरं दधाना रक्षेति शब्दमव
लोकयमाद्दशेति ॥ आकर्ण्य नो स्थितवती पुनरुक्तशब्दसा विस्मिता किल सृणोति निरीक्षमा
णा ॥ ६५ ॥ नर्मोक्तिकृत्याम पिखिद्यमाना किंचापि वंचेत्तरमंचरोहे ॥ जित्वा मुदान्यानतिहृद्य
विद्यासिंहासने सोऽस्थितिमीक्षितेस्म ॥ ६६ ॥ समानता सात्विकवृत्तिभाजां विरागता वैषयिकप्रवृ
त्तौ ॥ तस्याः स्त्रियो गर्भगपुत्रचित्रं चारित्रशंसिन्यजनिष्टचेष्टा ॥ ६७ ॥ श्री शंकराय नमः ॥

विनर्मोक्तिकृत्यां परिहासोक्तैः करणे पि खिद्यमाना अन्यान् जित्वा अतिहृद्य विद्यायाः सरस्वत्याः सिंहासनेस्व
स्यस्थितिमीक्षितेस्म अतिहृद्य विद्यासिंहासनदूतिया रुद्रय्युक्ता ॥ ६६ ॥ सात्विकवृत्तिभाजां सतां समानता तु
ल्पता वैषयिकप्रवृत्तौ विषयेगा चरप्रवृत्तौ विरागता वैराग्य तस्याः स्त्रियः सत्याः एतादृशी चेष्टा गर्भगतस्य २१
पुत्रस्य विचित्रमाश्चर्यरूपं यच्चरित्रं तत् शंसिनी तज्ज्ञापिका अजनिष्ट ॥ ६७ ॥ श्री शंकराय ॥

तद्रोमवल्ली कुचलक्षणा बद्री पर्वता या युक्तवती याप्र भासे यद्युनी नदी तस्या उरुशैवलालिः महती शैवालपंक्तिः रुरुचे रेजे अस्याश्चा
शाः कृते यत्नाद्विधात्रा स्थापितः प्रशस्तो येणुरिसेव स्तुतेः प्रारुंद्र ॥ ६८ ॥ अस्याः सत्याः पयोधरद्वंद्वमिषात् कुचयुग्मव्याजेन
दुग्धपिबस्वर्थस्य पानस्य विधाने योग्यो नवीनामृतपूरितो द्वौ कुंभौ पल्ययोनि ब्रह्मणा कल्पयां बभूव स्वयाभासकैलशाय
कुतिर्षको भाजा द्वौर्निकृतः पदे उपजातिः ॥ ६९ ॥ कुचकुंभमध्ये द्वैतप्रवादं तयोर्मध्ये पुनर्मीध्यमिकं मतं शून्यमतं च सु
इ२५ भ्रमणे गर्भगएव सो र्भो बालको प्राक्ऽदिति गर्हयामास यतो महात्मभिर्गर्हितं निंद्यं भेदवाद शून्यमतयोः प्रतिबेधायग

तद्रोमवल्ली रुरुचे कुचाद्यावाद्युक्तवत्या भाधुस्युरुशैवलालिः ॥ यस्याश्चिशोरस्य कृते प्रशस्तो न्यस्तो विधात्रेव वन
शीनवेणुः ॥ ६८ ॥ पयोधरद्वंद्वमिषादमुष्याः पयः पिबस्वर्थ विधाने योग्यौ कुंभौ नवीनामृतपूरितौ द्वौ संभोजयो
निः कल्पयां बभूव ॥ ६९ ॥ द्वैतप्रवादं कुचकुंभमध्ये मध्ये पुनर्माध्यमिकं मतं च सुभ्रूमणे गर्भगएव सो र्भो द्रागगर्ह
यामास महात्मगर्ह्यं ॥ ७० ॥ लग्ने शुभे शुभ युते सुयुते कुमारं श्री पार्वतीव सुखिनी शुभवीक्षिते च ॥ जायास
शावगुरोर्निजतुंगसंस्थे सूर्ये कुजे रविसुते च गुरौ च केंद्रे ॥ ७१ ॥ गर्भगेणार्भेण स्तनयोरभेदस्य तन्मध्यगतावका
शाभावस्य च संपादनामति फलोत्प्रेक्षा द्वंद्व ॥ ७० ॥ लग्ने शुभे शुभेन ग्रहेण युते युके शुभेन तेन दृष्टे च पुनश्च सूर्यादीनां स्व
तुंगसंस्थानि जतुंगाद्युच्चस्थानानि सूर्यादीनां क्रमेणोक्तानि ॥ अजवृषभमृगांकांगनाकुलीर झषवणिजाहि दिवाकरा
दितुंगा ॥ इति अजो मेषः मृगो मकरः अंगना कन्या कुलीरः कर्कः झषो मीनः वणिक् तुला तथा च सूर्ये मेषस्थे कुजे मो
ममकरस्थे रविसुते मंदे तुलास्थे गुरौ च केंद्रे चतुर्थ्यां चन्यतम राशिस्थे च कारात् बुकोऽतुकसमुच्चयार्थे शिवगुरो र्भार्या

२२ सतीसुखिनीसुखवतीनतन्यस्त्रीयसौदिताकुमारंशिशुंसुषुवेयथाश्रीपार्वतीकुमारंस्कंदंसुषुवेतद्वत्अनेनगर्भप्रवेशादि कंमायामात्रदत्रैसदाशिवःशंकराचार्यरूपेणप्रादुरभूदितिदर्शितंवसंत॥७१॥सुतंदृष्ट्वाशिवगुरुःशिवबारिराशौसुखसमुद्रे निमग्नोपिराकिंसामर्थ्यमनुसत्यजलेन्यमांक्षीत्निमज्जितवान्तदनंतरंबहुधनंवसुधाश्चगाश्चपुत्रजन्मफलकस्यकर्म णोविधियथाविधानाद्द्विजपुंगवेभ्योब्राह्मणवरेभ्यःपात्रेभ्यःव्यश्राणयद्दत्तवान्॥७२॥तरक्षुर्व्याघ्रःमृगादयोबहुजंतुगणाः परस्परंद्रुवंतोपितस्मिन्दिनेवैरंविहायातीवहृष्टाःसहचेरुःपुनश्चसाधुतयानिघृष्टाःसम्यक्कयान्योन्यंसंघर्ष

दृष्ट्वासुतंशिवगुरुःशिवबारिराशौमग्नोपिनाकिमनुसत्यजलेन्यमांक्षीत्॥व्यश्राणयद्बहुधनंवसुधा श्चगाश्चजन्मोक्तकर्मविधयेद्विजपुंगवेभ्यः॥७२॥तस्मिन्दिनेमृगकरींद्रतरक्षुसिंहसर्पाखुमुख्यबहुजंतु गणाद्रुवंतः॥वैरंविहायसहचेरुरतीवहृष्टाःकंडूमयाक्षुपतसाधुतयानिघृष्टाः॥७३॥वृक्षालताःकुसुम राशिफलान्यमुंचन्नद्यःप्रसन्नसलिलानिखिलास्तथैव॥जाताभुकुर्जलधरोपिनिजंविकारंत्यक्त्वाघृणा अपिजलंसहसोल्लपात॥७४॥अद्भुतचाद्विविपरीतमलावलेविहरतायवर्तिचरपुस्तकमप्यकस्मात्॥उ च्चैःपपातजहसुःश्रुतिमस्तकानिश्रीव्यासचित्तकमलंविकचीबभूव॥७५॥श्रीशंकराय॥

णांखर्वनंकुर्वंतःकंडूमयाक्षुपतकंडूपाकरणंकृतवंतः॥७३॥तस्मिन्दिनेवृक्षालताश्चपुष्पराशीःफलानिचा २२ मुचन्नतथैवसकलानद्यःप्रसन्नजलाजाताःजलधरोपिनिजंविकारंजलंमुहुरमुंचद्वितिविपरिणामेनसंबंधिनी अभूत्तगणापूर्वंतसम्महान्अपिजलंसहसोल्लपात॥७४॥किंचाद्भुतचाद्विभ्यांविपरीतंमतमयलंबितुंशीलंयेषां तेषांहस्ताग्रवर्तिचरपुस्तकमप्यकस्माद्च्चैःपपातश्रुतिमस्तकानिवेदांताःजहसुःश्रीव्यासस्यचित्तकमलंविकचीबभूवविकासंप्राप ७५

किंचसर्वाभिराशाभिर्दिग्भिरलंप्रसेदेकर्मणिप्रत्ययःसर्वादिशोऽतिशयेनप्रसन्नाःबभूवुरित्यर्थः॥अद्भुतोदिव्योगंधोयथातैर्वा तैरभाविवायवोऽद्भुतदिव्यगंधाबभूवुर्प्रदक्षिणीभूताविचित्राःकीलाज्वालायेषांतेऽर्चिलनेरग्निहोत्राग्नितिमिरपिसदानींप्रजज्व लस्तथाभूताअग्नयोपिप्रज्वलिताबभूवुरत्रापिकर्मणिप्रत्ययः॥७६॥किंचतदातस्मिन्कालेसमनोहरोगंधोऽस्यास्तीतिम थासतांसुष्ठुश्रद्धंयन्मनस्तद्द्रुमलाशिवंसुखंकरोतीतितथासुमनसांदेवानांनिकरैःसमूहैःप्रचोदिताप्रेरितासुमनसां पुष्पाणांवृष्टिविरद्भुतंयथास्यात्तथाऽभूत्यमकालंकारःअर्थसत्यर्थभिन्नानांवर्णानांसापुनःश्रुतिःयमकमित्युक्तेःदिश

सर्वाभिराशाभिरलंप्रसेदेवातैरभान्यद्भुतदिव्यगंधैः॥प्रजज्वलेऽपिज्वलनैस्तदानींप्रदक्षिणीभूतविचित्रकीलैः॥७६॥सुम नोहरगंधिनीसतांसुमनोवद्द्रुमलाशिवंकरी॥सुमनोनिकरप्रचोदितासुमनोवृष्टिरभूत्तदाद्भुता॥७७॥लोकत्रयीलो कदृशाचभास्वतामहीधरेणोचमहीसुमेरुणा॥विद्याविनीत्यंचसतीसुतेनसाररराजतत्ताद्दशराजतेजसा॥७८॥सत्कार पूर्वमथियुक्तमुहूर्तवादिविप्राःप्रशस्तांसुरभिचौद्यसुतस्यजन्म॥सर्वज्ञएषभविताररचयिष्यतेनशास्त्रंस्वतंत्रमपिवा

मसस्वजागुरुःसमसभरालाभगुरुर्वियोगिनी॥७७॥लोकत्रयीलोकदृशालोकनेत्रेणभास्वतासूर्येणचमहीसमेरुणापर्व तेनविद्याविनयेनवसासतीतातेनसुतेनरराजसुतंविशिनष्टितादृशानामतिप्रसिद्धानारामचंद्रप्रभृतिराज्ञांतेजोय स्मिंस्तेनयद्वातेजसांराजतिराजतेजस्तादृशाःसूर्यादितुल्यराजतेजाथस्मिंस्तेनसर्थः॥अत्राभिन्नेदीप्तिलक्षणसाधार णधर्मएकस्यैवबहूपमानोपादानान्मालोपमादृष्टव्या॥७८॥सत्कारपूर्वकमथियुक्तमुहूर्तवादिनो विप्राःकृतस्यजन्मवीक्ष्यआलोच्यशिवगुरवेतवपुत्रःसर्वज्ञोभविष्यतिपुनश्चस्वतंत्रंशास्त्रंरचयिष्यतेअथयोगाभिपार्श्वे

तासमहिमासकललोकविस्तरं ७९

२३ किंच यावदेषा भूस्तावत्स्वकां कीर्तिं भुवि विधास्यति किं बहुना बोधितेन एष तव शिशुः पूर्णो स्ति श्रीजीवितं च तेन शिवगुरु
णा न च एष्टं न च तैरुक्तं यतः प्रायो जानन्त्यप्यशुभं शुभज्ञाः नैव वक्ति ॥ ८०॥ अथानंतरं तदा ज्ञातिबंधुसुहृदिष्टजना
नां अंगना उपायेन न उपहारेण सह वर्तमाना स्तास्तं सूतिकागृहं निविष्टं ददृशुः तं सरोजमुखं च मा मि समंतात्
वीक्ष्य अस्यं तं मुदं च प्रापुः प्रापुः यथा निदाघे ग्रीष्मतौ सूर्यातपेन तप्ता अंबुदं वीक्ष्य असंतं मुदं प्राप्नुवंति तद्वत् ॥ ८१॥

कीर्तिं स्वकां भुवि विधास्यति यावदेषा किं बोधितेन बहुना शिशुरेष पूर्णः ॥ नाप्युच्छ्रिजीवितमनेन न चैतेर्नचोक्तं प्रा
योपि सत्यपि न वक्ति शुभं शुभज्ञः ॥ ८०॥ ज्ञातिबंधुसुहृदिष्टजनांगनास्तास्तं सूतिकागृहनिविष्टमथो निद
ध्युः ॥ सोपायनास्तमभिवीक्ष्य यथो निदाघे चंद्रं मुदं ययुररं ती विसरोजवक्त्रं ॥ ८१॥ तत्सूतिकागृहमवेक्ष्य तत्र प्र
दीपं तत्तेजसा च दचभातमभूत्सपायां ॥ आश्चर्यमेतदजनिष्ट समस्तजंतोस्तन्मंदिरं धृतिमिरं यदभूदहदी
पं ॥ ८२॥ यत्प्रत्यहं तांशिशुरसौ कुरुते शमग्र्यं तेनाकृतास्य जनकः किल शंकराख्यं ॥ यद्वा चिरायकिल
शंकरसंप्रसादाज्जातस्ततो व्यधित शंकरनामधेयं ॥ ८३॥ न विद्यते प्रदीपो यस्मिन्नेकथं स्यादिय च न तद्वाद्वेन स

मासः न प्रदीपं सत्सपायां रात्रौ तस्य शिशोस्तेजसा यद्भातमभूत्तत्सूतिकागृहं सर्वोज नोऽवेक्षत एतत्सर्वजंतोराश्चर्य २३
मजनिष्ट यदहदीपं सत्तस्य मंदिरमतिमिरं अभूदित्यर्थः ॥ ८२॥ अथ शंकरनामधेयप्रवृत्तिनिमित्तद्वयमाह ॥ यद्य नेन कारणे
न असौ बालकः प्रत्यहं तां जनतानामुत्कृष्टं शंसुखं कुरुते तेनास्य जनकः प्रसिद्धः शंकराख्या अकृत कृतवान् यद्वा चि
रकालात् शंकरप्रसादाज्जातः ततस्तस्मात् शंकरं नामधेयं व्यधित अकृत ॥ ८३॥ ॥ २ ॥

तद्वत् बालकत्वात्पादकमलाभ्यां गमनाद्यादौ स्तस्तु मुद्दरेण सर्पणं कर्तुं समर्थो बभूव ॥ ८४॥ यस्मिन्बाले मंचे शायिते सति सतां हृद
यं प्रसन्नं बभूव मणिगुच्छचयं वीक्ष्यमाणे सति विधुर्वा मुखं विगतनीलमभूत् ॥ यद्वा वादिपंडितानां मुखं विशेषेण नीलमभूत् ॥
॥ ८५॥ कमनीयात्सुंदरात् श्लाघ्यात् शायनीयं यस्मिंस्तत्पर्यंकश्रेष्ठं शनैः पादाभ्यां संताडयन् स न्यधिशेषेण भेद यादिनां येदुमा स्ते
षां ये मनोरथास्तेषां समूहान्सद्यः शतधा विभेद विदारअत्र ताडन विभेदनयोर्हेतुकार्ययोर्विरुद्ध भिन्नदेशत्वाद संगति

सर्वंविदत्सकलशक्तियुतोपि बालो मानुष्यजातिमनुसृत्य चचार तद्वत् ॥ बालः शनैर्हसितुमारभत क्रमेण
स्तसुं सृप्ता गमनाय पदांबुजाभ्यां ॥ ८४॥ बालेथ मंचे किल शायिते स्मिन्सतां प्रसन्नं हृदयं बभूव ॥
संवीक्ष्यमाणे मणिगुच्छचयं विधुर्मुखं हंत विनीलमासीत् ॥ ८५॥ संताडयन्स्तह तशनैः पदाभ्यां पर्यंकवर्यं क
मनीयशाय्यं ॥ बिभेद सद्यः शतधा समूहान्विभेदवादींद्रमनोरथानां ॥ ८६॥ द्वित्राणि वर्णानि वदत्समुष्मिन्
दूति प्रवीराद्धुरेव भोनं ॥ मुरान्चलत्संघ्रिसरोरुहाभ्यां द्वित्राः पलाप तद्दशापि सद्यः ॥ ८७॥ उदचारमद
र्भकोगिरः पदचारानततो द्रुनंतरं ॥ पिकलोभयदादिभान्तयोः पिकलोकस्वरमामरालकः ॥ ८८॥

रलंकारः ॥ विरुद्धभिन्नदेशत्वं कार्यहेत्वोरसंगतिरित्युक्तेः ॥ ८६॥ द्वित्राणि वर्णानि अमुष्मिन्बाले वदति सति प्रौढिप्रवीरा मौनमे
व दधुः चरणकमलाभ्यां मुदा चलति सति सद्यः दशापि द्विशः पलायंत पलायनं कृतवन्तः ॥ चपलाति शायोक्तिरलंका
र्यहेतुप्रसक्तिजे ॥ ८७॥ अर्भको गिर उदचारयत् वर्तितवान् अनंतरं पदचारान्ततनोत् विस्तारितवान् तयो र्वाणीप्र
वर्तनपादचारयोर्मध्ये गिरः प्रवर्तनात् पिकलोकः सर्वोपि कोकिलो पिकलोऽभवत् चरमात् पादचारविस्तारान्म

रात्मकोऽहं सोऽपि फलो भवतु (वियोगिनी)॥ त्वां अचलां भूमिं पादत्विषा चरणकान्त्या नवीनैर्विद्रुमस्य रत्नस्य पल्लवै
२४ रास्तृतामिव विद्रुमो रत्नवृक्षेऽपि प्रवालेऽपि पुमानयमिति मेदिनी। काश्मीरपरागैः पाटलां श्वेतरक्तामिव रचयन्नयं चंद्रतु
ल्यः शिशुः शनैः शनैरचारीत्॥८७॥ मूर्धनि हिमकरस्य शीतकिरणस्य चंद्रस्य चिन्हं निटिले ललाटे नयनस्य नेत्र
स्यांकं चिन्हं अंसयोः स्कंधयोः शूलं वपुषि स्फटिकेन समानं वर्णं प्राज्ञा धीमन्तः शंभुं मेनिरे अनुमानालंकारः वृत्तं गी
तिः आर्याप्रथमदलोक्तं यदि कथमपि लक्षणं भवेदुभयोः दलयोः कृतयतिशोभां तां गीतिं गीतवान् भुजंगेशः इति लक्ष

नवविद्रुमपल्लवास्तृतामिव काश्मीरपरागपाटलाम्॥ रचयन्नचलां पदत्विषा स च चारेंदुनिभः शनैः
शनैः॥८७॥ मूर्धनि हिमकरचिह्नं निटिले नयनांकमंसयोः॥ शूलं वपुषि स्फटिकसवर्णं प्राज्ञास्तमेनि
रे शंभुं॥८८॥ राज्यश्रीरिव कोविदस्य राज्ञो विद्येवाव्यसनस्य दवीयसो बुधस्य॥ शुक्लांशोः छविरिव शार
दस्य पित्रोः संतोषैः सह ववृधे तदीयमूर्तिः॥८९॥

वालत्॥ लक्ष्मीर्लसत्गणा गोपेता भयतिनह विषमे जः षष्ठो नलघुर्वा प्रथमेर्धे नियतमार्याया दलाया: पूर्वार्धल
क्षणं॥८०॥ राजनीतिकुशलस्य राज्ञः श्रीरिव अव्यसनं व्यसनरहितस्य कोपानस्त्रीमृगयादिषु देवानिष्टफलोपाये २४
विपत्तौ विफलोद्यमे इति मेदिनी। कोशाद्व्यसनात् अप्रमादं दवीयसो दवीयश्च दविष्ठं च सुदूरे दूरमरादिति
दवीयसो अतिदूरस्य बुधस्य विद्येव शारदस्य कालीनस्य चंद्रस्य छविरिव पित्रोः संतोषैः सह तदीया मूर्तिर्ववृधे प्रह
र्षिणी॥८९॥

उरसि नागेन वरणेन आभरणं मस्तके बालचंद्रेण हस्तयोश्चक्रादिभिः मूर्धनि त्रिशूलेन च अद्भुतं तस्य ललितं गात्रं सुकुमाराङ्ग
विन्यासं शरीरं नेत्रैर्निमेषरहितैः सकलय्य सम्यगवलोक्य रेखार्धलांछितं चिह्नितं तत्रत्यजनसमुदायोऽमंस्त॥९२॥
प्राथमिके सनकादिसर्गे विरतिं प्रयाति सति मार्गे दुर्गतिसंपादके स्थिते सति स्वर्गे दुर्गमतां दुःप्राप्यतामुपेयुषि प्रा

नागेनोरसि चाभरणं चरणे बालेंदुना भालके पाण्योश्चक्रगदाधनुर्द्रुमरुके मूर्ध्नि त्रिशूलेन च॥ तत
स्याद्भुतमाकलय्य ललितं रेखांकितं लांछितं चिह्नं गात्रं समस्ततत्रजनता नेत्रैर्निमेषोज्झितैः॥९२॥ स
र्गे प्राथमिके प्रयाति विरतिं मार्गे स्थिते दौर्गते स्वर्गे दुर्गमतामुपेयुषि भृशं दुर्गेऽपवर्गे सति॥ वर्गे देहभृ
तां निसर्गमलिने जातोपसर्गेऽखिले सर्गे विश्वसृजस्तदीयवपुषा भर्गोऽवतीर्णो भुवि॥९३॥ ॥ इति
श्रीमाधवीये तदवतारकथापरः संक्षेपशंकरजये सर्गः पूर्णो द्वितीयकः॥२॥ मूलं प्रथम संख्या १४८

सेवति सति अपवर्गे मोक्षे भृशमत्यंतं दुर्गे दुःप्रापे सति देहभृतां जीवानां वर्गे समुदाये निसर्गात् स्वभावात् अयमलिने स
ति तथा च विश्वकर्तुः अखिले अपि सर्गे जाता उपसर्गा नाशकराणि विघ्नानि यस्य तस्मिं तथाभूते सति तदीयवपुषा
शंकराचार्यविग्रहात्मना भर्गो महाशिवः भूमौ अवतीर्णः॥९३॥ ॥ इति श्री परमहंसपरिव्राजकाचार्य बालगो
पालतीर्थश्रीपादशिष्य तद्वंशावतंसरामकुमारसूनुधनपतिसूरिकृते शंकरदिग्विजयडिंडिमे द्वितीयः सर्गः संख्या
३२५

डाक्टर भाऊ दाजी स्मारक
DR. BHAU DAJI MEMORIAL

श्रीगणेशाय नमः॥ एवं शिवावतारमुपवर्ण्य तत्तद्देवावतारमुपवर्णयितुं उपक्रमते॥ इतीति। एवं बालचंद्रशेखरे शिवे बालत्वं प्राप्ते सति तदनंतरं सुरोत्तमा भुवि शाङ्गशास्त्रविद्वांसतां कुले अजज्ञिरे प्रादुर्बभूवुः श्रियोगिनी॥१॥ तत्रादौ विष्णोरवतारमाह कमलायाः लक्ष्म्याः निलयः श्रीविष्णुः स विश्वासां कलानां निधिर्विमलाभिधाद् भूसुरात् ब्राह्मणात् भुवि अजनिष्ट प्रादुरभूत् तमुवीक्तत्तरा त्व्यपि मं भुविपद्मपदं ब्रदंतियेन यथा वादिनां यत्र सविपत् विपदा सह वर्तमानमित्यर्थः॥२॥ पवनोपि प्रभातः सप्रभादिनोन्मीलि

इति बालमृगांकशेखरे सति बालत्वमुपागते ततः॥ द्विविषत्प्रवराः अजज्ञिरे भुवि षड्दर्शनशास्त्रविद्वांसतां
कुले॥१॥ कमलानिलयः कलानिधेर्विमलाख्यादजनिष्ट भूसुरात्॥ भुविपद्मपदं ब्रदंतियं सविपद्येन निशा
दिनायवः॥२॥ पवनोप्यजनि प्रभाकरात्सवनोन्मीलितकीर्तिमंडलात्॥ गलहस्तितभेदवाद्यसौ किल हस्ताम
लकाभिधाम धात्॥३॥ पवमानदृशांशतोजनि भूवमानां चतिथर्य्यशोंबुधौ॥ धरणीमथिताशिवादिवाकरणीयेन स्

तं प्रस्फोरितं कीर्तिलक्षणं मंडलं यस्य तस्मात्सात् तः कालोन्मीलितमंडलः सूर्यस्तत्तुल्यात् प्रभाकराभिधात् भूसुरात् अजनि प्रादुरभूत्॥ गलेहस्तिताः कंठे नहस्तेन गृहीताः दूरीकृताः भेदवादिनो येन सावतीर्णो वायुः किंभूतः सिंधुहस्तामलक इति संज्ञाम धात्॥३॥ वायोरेव द्वितीयावतारमाह॥ पवमानस्य पवमानस्य दृशांशः सतोटकाख्या अजनि यस्य यशोलक्षणे जलधौ पूयमाना उत्तरंती धरणी अंचति येनाश्च वादिता करणी मथिता इत्यर्थः॥४॥ श्रीः॥

डाक्टर भाऊ दाजी स्मारक
DR. BHAU DAJI MEMORIAL

शंकरदिग्विजये ३

२६ अथ तथाऽवतीर्णस्य विधेः पुरंध्री कुटुंबिनी सा प्रसिद्धा शिलादस्य सुतेन पुत्रेण नंदिसंज्ञकेनोऽन्वयि शिलादस्य सुतः प्रादुरभूत् यम
दग्न्यादिकं देवानां मद्गुरुकवादिसमुदायानां निग्रहैः समुल्लसंत्या कीर्त्यालिना भवतीति तथा तं महीतलेऽउदंकं वदंती सर्था ॥५॥ विधिर्ब्रह्मा
सुरेश्वराभिधेनापरसंज्ञ आसबभूव गिरांनिधिर्वाचस्पतिरानंदगिरिरजायत अरुणो गरुडभ्राता सर्वावासनंदनसंज्ञः सम
वदयथ विविदिषुः पद्मपादसंज्ञो बभूव सुतंसए एव चवस्यमाणरीत्या सनंदनस्तथापि पक्षांतरमाश्रित्यैकत्र्यो भयांशावतरण

उक्त्वा विभ्रालादस्सुतनामरुचद्यादिकं दंब निग्रहैः समुदंचितकीर्तिशालिनं यमुदंकं दुवते महीतले ॥५॥ विधिरा
ससुरेश्वरो गिरांनिधिरानंदगिरिर्व्यजायत ॥ अरुणः समभूत्सनंदनो वरुणो जायत चित्सुखाह्वयः ॥६॥ अपरे
व्यभवन्दिवौकसः स्वपरेर्ष्या परवर्धिषुः प्रभोः ॥ चरणांपरिसेवितुंजगद्गुरुरणं प्रसुरसुंगवात्मजाः ॥७॥ चार्वाक
दर्शनविधानसरोषधात्रा शायनगीष्पतिरभूद्गुरुविमंडनाख्यः नंदीश्वरः करुणयेश्वरचोदितः सन्नानंदगि
र्यभिधया व्यजनीति केचित् ॥८॥

मान्निस्त्वाविरोधः संपादनीयः वरुणो जलाधीशश्चित्सुखसंज्ञोऽजायत ॥६॥ अपरेपि स्वीयैः परैश्च सहयत्पर्ध्यामत्स
रः तत्परान्दैत्यान्स्वपरेषु याईर्ष्यातत्परान्वाभिवर्धंतीति ते दिविषदः स्वपरेर्ष्यापरान्विदुषीति वा तस्य प्रभोः श्रीशंकरस्य
चरणं जगतां शरणं परिसेवितुं ब्राह्मणो समानां पुत्रा अभवन् ॥७॥ विधिरासत्सुरेश्वरो गिरांनिधिरानंदगिरिर्व्यजामातल्क
क मिदानीं मतांतरमाह चार्वाकानां दर्शनस्य शास्त्रस्य विधाने न सरोषस्य धातुर्ब्रह्मणः शापेन गीष्पतिर्देवगुरुर्मंडि
मंडनसंज्ञो ऽभूदनंदीश्वरः करुणया ईश्वरेण महादेवेन प्रेरितः सन् आनंदगिरिसंज्ञया अजनीति केचित्वदंति ॥८॥ २६

अथ तथावतीर्णस्य विधेः पुरंध्री कुटुंबिनी सा प्रसिद्धा सरस्वती प्रादुरभूत् काकाशि गोलक न्यायेनाभूत् परमुभयमप्रसंख
ध्यते । यस्याः संज्ञा उभयभारतीत्यभूत् खलु प्रसिद्धं वस्तु यस्या पि सा सरस्वती लोकोपितां सरस्वतीमेव वदति । जगतो जगेगोगा वि
षमसमस्या तो जगेगेवावि परीतप्रयोः ॥७॥ सरस्वत्या अवतरणनिमित्तमाह । पुरा पूर्वं किल धातुरंतिके ब्रह्मणः समीपे सर्वज्ञ
कल्पा ऋषिपदून सर्वज्ञा मुनयः स्वीयं स्वीयं वेदमध्येषीत पठितवंतस्तदा ति कोपनो दुर्वासतो दुर्वासमुनिर्वेदान्पठन्कचित्स्वर
स्वलतस्खलनं प्राप ॥५॥ तदा तस्मिन्काले चंद्र वन्मुखं यस्याः सा सरस्वती जहास हसितवती यतोपरंगमर्षणो दुर्वासा

अथावतीर्णस्य विधेः पुरंध्री सा भूधरारव्योभयभारतीति ॥ सरस्वती सारवक्रुवस्तु यसा लोकोपितां वकि
२ सरस्वतीति ॥९॥ पुराकिलाध्येषित धातुरंतिके सर्वज्ञकल्पा मुनयो निजं निजं ॥ वेदं तदा दुर्वससोति कोप
नो वेदं दानधीयन्कचिदस्वरलत्स्वरे ॥१०॥ तदाजहासेंदुमुखी सरस्वती यदंगमर्णो दुर्वासदसंततिः ॥ चुको
पतस्येदहनानुकारिणा निरीक्षता क्ष्णा मुनिरुग्रशासनः ॥११॥ शप्त्वाप तां दुर्धिनयेवनीतलेजायस्वमर्त्येष्व
विभेत्सरस्वती ॥ प्रसादयामास निसर्गकोपनं तत्पादमूले पतिताविषादिनी ॥१२॥
संततिः अर्णोभ्यः वर्णोभ्यः उ
दकः उत्पत्तिर्यस्याः सा चासौ शब्दसंततिर्यस्याः अंगं तस्येहासं कृतवत्येसरस्वत्यै बु कोप कोपं कृतवान् तत्मुद्रामदह
यतिदहनं वह्निमनुकरोतीति दहनानुकारितेनाक्ष्णा नेत्रेनोग्रशासनो मुनिर्निरीक्षितद्दृष्टवान् । वंशास्थ ॥११॥ ततः किं
कृतवान्दुरासाकांक्षायामाह । तां शप्त्वापतिशापमेव दर्शयति हे दुर्विनये भूतले मर्त्येषु मनुष्येषु जायस्व जन्मलभस्व एवं शप्ता
सासरस्वती अबिभेत् भयं प्राप भीतात्यसति विषादिनी तत्प्रसादोपायाभावचिंतने न तोभगवती तस्य दुर्वाससः पादमू
ले समीपे पतिता निसर्गात्स्वभावादेव कोपनं मुनिं प्रसादयामास तत्प्रसन्नतार्थं यत्नं कृतवती सर्थः ॥ उप ॥१२॥

२७ अथमुनयः खिन्नांसरस्वतींदृष्ट्वातमिमंदुर्वाससमादरात्प्रसादयामासुः हेमुने विहितापराधंपुत्रंपितायथाक्षमतेतथा
हेभगवन्कृतापराधांतांसरस्वतींक्षमस्व॥१३॥अथसरस्वत्यामुनीन्द्रैश्चप्रसादितः संप्रसन्नोदुर्वासाः शापस्यमो
क्षंददौतमाह यदामानुषत्वंशंकरस्यत्वंकराचार्यरूपेणअवतीर्णस्यसम्यक्साक्षात्पूर्वकंदर्शनंस्यात्तदा मर्त्याभवि
ष्यसीत्यर्थः।विपरीत॥१४॥सासरस्वतीशोणारव्यानद्यस्तीरेविप्रस्यविष्णुमित्रसंज्ञकस्यकन्याअजनिता

दृष्ट्वाविषण्णांमुनयःसरस्वतींप्रसादयांचक्रुरिमंतमादरात्॥कृतापराधांभगवन्नुसमस्वतांपितेव
पुत्रंविहितागसंमुने॥१३॥प्रसादितोभूदथसंप्रसन्नोशाप्यामुनीन्द्रैरपिशापमोक्षं॥ददौयदामानुषत्वं
करस्यसंदर्शनंस्याद्भवितास्यमर्त्या॥१४॥साशोणातीरेजनिविप्रकन्यासर्वार्थवित्सर्वगुणोपपन्ना
यस्याबभूवुःसहजाश्चविद्याश्शिरोगतंकेपरिहर्तुमीशाः॥१५॥ ॥श्रीशंकराचार्यायनमः॥

विविनक्ति।सर्वानर्थान्वेत्तीतिसर्वार्थवित्साचासौसर्वैर्गुणैरुपपन्नायुक्ताच भिन्नंचापदं यस्याःपुनर्विद्याः ऋग्य
जुःसामाथर्वसंज्ञाश्चत्वारोवेदाः शिक्षाकल्पोव्याकरणंछन्दोज्योतिषंनिरुक्तिरितिषडंगानिमीमांसाधर्म
शास्त्रंन्यायःपुराणमितिविद्याश्चतुर्दशसहजाःसहोत्पन्नाः बभूवुः यस्माच्छिरोगतंसिरश्शिस्थितंपरिहर्तुंके
समर्थानकेपिदुर्वासःआदयःइत्यर्थः॥१५॥सर्वाणिसांख्यपातंजलवैशेषकन्यायमीमांसावेदांतारव्यानि २७
शास्त्राणिव्याकरणादीनिषडंगानिऋगादीन्वेदान्काव्यनाटकादीन्परमन्यच्चसर्वंवेत्तिकिंबहुना

अत्रजगतितन्नास्तियन्नजानातिसरस्वतीनजानातिमस्मादेवंतस्मात्साबालाअत्रजनानामाश्चर्यभियभूताअभूत
इत्यर्थः॥१६॥एवंसरस्वत्याःप्रादुर्भावमुपवर्ण्यतस्याविवाहंवक्तुमुपक्रमतेसागुणज्ञासरस्वतीविश्वरूपंमंडना
परनामधेयंगुणिनंमनोभिरामंद्विजश्रेष्ठेभ्यःश्रुतवतीसगुणज्ञोविश्वरूपस्तांसरस्वतीमपिगुणवतींमनोभि
रामांद्विजपुंगवेभ्यःश्रुतवान्तस्मात्तयोर्मंडनसरस्वत्योर्दर्शनलालसाजाता॥१७॥एवंभूतयोस्तयोश्चिंतन

सर्वाणिशास्त्राणिषडंगवेदान्काव्यादिकान्वेत्तिपरंचसर्वं॥तन्नास्तिनोवेत्तियदत्रबालातस्मादभू
च्चित्रपदंजनानां॥१६॥साविश्वरूपंगुणिनंगुणज्ञामनोभिरामंद्विजपुंगवेभ्यः।शुश्राववतांचापिसवि
श्वरूपस्तस्मात्तयोर्दर्शनलालसाभूत्॥१७॥अन्योन्यसंदर्शनलालसौतौचिंताप्रहर्षाद्यधिगम्यनिद्रां॥
अथाप्यसंदर्शनभाषणाविपुनःप्रबुद्धौविरहाग्नितप्तौ॥१८॥दिदृक्षमाणावपिनेक्षमाणावन्योन्य
वार्ताहृतमानसौतौ॥यथाविताहारविहाररहीतौतनुतुल्संस्मरणादुपेतौ॥१९॥दृष्ट्वातदीयौपितरौ
कदाचिद्दपृच्छतांतौपरिकार्शितांगौ॥वपुःकृशंतेमनसोप्यगर्वोनव्याधिमीक्षेनचहेतुमन्यं॥२०॥

श्रि प्रकर्षद्विवधसात्त्विकसंदर्शनादिकयोःप्रबोधकालेविरहाग्निसंतापोजातइत्याह॥अन्योन्येति॥१८॥दि
दृक्षमाणावप्यनिक्षमाणोस्वाप्निकमाअन्योन्यवार्तायाहृतमानसौयथोचिताहारविहाररहितोपरस्य
रस्मरणाद्भ्रशरीरसूक्ष्मतामवापतुः॥१९॥कदाचित्ततदीयौपितरौपरिकार्शितशरीरौतौदृष्ट्वापृष्टवंतौकिंतदिति
तत्राह॥शरीरंतेकृशंमनसश्चगर्वस्त्वदंतत्किंनिमित्तमहनुरागंवाअन्यद्वृतन्निमित्तंनेक्षे॥२०॥ २॥ ३

२८

नचेहतुमन्यद्दुस्सकलं चिकृणोतिदुष्टवियोगात् निष्टसंयोगाद्दुदेहवतां दुःखानि भवंतितेनाद्यपि वीक्ष्यमाणो विचारयमाणो हेतवीक्ष्यतर्हिनिदानं विनैवैतत्स्यादिति चेत्तत्राह। निदानंकारणं विनाहि प्रसिद्धं कार्यमस्य जन्म भवति तस्मान्मदुःखस्यमेतन्निदानंवक्तव्यमित्यर्थः आरब्धा॰२१। निदानांतराण्यपि न संतीत्याह। त्वचि चिरालस्य कालो पिनैवातिक्रांतः परेभ्यो प मानोपित्तवनास्तिनिर्धनतापि तेन नवति किंचदुःसहोयं कुटुंबभारो पि मयिवर्तते तस्त्वात्रलोके कापीडा न कापीत्य

इष्टस्यहानेरनभीष्टयोगाद्भवंतिदुःखानिशरीरभाजां॥ वीक्ष्यतत्तोद्य चिपिवीक्ष्यमाणो विना निदानंन हिकार्यजन्म॥२१॥ नेतस्यगाद्दुःसहनस्यकालोः परायमानोनच निःस्वतावा॥ कुटुंबभारो मयि दुःसहो यं कुमारवस्तस्त्वकात्रपीडा॥२२॥ नमूढभावः परितापहेतुः पराजितिर्वातिवतन्निदानं॥ विद्धुत्से विस्पष्टतमाग्रपादास्सुदुर्गमार्थाद्दि विलर्कविद्धिः॥२३॥ अजन्मनो विहितकर्मनिषेवणं तस्यन्नपिनास्तिवि हितेतरकर्मसेवा॥ तस्मान्नभयमपि नारकयातनाभ्यः किं दुःतमुखं प्रतिदिनं गतरोगभमास्ते॥२४॥

उपं॰२२ किंच संतापहेतुर्मूढभावोपि तव नास्तितथा संतापस्यकारणं पराजयोपि तवनास्ति लत्रेह तु विद्भुस्तर्कविद्भिरपि सुदुर्गमोर्थो यस्य तस्मात्सुदुर्जयार्थादिति लक चित्सारस्तथाभूतादिस्पष्टतयाग्रपाठोहतोः अग्रपादादिति चाग्रपादादितिक्वचित्पाठः॥२३॥ किंच जन्मप्रभृति लयवदविहितस्य कर्मणः सम्यक् सेवनं नास्ति विहिताद न्यस्यकर्मणः सेवातुस्वप्नेपि तव नास्ति तस्मान्नारकयातनाभ्यो नपि लवया भेतव्यं तथापि को कुत्तयदुःखवि

एवमस्याग्रहाद्दुर्दिनं निमित्तंवक्तुं कथ्यमानोस्याहजन्यरूपातिशयसुक्तौपि तरौ कर्मभंडुनसरस्वसाविदं वक्ष्यमाणमूचतुः स्मकिमि तिसपक्षायामाद्यौमंडनकवचनमुदाहरति यद्वाच्यं नवाच्यमितिमेलज्जां विस्तारयति तत्स्यमनसि स्थितं तवासौत्यहाद्वद्य॥२५ तदृतीयति गोणारव्यपुत्रदस्यतटेवासं कुर्वतो विष्णुमित्रारव्यस्यविप्रस्य कन्या सर्वज्ञता अयमता अनुत्तमरूपवेष यंती विप्रवरेभ्यः श्रवणं प्राप्तवती अतो हि भगवन्मदीयं मनस्तां मुद्दाढुमिच्छतिरु एव मतिविनयं यथा भवेत्तथा पुत्र

निर्बंधतोबकुर्दिनं प्रतिपाद्यमानो वक्तुं त्रपाभरयुतावि दमूचतुः स्म॥ निर्बंधतस्तवबदामि मनो मतंमेवाच्यं नवाच्यमितियद्वितनोति लज्जां॥२५॥ शोणारव्यपुत्रदतटे वसतो द्विजस्य कन्यास्तिकेतिंगतवती द्विज पुंगवेभ्यः॥ सर्वज्ञतापदमनुत्तमरूपवेषा तामुद्वोढुमिच्छति मनो भगवन्मदीयं॥२६॥ पुत्रेण सो तिविनयं गदितो वचरणो द्वौ विप्रौ वध्वरणकर्मणि संप्रबोणौ॥ तायापतुर्द्विजगृहं द्विजसंदिदृक्षदेशान्तेऽतीलिबकुलान्निजकार्य सिध्यै॥२७॥ भूरन्निकेतनगतः श्रुतिविश्वरूपस्तः श्रीविश्वरूपइति प्रथितः पृथिव्यां॥ तत्पादपल्लवरजसे स्पृ ह्यानि नित्यं सहाय्यमत्रयदितात भवान्विदध्यात्॥२८॥

णाकथितः स हि ममित्रो वध्वरणकर्मण्यतिकुशलो द्वौ विप्रायन्ववरणोपितवान्वध्वरणकर्मण्यात्तमयानितिपातो निजकार्यसिध्यर्थं विष्णुमित्रदर्शनेच्छुर्बकुलान्देशानुल्लंघ्य विष्णुमित्रगृहमवापतुः॥२७॥ अथोपसत्य भारती वाक्यमुदाहरति राजस्थानो निवासी श्रुताखिलत्रारमो यो वि श्वरूप इति प्रसिद्धः तस्य चरणरजसे नित्यं स्पृहां करोमि स्पृहेरीप्सितं इति संप्रदानं हे तात त्वं चनतत्पादपल्लर

२८ एवं पुत्र्याः वचनं तातकर्णपुटेन पिबति सति द्विजानां गुरुणा विश्वरूपपित्रा हिममित्रेण सुतस्योत्कृष्टवचनं आह । किमर्थं संप्रेषितो
द्विजाभ्यागुरुकथयेति तु पुत्रौ सुचत्स्तौ द्वौ ब्राह्मणावाजग्मतुः ॥२९॥ ताविष्णुमित्रस्तौ विप्रवरौ विहितोपचारैः संपूज्याथान
तरं तत्र तेराग मनकारणं पृष्टवान् श्री विष्णुरूपस्य पितुर्वाक्यात् कन्यायाः वरणकर्मार्थमागमनं कृतं ताविति चतुः ॥३०
श्रुतेन वास्तव्यचरणेन कुलेन वरसेः दशिनि शिक्षा रितोंविधर्मेश्च स्वसुतस्य साधारणी समानां तव सुतां श्रुत्वा च तातेन श्री विश्वरू
पगुरुणा तस्य श्री विश्वरूपस्य हेतोस्तव सुतायाच्यायेत्याहतुः हे हिममित्र सुखेनेव या कन्याकर यावत् स्मान्मणिद्वयमन्योन्य

पुत्र्या वचः पिबति कर्णपुटेन ताते श्री विश्वरूपगुरुणा गुरुणा द्विजानां ॥ आजग्मतुः सुवसनो विशदाभयष्टी
संप्रेषितौ सुतवरोद्वहनक्रियायै ॥२९॥ तावर्च्यसद्विजवरौ विहितोपचारैराया नकारणमथो ज्ञानकेरपृच्छत् ॥
श्री विश्वरूपगुरुवाक्यतआगतौ स्वः इत्यूचतुर्वरणकर्मणि कन्यकायाः ॥३०॥ संप्रेषितौ श्रुतवयः कुलवृत्तध
र्मैः साधारणीं श्रुतवतां स्वसुतस्य तेन ॥ याच्यावचेत वसुतां द्विजतस्य हेतोरन्योन्यसंघटनमेतु मणिद्वयंत
त् ॥३१॥ मत्यं तदुक्तमभिरम्यतदेव विप्रौ पृष्टावधूं मम पुनः करवाणि निन्त्यं ॥ कन्याप्रदानमिदमायतनेयध्रु
षु नोन्विदमूर्ध्वसनसत्कि पुपीडयेषु ॥३२॥ भार्यामपृच्छदथ किं करवाव भद्रे विप्रौ वरीतुमनसौ खलु राजगेहात्
एतां सुतां सुतनि भातव यास्ति कन्या ब्रूहि त्वमेकमनुमाय पुनर्नवाच्यं ॥३३॥ संघटनं परस्परसंबंधमेतु प्रा
प्नोतु तस्येहेतोरिसस्य तस्मात्कारणादिति वार्थः निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनमिति वचनात् षष्ठी ॥३१॥ एवमु
क्तो विष्णुमित्रेउवाच हेविप्रौ यद्यपि तन्नहि ममित्रेणा कं मध्ये राच्यतएव तथापि निजवधूं पृष्ट्वा तदुक्तं करवाणि यस्मादिदं कन्या २८
प्रदानं वध्वधीनमेव भित्यं भवति तन्निसदनुमत्यभावे आसनपाप्तिषु कन्यायाः दुःखप्राप्तिषु अमूर्ध्वधः पीडयेयुरित्यर्थः ॥३२
अथानंतरं भार्यां पृष्टवान् हे भद्रे तव या पुत्रतुल्या कन्यास्ति तां वरितुकामौ खलु राजगेहात् एतावागतौ एतया

रागमनं भद्रं करमितिसंबोधनानायः तत्र किं करवाव किं देयानदेयावा तत्स्मात्त्वमिहद्वय एकमनुमाय सम्यक् ज्ञात्वा ब्रूहि यतो देयं इत्यु
क्त्वा नतितदुक्त्वादेयेति पुनर्नवक्तव्यं स रुक्मन्या परीक्ष्य तत्इत्यादिरितः ॥३३॥ एवं पृष्टा विष्णुमित्रभार्या वाच प्रथमं स्विति दूरे तत्राय
यज्ञातव्यं श्रुतं वयः कुलवृत्तं आतं तदपि नज्ञायते ऽ तस्तु पृष्टे अहं किं प्रवदामि विचित्तपुत्रकाय कुलेवृत्तेनाधीतेन शीलेन वयसायं समन्विताय
कन्या प्रदेयेति तु । कुलं च शीलं च वयश्च रूपं विद्यां च वित्तं च सनाथतां च । एतान्गुणान्सप्त परीक्ष्य देया कन्या बुधैः शेषमचिंतनीय
मित्यादिस्मृतिमूलभूतश्रुतौ तु लोके च विदितमेवेत्यर्थः ॥३४॥ एवमुक्तो विष्णुमित्रआह । हे अनघे तयैतन्नेयानियंतुं शक्यं यतो यदु
गोत्राम कुशस्थलीद्वारका मोक्षद्वाःइति कुशस्थली तस्मैतीर्थव्याजं यथास्यात्तथा अटते अपरीक्षिताय च श्रीकृष्णाय तां प्रति

दूरस्थितिः श्रुतवयः कुलवृत्तजातं तन्नज्ञायते तदपि किं प्रवदामि तुभ्यं ॥ वित्तान्विताय कुलवृत्तसमन्विताय
देया सुतेति विदितं श्रुतिलोकयोश्च ॥३४॥ नेयं नियंतुमनघे तव शक्यमेतत्तां रुक्मिणी यदुकुलाय कुशस्थ
लीशं ॥ प्रादात्स भीष्मकनृपः खलु कुंडिनेशः तीर्थापदेशमटते त्वपरीक्षिताय ॥३५॥ किं केन संगतमिदं सति
मा विचारि योवेदिकीं सरणिमप्रहतां प्रयत्नात् ॥ प्रातिष्ठियत्सु गतदुर्जयनिर्जयेन शिष्यं यमेनमशिषत्स च मे

हाः रुक्मिणीं कुंडिनाख्यनगरस्थो भीष्मकाभिधान्नृपः प्रादात् खलु प्रसिद्धं तथा च लोकप्रसिद्धायाप्यपरीक्षिताय सुतानेद
यस्य तन्नियंतुं न शक्यमित्यर्थः ॥३५॥ ननु श्रीकृष्णस्य परमेश्वरत्वेन प्रख्यातत्वादस्य तु मनुष्यत्वेन एकत्वात् किं केन सं
गतमित्याशंक्याह हे सति किं केन संगतमिति विचारं माकुरु यतोयमप्यतिप्रसिद्ध भट्टपादमुख्य शिष्यत्वेन प्रसिद्ध इत्य
र्थः सुगतानामधेये दुर्जयास्तेषां निर्जयेन वेदिकीं सरणीं समग्रां प्रयत्नात् सत्कर्षेण स्थापितवान् स आतिप्रख्यातो
भट्टपादो यमेनां विश्वरूपं शिक्षितुं योग्यं शिक्षितवान् ॥३५॥

३० याविश्वरूपो नोऽस्माकं वरः कन्यार्थं वरणीयो भविता भविष्यति सेह सुदति किं वर्ण्यते वर्णयितुमशक्य इत्यर्थः विद्यायतो
विश्वरूपस्योत्कृष्टताबोधनार्थं विद्योत्कर्षं निरूपयति यतो द्विजश्रेष्ठस्य विद्यैव धनं न तु बाह्यवित्तमाविद्या नंतदिगंतभज
तीति दिगंतभाक् तं संततं निरंतरमचेति यांच राजचोरवन्हितो हर्तुं न समर्था॥ ३७॥ हे वधु अर्जनपालनपरिव्ययगोचरिभूता
निरोकप्रसिद्धानि चित्तानि चित्तपरिखेदयति खलु प्रसिद्धं यतो लौकिकवित्तानां चोरादिभ्यो भयमतो बालिशस्य वि

किं वर्ण्यते सुदति यो भविता वरो नो विद्याधनं द्विजवरस्य न बाह्यवित्तं॥ यान्वेति संततमनंतदिगंत
भाजं यां राजचोरवन्हितो न्व हर्तुमीशाः॥ ३७॥ वध्वार्जनावनपरिव्ययगानि तानि वित्तानि चित्त
मनिशं परिखेदयंति॥ चोराग्निपार्थिवजनेभ्य भयं धनानां शर्मक्षितौ न गुणः खलु बालिशस्य॥
३८ केचिद्धनं निदधते भुवि नोपभोगं कुर्वंति लोभवशगा न ददंति केचित्॥ अन्येन गोपितमथा
न्यजना हरंति तच्चेन्नदीपरिसरे जलमेव हर्तुं॥ ३९॥

द्याहीनस्य मूर्खस्य सुखसंतुको गुणः कदापि नास्ति॥ ३८॥ किंच केचिन्न लोभवशवर्तिनो धनं भूमौ स्थाप
यंति न तूपभोगं कुर्वंति केचित्तु भूमौ स्थापितं धनं भोगेच्छाकाले नैव लभंते किं वान्येन गोपितमन्यज
ना हरंति तद्धनं नद्याः परिसरे तीरे गोपीतं चेत्तर्हि जलमेव हर्तृ तथाचानेकदुःखसंमिश्रबाह्यवित्तवता ३०
अपेक्षया विद्याधनवत्त्वमेव श्रेष्ठमिति भावः॥ ३९॥ किंच सर्वात्मना सर्वप्रकारेण दुहितरो गृहे नैव स्था
पनीया विपक्षे दोषमाह॥ तादुहितरो विवाहात्पूर्वं स्वस्मादुद्गतं रजः पश्येयुश्चेत्तदा दुःखेषु घोरनरकेषु स्वपितरौ

पातयंतीति धर्मशास्त्रं तथा चोक्तं। पितृगेहे तु या कन्या रजः पश्येदसंस्कृता॥ भ्रूणहा तत्पिता ज्ञेयो वृषली सा च कन्यकेति॥ ४०
माभूदयं मया सह तव कलहः कुमारीं पृच्छावः सायं वदति स तस्या वरो भविष्यतीत्येवं संकेतं विधाय पितर एकस्मिन्काले कुमा
र्याः समीपमीयतुः जग्मतुर्गदितं कथितोऽनिष्टकार्यं याभ्यां तौ॥ ४१॥ गत्वापि तु कवं तो तद्दृश्यति श्रीविश्वरूपगुरुणा हिम
मित्रेण कन्यार्थिनो द्वौ विप्रौ प्रेषितौ हे सुतनु सुदेह किं करवाव याच्यं यदावाभ्यां कर्तव्यं तत्त्वयैव वक्तव्यं इत्यर्थः॥ एवं स्वे

सर्वात्मना दुहितरो न गृहे विधेया ताश्चेत्पुरा परिणयाद्रज उद्गतं स्यात्॥ पश्येयुरात्मपितरौ बत पात
यंति दुःखेषु घोरनरके इति धर्मशास्त्रं॥ ४०॥ माभूदयं तव मया कलहः कुमारीं पृच्छाव सा वदति
यं भविता वरोऽस्याः॥ एवं विधाय समयं पितरौ कुमार्या आभ्याशमीयतुरितो गदितेष्टकार्यौ॥ ४१॥ श्री
विश्वरूपगुरुणा प्रहितौ द्विजौ कन्यार्थिनौ सुतनु किं करवाव वाच्यं॥ तस्याः प्रमोदनिचयो
न ममौ शरीरे रोमांचवृंदमिषतो बहिरुज्जगाम॥ ४२॥ तेनैव सा प्रतिवचः प्रददौ पितृभ्यां तेनैव ता
व पितरौ युगलाय सत्यं॥ आराध्य विप्रमपरं पितृगेहतोऽस्याः स्तो जग्मतुर्द्विजवरौ स्वनिकेतनाय ४३

यं श्रुत्वैव तस्यास्तस्याः शरीरे प्रमोदसमुदायो न ममौ किंतु रोमांचव्याजेन बहिरुज्जगाम॥ ४२॥ तेनैव रोमांचमि
षेण बहिरुद्गतेन प्रमोदनिचयेन सा उभय भारती पितृमातृभ्यां प्रत्युत्तरं प्रददौ पितरावपि तेनैव रोमांचमिषेणा
द्गतेन प्रमोदनिचयेन तयोः विप्रयोः युगलाय सत्यं प्रत्युत्तरं ददतुरिति विप्राभ्यामेन संबंधः तदनंतरमस्याः
पितृगेहात्सम्यग् विप्रमाराध्य तौ द्विजवरौ स्वगृहाय जग्मतुः॥ ४३॥ श्रीरामं क र श्री ९॥

३१

गणितादिषु कुशलमेव को शाल मासं सुरं यस्याः सा सरस्वती अस्माद्वर्तमान दिनाच्चतुर्दशदिने दशम्यां तिथौ या मित्र नक्षत्रं लग्न
स्वला चतुर्दश मादि पदार्थं द्वा लग्नतो वास समं स्थानं गदयेत तस्मिंश्च भानां चंद्रादीनां योगस्तेन युक्तो मुहूर्तो भविष्यतीति
यं दिलिरम्य व्यारम्या परा यलग्नं यत्र व्यारम्यानक त्रैस्व ब्राह्मणाच्च दृष्टा तस्मै उपादिदेश ॥ ४४ ॥ सो हि तेषु कार्ये हृष्टपुष्ट
मने सो तो विप्रानुक्तमां विश्वरूप गुरु दृष्टवंतो अथानंतरं प्रार्थितः प्ररम्यातो ऽनुभावः प्रभावो यस्य स विश्वरूप गुरुस्तयो

अस्माच्चतुर्दशदिने भाविता दशम्यां या मित्र भादि शुभयोग युता मुहूर्तः ॥ एवं दिलिरम्य गणितादिषु कोशल्या
स्या व्यारम्या परा या दिशति स्म सरस्वती सा ॥ ४४ ॥ तो हृष्टपुष्ट मनसौ विहितेष्ट कार्यौ श्री विश्वरूप गुरुमुन
म मैक्षिमातां ॥ सोऽपि समीहितमिति प्रार्थितानुभावो दृष्ट्वैव तन्मुखमसौ रथिनि श्रियि काय ॥ ४५ ॥ अन्यः स्व
हस्तगत पत्र मदाय पत्रं दृष्टा जहास सुखवारि निधौ ममज्ज ॥ विप्रान्प्रयोचितमशूनुजदागतांस्तान्
नत्वा शुकादिभिरयं बहु चित्त लग्ने ॥ ४६ ॥ पित्रानुशिष्ट वसुधासुरसैः शतेन विज्ञापितः सुखमवा
प स विश्वरूपः ॥ कार्याण्यथाहृदथ गात्मजनान्समेतान् बंधुप्रियः परिणयोचित साधनाय ॥ ४७ ॥

सुखं दृष्ट्वैव समीहितमभिलषितं निष्क्रमितिनिश्चयं कृतवान् ॥ ४५ ॥ अन्योऽपि अभ्यंतरादिविष्णु मित्र प्रेषितो ब्राह्म
णः स्वहस्ते स्थितं पत्रं दत्तवान् हि मा भित्रः पत्रं दृष्ट्वा जहास सुखसमुद्रे ममज्ज आगतान् तान् विप्रान् नत्वा उ
यंदिमभिनो बहु चित्त लग्ने रत्ने वस्त्रादिभिः यथा योग्यं पूजितवान् ॥ ४६ ॥ अनुशिष्ट ब्राह्मण कथितं न पित्राहि
तमित्रेण प्रबोधितो विश्वरूपः सुखमवाप अथानंतरं विवाहयुचितं तस्य साधनाय समेतान् समागतान् बंधुजनान्

मुहूर्तवास्य विधिः बहुद्वैः बहुभिः दृष्टे द्विजवरैः शागत्य संदर्शिते मुहूर्तकाले मांगल्य वस्तुयुतः सकलभूषणसंपन्नो अभिक
लदेहो विश्वरूपो विशालं शोणातीरं प्राप्तवान् ॥ ४८ ॥ शोणतीरमुपागतं बहु प्रकारसुक्तं जामातरं स विष्णु मित्र उपाश्रुणोत
श्रुत्वा च प्रसु उजगाम प्रिय दर्शनेन मास्वप्राप्तितो ऽमुं जामातरं बहुवाद्य घोषैर्गृहं प्रवेशितवान् ॥ ४९ ॥ आसनं दत्वा
को मलं च नमुदीर्य तस्मै विश्वरूपाय पाद्यं ददौ मधुपर्क सहितमर्घ्यं चामूल्य पात्रे ददौ अहमियं तनया ते गृहा गावो

सो हूर्तिके र्बहु गिरस्य मुहूर्तकाले संदर्शिते द्विजवरैर्बहुभिर्दिवृष्टेः ॥ मांगल्य वस्तु सहितो खिल भूषणाद्यः स
प्रापदक्षततनुः प्रभु शोणतीरं ॥ ४८ ॥ शोणस्य तीरमुपयात मुपाश्रुणोत्स जामातरं बहुविधं किल विष्णुमि
त्रः ॥ प्रत्युज्जगाम मुमुदे प्रियदर्शनेन प्रावीविशद्गृहममुं बहुवाद्यघोषैः ॥ ४९ ॥ दत्वासनं मृदु वचः समुदीर्य
तस्मै पाद्यं ददौ समधुपर्क मनर्घपात्रे ॥ अर्घ्यं ददावहमियं तनयागृहास्ते गावो हिरण्यमखिलं भवदीयमद्
य ॥ ५० ॥ अस्माकमद्य पावितं कुलमाद्दतास्म संदर्शनं परिणयस्य पदे शतो भवद् ॥ नो चेद्दवान् बहु विदग्ध स
दः क्व चाहं मद्रेण भद्रमुपयाति पुमान् विपाकात् ॥ ५१ ॥ यद्यद् गृहे त्र भगवन्निह राजते तत्तन्निवेद्यमखि
लं भवदीयमेतत् ॥ वक्ष्यामि सर्वमभिलाषपदं त्वदीयं युक्तं हि संहितममुपासित रङ्गरूपे ॥ ५२ ॥

हिरण्यमखिलं भवदीयमित्युक्तवान् ॥ ५० ॥ अद्यास्माकं कुलं पावितं वयं चाद्दतास्म विवाहव्याजात् संदर्शनं जा
तं नान्यथा बहु विदग्ध गणी भवान्क्वाहं क्व तथापि पुण्यकर्मणा कल्याणं विपाकात्पुमान् उपयाति ॥ ५१ ॥ किं बहुना
यद्यद्गृहे हे भगवन् तया विराजते तत्तदेतद् अखिलं भवदीयं निवेद्यं नैवेद्यं एवमुक्तवंतं विष्णुमित्रं हि मा भित्रः
वाचं सर्वं त्वदीयं परममाभियदाभिलाषस्यैदं भविष्यतीति वक्ष्यामि भवतात्वहमिसादिनायदुक्तं तत्सर्वं निरंतरमुपासिता

विशेषेण कोमलया वाचा सुकौ तौ विष्णुमित्र हिममित्रौ वैयं परस्पर सुकोत्तमां मुद मवापतुः अन्ये बोभये नियोज्याः प्रियसत्क
थाभिः स्वेच्छा विहार हसनैः सम्यक् मोदं प्रापुः॥ ५३॥ स्वभाव सिद्ध सुरूप वेषौ कन्या वरौ दृष्ट्वा तद्दर्शना सक्त चित्त लोकास्तु मसमर्था
अप्य वश्यं विधेय मिति कृत्वा परिकर्म अंगसंस्कारं तथाप्यस्मिन् मंगल वासरे शोभा विशेषं च विलंब माना: कृतवंत इत्यर्थः
॥५४॥ अकल्पजालमपि भूषण निचयोप्यति शायं न कृतवान् तत्र हेतुरेनयोः कन्या वरयोः प्रभया कांत्या प्रतिहता आत्मवि

एवंविधः परिनिगद्य विशेष मध्या वाचा सुतौ मुद मवापतुरुत्तमां तौ॥ अन्ये च संमुमुदिरे प्रियसत्क
थाभिः स्वेच्छा विहार हसनै रुभये विधेयाः॥ ५३॥ कन्या वरौ प्रकृति सिद्ध सुरूप वेषौ दृष्ट्वा भये पि परिक
र्म विलंब मानाः॥ चक्रु र्विधेय मिति कर्म मनीश्वरास्ते शोभा विशेष मपि मंगल वासरेस्मिन्॥ ५४
एतत्प्रभा प्रतिहतात्म विभूति भावादाकल्पजात मपि नाति शयं विते ने॥ लोक प्रसिद्धिमनुसृत्य
विधेय बुध्या पश्चात्युस्तु भयतो विशेषबुध्या॥ ५५॥ मौहूर्तिका बहु विधैः दृष्ट्वा मुहूर्त कालमप्रा
प्तुरक्षत धियं खिल तां सखी भिः॥ पश्चात्तु कं शुभ योग युते शुभांशे मौहूर्तिकाः स्वमतितो जगृहु

र्भूति र्यस्य तस्मात् नन्वेवं तर्हि किमर्थं तावल्लं कृतवंत इति चेत्तत्राह। लोकप्रसिद्धिमनुसृत्येदमवश्यं विधेयमिति बुध्वा
भयतया भूषणाद्युपुरलंकारं चक्रुर्न तु भूषणैः रेतयोः काश्चिद्विशेषो भविष्यतीति बुध्वा ५५ बहुत्वा आपज्यौ तार्यहो मुहू
र्त कालमक्षता धियं सखीभिः क्षिप्रं गृति मुभयभारतीवर्तनं तः पश्चात्तयोः शुभयोगयुक्त शुभ्र यह स्पनं वांशे मौहू
र्तिकाः स्वबुद्धितो मुहूर्तं जगृहुः॥ ५६ सती मर्हं गपटं हवेद्ध्ययन शंख घोषैर्विकुं मंडलसु परिमूर्धति सुष्ठ्वा तेसति

हिममित्रस्तनु र्विश्वरूपो हस्त किसलयेन श्री विष्णुमित्र कन्यायाः सरस्वत्याः हस्त कमल मुक्तलक्षणो दिव्य कालेजग्राह॥ ५७॥
योयः पुमान् यं यं पदार्थं प्रार्थयते तस्मै तस्मै तं तं पदार्थं प्रदाय तदीयो तेः पुरुषैः स्तुत्यौ तयोः कन्या च रयोः शोभाग्यो पिता शिविया परि
तोषमवापतुः कल्परक्षा विव ह दुदार तासु कावलं कृतौ प्राप्त कामौ समायाचेरतु॥ ५८ अथानंतरं स्वगृह्य सूत्रोक्त मार्ग मनु
सृत्य सोविश्वरूपो वह्निमाधाय तत्र सम्यक् होमं कृतवान् पुनर्वधूर्लाजान् भार्जितधान्यानि जुहाव तद्धूमं च जिघ्रति स्मा
थ विश्वरूपो विपश्चा रग्निं प्रदक्षिणीं कृतवान् अपि ना वाद्या ऽग्निं प्रदक्षिणं कुर्वे सा तया सह सोपि तथा कृतवानित्यर्थः॥ ५९

यं यं पदार्थ मभिकामयते पुमान्यस्तं तं प्रदाय स मनः स्तुषतां तदीयो॥ देव द्रुमा विव महासुमनस्त्व युक्तौ
संहृषितौ सदा सि च र तु राप्त लाभौ॥ ५८॥ आधाय वह्नि मथ तत्र जुहाव सम्यक् गृह्योक्त मार्ग मनुसृत्य स
विश्वरूपः॥ लाजान् जुहाव च वधूः परि जिघ्रति स्म ... प्रदक्षिणमथाकृत सोपि चाग्निं॥ ५९॥ होमावसान
परितोषित विप्रवर्गः प्रस्थापिता खिल समागत बंधुवर्गः॥ संरक्ष्य वह्नि मनया सम माग्निगेहे दीक्षा
धरो दिन चतुष्क मुवास हृष्टः॥ ६०॥ प्रातिष्ठमाने दयितेवरोस्मिनुपेत्यमाता पितरौ वरायाः॥ आभाषि
तां शृणु सावधानो बालेव बाला न तु वेत्ति किंचित्॥ ६१॥ बाले रियं क्रीडति कंदुकाद्यै र्जातक्षुधा गेहमुपैति
दुःखात्॥ एकेति बालागृह कर्म नो का संरक्षणीया निजपुत्रि तुल्या॥ ६२

होमांत परितोषिता विप्रा श्रेष्ठा येन प्रस्थापि
ताः सर्वे समागताः बंधुवर्गा येन स विश्वरूपो ऽनया सरस्वत्या सह दीक्षाधरोग्निं संरक्ष्य हृष्टः सन्नाग्नि गृहे दिन चतुष्टय मु
वास॥ ६०॥ अस्मिन् विश्वरूपे प्रियवरे प्रस्थानं कुर्वति सति वरायाः कन्यायाः माता पिता चागत्य प्रोचतुः सावधानो भूत्वा
शृणु बालास्त्र न वधूः यथा किंचिन्न जानाति तथा यं बाला सुकुमारांगी अस्मत्पुत्री न तु किंचिज्जानाति॥ ६१॥ इयं के

३३ दुकाद्यैः क्रीडोपस्करैः बालैः सह क्रीडितुं जातक्षुधा दुःखाद् गेहमायाति ननु भवत्यां गृहकर्मणि कुतो नानुशिष्टेति चेत्त
त्राह। एकेति कुलेयं बाला गृहकर्मनोका तस्मान्निजपुत्रिवत्त्वास सम्यक् रक्षणीयाऽऽदृत्य॥ ६२॥ किं तर्हि सर्वथैव गृहक
र्मणि न नियोक्तव्या नेत्याह तु रंगेति संबोधनम् इयं बाला मृदुभिः वचनैः नियोज्या कर्तव्या न तु रूक्षवचनैर्यतस्तैः कु
पिता न करोति ननु रूक्षवचनैः न करोति चेत्तत्कथं मृदुवचनैः करिष्यतीति चेत्तत्र इति ये स्त्रियादृत्याह तु केचिन्मृदु न
क्तिवशवर्तिनः केचिद्विपरीतस्वभावा रूक्षोक्तिवशगा हि यस्मात् स्वभावं संहर्तुं कोऽपि जनः समर्थो न भवतीति वा॥ ६३॥
न त्वकापि कन्या बालैः सह क्रीडनस्वभावा रूक्षवचनैरपि यत्साधनैः शिक्षणीया तत्कुतो भवत्या न शिक्षितेति

बालेयं मृगवचनैर्मृदुभिर्विधेयमकार्या न रूक्षवचनैर्न करोति हृष्टा॥ केचिन्मृदूक्तिवशगा विपरी
तभावाः केचिदिहातुमनलं प्रकृतिं जनो हि॥ ६३॥ कश्चिद्द्विजातिरधिगम्य कदाचिदेनां सुदृश्य लक्ष
णमयोग्यदृनिर्दिलात्मा॥ मानुष्यमात्रिजननं भिजतदेवभावे तस्मा वचोवचनमुग्रमयोज्यमस्या॥
॥ ६४॥ सर्वज्ञतालक्षणमस्ति पूर्णमेषा कदाचित् कृतो कथायां॥ तत्साक्षिभावं प्रजितानन्यासंदिश्यना

चेत्तत्राह॥ तु करश्चित् कश्चिद् द्विजातिर्ब्राह्मणः आगत्य अस्याः लक्षणं तु दृष्ट्वा उक्तवान् मानुष्यमात्रजन
नं वस्तुतो भिजदेवभावा निजजनिर्देवभावोदेव त्वं नि सोदृशस्य भावो वा यस्या निजस्त्रीयस्य नित्यस्य भावः॥
सत्तास्वभावा विप्रायैवेषा लजनभास्विति मे दिनी॥ तस्मात्कारणात् अस्यां च ऋषुभाकं उग्रं वचनं अयो
ज्यं योजनीयं न भवति॥ ६४॥ किं चास्यां सर्वज्ञतायाः लक्षणं पूर्णमस्ति किंच कदाचिद्देषा वादं कुर्वतो वादिनोः ३३
कथायां तयोः साक्षित्वं प्राप्स्यति तु त्वेवमायामुपदिश्य असौ विप्रो जगाम॥ दृ॰ ६५ यस्यां वादोऽपि अमुक कन्यायाः
श्वश्रू रसमद्वचनेन नान्यायतः स्नुषायाः अभिरक्ष्यातस्यां यततेत तदधीनास्ति तद्वचनं रोचयति॥ हूयसं

शेतयन्यास भूतालस्मात्त वयं गेहकर्म शनैः शनैः कर्तव्यानीनैः अनमाकर्म कारयितव्यं दृसर्थः॥ उप॰ ६६ वयं सर्वेऽपि सुबुद्धिमन्तो भू
त्वा पश्चाद्धनैः उत्कर्षतां प्राप्ताः॥ ६७॥ ननु वरस्य जननीं दृष्ट्वा भवत्यां वक्तव्यमिति चेत्तत्राह तु वरस्य जननी दृष्ट्वा अभिधातुमस्म
दीयं मनः शक्तं न भवति हि यस्माद् गेहाभिरक्षणविधावद्योनदृक्पतयद्यप्येवं तथापि दृष्ट्वा कथनस्य फलमेवस्यां यतो
र्वैवस्तथैषजनस्ममुद्गयो वरस्य मातरं ब्रूयात्॥ व॰ ६८॥ अथ दानीं स्वपुत्रीं गृहिस्पतः वत्सइत्यादिनाद्वंवत्सअद्यत्व

श्वश्रूवशगाया वचनेन यत्नात् स्नुषाभिरक्ष्या यततां हि तस्यां॥ निक्षेपभूता तव सुंदरीयं कार्या गृहे कर्म शनैः
शनैस्ते॥ ६६॥ बाल्येषु बाल्यात् सुलभोऽपराधः स नेक्षणीयो गृहिणीजनेन॥ वयं सुधीभूपद्सर्व एव पश्चाद्गु
रुत्वं शनकैः प्रयाताः॥ ६७॥ दृष्ट्वाभिधातुं मनलं च मनोऽस्मदीयं गेहाभिरक्षणविधौ न हि हृद्रपत्न्याः॥
दृष्ट्वाभिधानफलमेव यथा भवेन्नो ब्रूयात्तथैष जनता जननीं वरस्य॥ ६८॥ वत्से त्वमद्य गमिताऽसि दृश॥
मधूर्ध्वी तद्रक्षणे निपुणधीर्भवसु श्रुतिनत्य॥ कुर्या न बालविहृतिं जनतोपहास्यां सानादिवापरमियं
परिलाषयेत्ते॥ ६९॥ पाणिग्रहात्स्वधिपतीसमीरितो पुरा कुमार्याः पितरौ ततः परं॥ पतिस्तमेकं शर
णं प्रजामि त्वं लोकद्वयं जेष्यसि येन दुर्जयं॥ ७०॥ मधूर्ध्वदशां प्राप्तासि हे सुभ्रु तद्रक्षणे तस्याः अधूर्ध्वर
क्षायाः रक्षणे नित्यं निपुणा धीः भव जनसमूहोपहास्ययोग्यं बालानां व्यवहारं न कुर्याः यतः सेयं लेवा
लविहृतिराव योश्चापरं न परितोषयेदिति न कारस्यानुषंगेण योज्यं कार्या॥ ६९॥ किंच पाणिग्रहणा
द्विवाहात् पूर्वं कुमार्याः पितरौ स्वाधिपती समीरितौ यस्मात् पाणिग्रहात् तु उर्ध्वं पतिः स्वाधिपतिः समी
रितो यस्मादेव तस्मात्त्वं पतिमेकं शरणं प्रजय येन शरणागमनेन परलोकद्वयं जेष्यसि इत्यर्थः॥ ७०॥

३४ किंचेहसुंदरि पत्यावभुक्तवतिमाभुंक्ष्व भोजनं त्वयान कर्तव्यं प्रयातं दीर्घाध्वानं पत्यौ गते सति तच्चिह्नोपेणअलंक्रिया मा
भवतु निमज्जनादौ पूर्वापरादिनियमोस्तिआदिपदेन भोजनादिकं ग्राह्यं तत्र निमज्जनादिकं पत्युः पूर्वं भोजनादिकं तु पश्चात्
कर्तव्यमत्र रघ्वंगनानां अरुंधती लोपामुद्रादीनां चरितमेव परं प्रमाणं एतदेव तत्र सौंदर्यमिति संबोधनाशयः ॥७१॥ किं
चपत्सो कोपात् विद्वेषात् तिर्यारोषेणैकमपि न नाच्यं एकमिति क्षंतव्यमित्यनेन न चास्तं बधनीयं केवलं क्षंतव्यमेव सतिस्थि

पत्यावभुक्तवति सुंदरि मास्म भुंक्ष्व याते प्रयातमपि मास्म भवेद्विभूषा ॥ पूर्वापरादि नियमोस्ति निम
ज्जनादौ रघ्वंगनाचरितमेव परं प्रमाणं ॥७१॥ रुष्टे धवे हि सुरुषेडन वाच्यमेकं क्षंतव्यमेव मखिलं सततु
णकर्मणिअणुकानिपुणाः अणुकोनिपुणाल्पयोरितिमेदिनी॥ शार्दू॰ ९०॰ गुरुराजस्यश्रीशंक
रस्यकीर्तिर्यशस्तल्लक्षणस्यचंद्रस्यत्रैलोक्यसौंदर्यमिस्यद्भुतमस्तियतोदिगंगनास्तत्कीर्तेः

५२

चंद्रमुत्संगे अंके निदधते धारयंति प्रसिद्धं चंद्रं तु सर्वो दिग्गगनानि नैवं कुर्वंति तथा ताराः किरणात्मकैर्हस्तै राक
र्षिकाः प्रसिद्धं चंद्रस्तु नैवं विधस्तस्य क्रमेण तारासु गमन प्रसिद्धेस्तथा घोरतरंगा रत्नं चलत्यसह्ये नत्तु वति
न तु प्रसिद्धं तं तस्य तन्न सर्वदा स्थितस्य योगात्तथा च प्रियं दुर्गा तं सम्यगालिंगति न तु प्रसिद्धं तं तथा लोकालो
काभिधपर्वतदरीलेन प्रसीदति न तु प्रसिद्धं चं द्रं प्रति तस्य तत्र गतस्याभावात्तथा शेषाख्यः फणी सर्पोस्मि
रतिं प्रीतिं दत्ते न तु प्रसिद्धस्योत्कृष्टतास्तथा च भूतस्य लोकत्रये सौंदर्यमत्यद्भुतमित्यर्थः॥१०॥ किं

उत्संगेष्विंदुं गगनानि दधते ताराः कराकर्षिकाः रागाद्घोरचलं ब्रमस्तु बदति प्रियं दुर्गा समा
लिंगति॥ लोकालोकदरी प्रसीदति फणी शेषोस्य दत्ते रतिं त्रैलोक्ये गुरुराजकीर्तिशशि
नः सौंदर्यमत्यद्भुतं॥१०॥ संप्राप्तामुनिशेखरस्य हरितामंतेषु सांकाशिनं कोल्लोलाय
शसः शशांककिरणानालस्य साहासिनं॥ कुर्वंत प्रथयंति दुर्मदसुधावैदग्ध्यसांलोपिनं
सम्यक् घ्नंति च पिष्टजांघिकतमः संघातसांघातिनं॥१२॥
मुनिशेखरस्य यत्नोलक्षण
स्य क्षीरनिधेः कल्लोला हारितां दिशामंतेषु सांकाशिनं समंतात्प्रकाशं प्राप्ताः संप्राप्तोऽभिपिपिघात
कः अभिपिधो भावस्तु गुणेन तेन तु गुणप्रलय एवमग्रे चितथा शशांककिरणानालस्य सांहासिनं सम
तात् ध्यासं कुर्वंति तथा दुर्मदा मादुर्गर्वेन सा स्फुधामाः वेदग्ध्यस्य चातुर्यस्य सांलोपिनं समंतात् लोपं
प्रथयंति तथा पिष्टजांघिकस्य जगति व्याप्तस्याज्ञानलक्षणस्य तमसः संघातस्य सांघातिनं समंतात्

घातं सम्यक् घ्नंति कुर्वंति पाकं पचंतीति वत्पुनः प्रया
गा:॥ ५२

सोत्कंठं उत्कंठया सह वर्तमानः अकुंठोऽनिवार्यः कंठीरवः सिंहस्तस्य नखरवरा नखश्रेष्ठास्तैर्हतान्मत्तग
जकुंभात्प्रसरयोन्मुक्तानां नवोन्मुक्तानां सद्यः पतितानां मुक्ताख्यमणिगणानां सुषुमं सौंदर्यमतीना
यत्यानाकुयुद्धलीलाय यथा पुनश्च मथनाक्रिया मंदराचलेन क्षुब्धस्य क्षीरसमुद्रस्य निकटवर्तिनः
सम्यक् चलायस्थूहत्तरंगास्तैः सह याभैत्री तस्याः पात्रीभूतास्तत्तुल्याः प्रभूताधिकालायति पतेः
कीर्तिमाला जयति सर्वोत्कर्षेण वर्तते॥ स्रग्धरा॥१३॥ कमलिनी लोकालोकाख्यपर्वतकंदरां

सोत्कंठाकुंठकंठीरवनखरवरक्षुण्णमत्तेभकुंभप्रसरन्मुक्तमुक्तामणिगणसुषुमाकृ
दर्शयुद्धलीला मंथाद्रिक्षुब्धदुग्धार्णवनिकटसमुल्लोलकल्लोलमैत्रीपात्री भूता जयति य
तिपतेः कीर्तिमालाविशाला॥१३॥ लोकालोकदरि प्रसीदसि चिरात्किं त्वां करक्षीगुरुप्रो
द्यत्कीर्तिद्विनाकरं प्रियतमं सांश्लिष्य संतुष्यसि॥ त्वं चाप्युत्पलिनी प्रहृष्यसि चिरात्
कस्तत्र हेतुस्तयोरित्थं प्रश्नगिरां परस्परमभूत्स्मेरत्वमेवोत्तरं॥१४॥

इतीह लोकालोकदरि त्वं चिरात्प्रसीदसि किं त्वां करक्षी गुरोः प्रोद्यत्कीर्तिलक्षणचंद्रमेव प्रियत
मं सम्यगालिंग्य संतुष्यसि एवं एषालोकालोकदरी कमलिनीं पृच्छति हे उत्पलिनि त्वं चापि चिरात्प्र
हृष्यसि तत्र प्रहर्षे को हेतुः इतीत्थं तयोः दरीकमलिन्योः प्रश्नगिरां स्मेरत्वं विकसितत्वं स्मेरत्वमेवोत्त
रमभूत्॥१४॥

५३ दुर्वानल्पगर्वग्रहिलापंडितजनता एव तूलः कार्पासकणः तस्य वातूलो वेगो वायुस्तद्वेगस्तथा वाधा अरहितो योऽगा
धबोधस्तत्त्वज्ञानं स एवामृतकिरणश्चंद्रस्तदुन्मेषक्षीरसमुद्रस्तथाभिः प्रत्यहं निर्विघ्नं प्रसर्पतः संसार
दावाग्निरुद्भूतस्य संतापस्य मेघ एवं भूतः स्फीता विशाला कीर्तिर्यस्य स शंकराचार्यो यतीनां यतिः
पतिर्जगति जागर्ति ॥ ७५ इतिहासानि महाभारतादीनि पुराणानि ब्राह्मादीनि भारतस्मृतयः
सनत्सुजातीयगीतासहस्रनामाख्याः शास्त्राणि उत्तरमीमांसादीनि भारतस्मृतीनामिति

दुर्वारखर्वगर्वग्रहिलबुधजनतातूलवातूलवेगो निर्बाधागाधबोधामृतकिरणसमु
न्मेषदुग्धांबुराशिर्निः प्रत्यहं प्रसर्पद्भवदवदहनोद्भूतसंतापमेघो जागर्ति स्फीतकीर्ति
र्जगति यतिपतिः शंकराचार्यवर्यः ॥ ७५ ॥ इतिहासपुराणभारतस्मृतिशास्त्राणि पुनः
पुनर्मुदा पि बुधैः सुबुधो विलोकयन्सकलज्ञत्वपदं प्रपेदिवान् ॥ ७६ ॥ स पुनः पुनरेक्षतादराद्
रचयेत्पाथि किंशांतिवाक्कृतीः समगाद्युपशांतिसंभवां सकलज्ञत्वबदेवशुद्धताम् ॥ ७७ ॥ ५३

हासग्रहणे नग्रहेचिह्नयगुपादानं ब्राह्मणपरिव्राजकन्यायेन समाधेयं इतिहासादीनि पुनः पुन
र्मुदापि बुधैः पंडितैः सह सुबुधः पंडिताग्रणीः श्रीशंकरो विलोकयन् सर्वज्ञत्वपदं प्राप्तवान् विबुधैः
सकलज्ञत्वपदं प्राप्तवानिति वा संबंधः ॥ ७६ ॥ स श्रीशंकरः पुनः पुनरादराद्गुरोः श्रेष्ठावैयासकीः
शांतिवाक्कृतीः शांतिपर्वस्थावाक्पंक्तीरैक्षत सर्वज्ञत्वं यथा प्राप्तवांस्तद्वच्चोपशांतिसंभवां
शुद्धतामपि समगात्सम्यगाप्तवान् तथा च केवलं सकलज्ञातेयनतेनाहो अपितु मुख्यफलं शुद्धत्व

किंच चतुराननं मुखं यस्य स चतुराननोऽपि सन्न सत्प्रपंचः प्रपंचरहितः प्रसिद्धश्चतुराननश्चतुराननश्चतुर्मुखो
हिरण्यगर्भस्तु सत्प्रपंचस्तथा पुरुषोत्तमोऽपि सन् विषयभोगसंबंधवान्न भवति प्रसिद्धस्तु पुरुषोत्तमो
विष्णुः शेषशरीरयोगित्वाद्भोगयोगी तथानंगस्य कामस्य जेतापि विरूपदर्शनं यस्य स विरूपदर्शीनो न भ
वति प्रसिद्धस्त्वनंगजेता महादेवो विरूपदर्शीनः स्वभावेन भूतो अपूर्वो अद्वयो गुरुः श्रीशंकराचार्यो जगज्ज

असत्प्रपंचश्चतुराननोऽपि सन्न भोगयोगी पुरुषोत्तमोऽपि सन् अनंगजेताप्यविरूपदृ
ष्टिनो जयत्यपूर्वो जगदद्वयी गुरुः ॥ ७८ आलोक्याननपंकजेन दधतं वाणीं सरोजासनं वेद्ग
सन्निहितक्षमाश्रियममुं विश्वंभरं पूरुषं आयराधितकोमलांघ्रिकमलं कामद्विषं कौ
विदाः त्र्यंकं तं भुवि शंकरं व्रतिकुलालंकारमंकागताः ॥ ७९ ॥

यतीस्वर्थः ॥ अत्र श्लेषमूल
कोऽपि रोधाभासः अभासत्वे विरोधस्य विरोधाभासद्व्यतद्व्यतक्ते ॥ ७८ ॥ किंच मुखपंकजे न वा
णीं सरस्वतीं दधतं ब्रह्मचारिकुलालंकारं श्रीशंकरमालोक्यांकमंतिकं समीपमागता वि
द्वांसः कमलासनं ब्रह्माणमंकिततथा सततसन्निहिता क्षमा लक्ष्मीर्यस्य तथाभूतं तं दृष्ट्वा वि
विश्वंभरं पुरुषं श्रीविष्णुं शंकितं तथा आर्यैराधिते कोमले चरणकमले यस्य तं कामद्विषं महा
देवं शंकितं ॥ शार्दूलविक्रीडितं ॥ ७९ ॥ किंचैकस्मिन्पुरुषोत्तमे भगवति रामचंद्र इतिमती

५३ ममोन्युद्रुग्रांसीलालक्षणांसतोमायाभिक्षुणा रावणेन हृतां तां बुधवैरिणो दंष्ट्रिणो राक्षसान् जित्वा अनेकपुरुषे
अभ्रष्टपुरुषराक्षसेरावणेअसक्तिरितिरामचंद्र निषादक्षमान्निष्ठुरांनैष्ठुर्येण यत्किं प्रविष्टा मन्येभ्रष्टपुरुषस्य
रावणस्यस्यस्मिन्नासक्तिक्षमान्तंप्रतिनिष्ठुरामितिवाभ्रष्टपुरुषस्य रामचंद्रस्य स्वस्मिन्नासक्त्या
यक्षमान्निष्ठुरामितिवायो रामचंद्रात्समानवतीर्णः शिवः स्थिरप्रियतया प्रत्याहरत्सत्रिजगतांत्राता नो

एकस्मिन्पुरुषोत्तमेरतिमतीं सत्तामयोन्युद्रुग्रां मायाभिक्षुहृतामनेकपुरुषासक्ति
क्षमान्निष्ठुरां। जित्वा तान्बुधवैरिणः प्रियतया प्रत्याहर द्योऽपि राद्धस्तैतापसकेत
वात्त्रिजगतां त्राता स नः शंकरः॥ ॥ ॥ ॥ इति श्रीमाधवीये तद्दृष्टुद्राष्टम
वृत्तगः संक्षेप शंकरजये चतुर्थः सर्गः अभवत्॥ ४॥ ॥ मूलसंख्या १०८॥ ॥

अस्माकं सुखकरस्तापसकेतवाद्युतिवेषमिषाद्दस्तेनत्रिजगतां त्राता शंकर इति वा त्रियस्य
रामचंद्रात्मनावतरणप्रकारस्तु स्कंधपुराणादवगंतव्यः पक्षे एकस्मिन् अद्वितीये पुरुषोत्तमे
क्षराक्षरातीतपरमात्मनि रतिमतीं जन्मादिदृश्यासत्तां मायाभिक्षुभिः क्षणिकविज्ञानवाद्या ५४
दिभिर्हृतामनेकात्मप्रसक्तिक्षमान्निष्ठुरां तां बुधवैरिणो जित्वा यस्त्वं प्रत्याहरत्स
मानमस्त्वत्॥ ११०॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यबालगोपालतीर्थश्रीपूज्यपादशिष्य
दत्तवंशावतंसरामकुमारसूनुधनपतिसूरिकृतश्रीशंकराचार्यविजयडिंडिमेचतुर्थः सर्गः संख्या
४५०

श्रीगणेशाय नमः॥ एवं प्रारूतजनविलक्षणं तस्य बालचरितमुपवर्ण्य तुर्याश्रमस्वीकृतिमुपवर्णयितुं प्रस्तौति इतीत्युक्तप्रका
रेणास्सप्तमवर्षे सर्ववेदपारंगततां प्राप्तो बटुर्ब्रह्मचारी गुरोः कुलात्परिवृत्य परिवर्जनं समावर्तनं विधायगुरुकुलेयासं संसमा
प्य महायशाः गृहे जननीं पर्यचरत्स सम्यक्सेवितवानिधियो॥ १॥ मातरं परिचरन्नधिदं पठंश्च मुनुवृत्रेष्ठः स्वायंभुवादिभिः
राजिमर्यसंप्रज्ञायां निम्याभितं प्राप्तः सवनं तृतीयसवनमितिवेरूपं सवनद्वयं नहि सूरौ परिप्रजयन्स छिशुः भानुवदं

इति सप्तमहायने खिलश्रुतिपारंगततां गतो बटुः॥ परिवृत्य गुरोः कुलात् गृहे जननीं पर्यचरन्महा
यशाः॥ १॥ परिचरन् जननीं निगमं पठन् अपि कृताग्निरवीसवनद्वयं॥ मनुवरैर्नियतं परिपूजयन् शिशुर
वर्तत संस्तरणिर्यथा॥ २॥ शिशुमुदीक्ष्य युधापिनमन्युमानृद्दिरोतिरद्भुतमो धिनिजासनं॥ अधिकरो
तिजनः करयोर्युगं वृगतो यिहिताञ्जलितत्क्षणात्॥ ३॥ मृदुवचश्चरितं कुतालां मतिं वपुरनुत्तममा
स्यद मोजसां॥ सकलमेतदुदीक्ष्य सुतस्य सा सुखमवापनिरर्गलमंबिका॥ ४॥ श्रीशंकरप्र०

वर्तत मनुवरैः नियतं यथास्यात्तथा परिपूजयन्निति वा द्रुत० २॥ किंचशिशुं श्रीशंकरं दृष्ट्वा क्रोधाद्यालमो युधा
धिकोपवानपि न भवति तथास्य द्भुतमोस्संतमादरणीयाः पीठासनं ददाति अपि च तत्क्षणात् आदरेण क्षणा
मलं चोयस्मिं स्तत्वरितंद्रुतिवा ओजसां मनआदि बलानां आस्पदं आश्रयभूतं वपुः शरीरं कृतस्यैतत्
सर्वमवेक्ष्य सा सती कुमारजननी निर्गलं अप्रतिबद्धं सुखमवाप॥ ५॥ ॥ ॥ ॥

५५ कदाचिदस्य श्रीशंकरस्य माता हि प्रसिद्धं मंदं गमनं यस्याः सा समुद्रगां नदीं प्रति स्नानार्थं गता सूर्यमंडले आतपे नोग्राः किरणा यस्य तदा तादृशे सति तपसा कृशा तनुः शरीरं यस्याः सा सती विलंबं कृतवती इत्यर्थः ॥ स्वा० ५ ततस्त दाविगतकर्दमेन जलेनार्द्रैः पंकजैर्वीजयन् उपगतः जनेन जनसमुदायेन सह सदनं प्रति निन्ये ॥ ६ ॥ अथ न

आतुमंदगमनास्य हि माता तां स्नातुमंबुनिधिगां प्रतियाता ॥ आतपोग्रकिरणे रविबिंबे सात
पः कृशतनुर्विललंबे ॥ ५ ॥ शंकरस्तनु वां कितवित्तः पंकजैर्विगतपंकजलार्द्रैः ॥ वीजयन्नुपग
तो गतमोहां तां जनेन सदनं सह निन्ये ॥ ६ ॥ सोथ तेनु मननघचरित्रः सन्नतो निकमषी
श्वरपुत्रः ॥ अस्तुवज्जलधिगां किल हृद्यैर्वस्तुतः स्फुरदलंकृतपद्यैः ॥ ७ ॥ दूहितं तव भविष्य
ति काल्ये यो हितं जगत इच्छसि बाल्ये ॥ दूसवाप्य स वरं तटिनीतः सस्वयाकुसदनमापविनीतः ८

यनाभंतरं दोषरहितचरित्रः ऋषीणामीश्वरस्य शिवगुरोः पुत्रः श्रीशंकरः गरुकस्य समीपं से तुं समुद्रगां
नदीं कवीनां मनोज्ञैः वस्तुतः स्फुरंति अलंकृतानि च तानि पद्यानि च तैः नत्वा पालनैः स्फुरदलंकृतप
द्यैः अस्तुवत् ॥ ७ ॥ तेन स्तुता संतुष्टा नदी उवाच सर्वं ई हितमा भिलषितं कल्पयति त्वंसा मिति काव्ये प्र
तः काले भविष्यति आमोद्यत्र्येति कल्येपि किलतः प्रत्ताक्षणिरूपं प्रस्रूपो अर्हुर्नुरंकाल्प भिसमर ॥
यस्त्वं बाल्याच स्यायां जगतो हितं भिघस्ति दूसेवं प्रकारेण नदीतः वरं प्राप्य सलवञ्चनः श्रीशंकरः सदनं प्राप

वीत्तिन वायुना आहृतैः जलकणैः पथिभितो लोकः प्रातरेव माधवस्य लक्ष्मीपतेः विष्णोः समया सदनं मंदरस्य समी
पे प्रवहंती तां धुनीं नदीं नूतनामिव समलोकत ॥ ९ ॥ एवमनेन प्रकारेण मर्त्यानतिक्रांतानि चरित्राणि यस्य तं से
वमानानां जनानां मनोरथपूर्णत्वे दे लस्य फलीभिर्वृक्षदकमेन श्रीशंकरं द्रष्टुं भिक्षुः आहुताभिक्षवो येन स केरल
क्षितिपतिः राजसेखराख्यः स चिरं अमात्यं प्रविहितवान् ॥ १० ॥ स अमात्यो धिं तस्य समम तंद्रितम नलसमतं उत
यथा स्यात्तथेति ना भीर्भयं यस्य र्जितउपदीपतदूरुक्पद उपायतं श्रुतान्नदाने अतश्चोपसर्गा दूरस्थ उपायनमुपयास्य

म
प्रातरेव समलोकत लोकः शीतवातहृतशीकरपूतः ॥ नूतनामिव धुनीं प्रवहंतीं माधवस्य सया
सदनं तां ॥ ९ ॥ एवमेनमतिमर्त्यचरित्रं सेवमानजनदैन्यलवित्रं ॥ केरलक्षितिपतिर्हि दिदृक्षुः
प्राहिणोत्सचिवमाहृतभिक्षुः ॥ १० ॥ सोप्यतंद्रितमभीरुपदाभिः प्राप्य तं सहनुसद्धिरदाभिः ॥ उ
क्तिभिः सरसमंजुपदाभिः शक्तिमत्सममजिक्षिपदाभिः ॥ ११ ॥ अस्य नैव सदृशो भुवि वोढा
दृस्तरणविरः स च योद्धा ॥ तस्य केरलनृपस्य नियोगाद्वश्य सेमम च सत्कृति योगात् ॥ १२ ॥

उपहारस्तथोपदेत्यमरः ॥ उपदाभिरुपायनभृताभिः समीचीनाभिः द्विरदाभिः करेणुभिः सह तं श्रीशंकरं
आप्य लब्ध्वा नत ः प्राप्य पश्चात् सरसानि मनोज्ञानि पदानि यासु सरसानां वृत्तिवा एवंविधाभिः उक्तिभिः
शक्तिं विवासामर्थ्यं वा बिभ्रती ति शक्तिमत्सम विवः अजिक्षिपत समं यथा स्यात्तथा विज्ञापितवानिति या ११
ताएवदृश्यतिय स्य सदृशेण वोढारणाम र्धस्त्यु क्तकर्तासच भुवि नैव दृश्यते तस्य केरलदेशाधिपतेः राज्ञा
तस्त्वं सर्वोत्तमो द्वस्यसे न नु अन्य एव तन्नियोगादागसमाकुतो दृष्टवान् भवानेव यथापूर्वमिसानां क्वाहमम सत्कृतैः

५६

अथराज्ञः प्रार्थितप्रदानपात्रतामस्य चानयतं सुस्तवयन्प्रार्थयते। राजितेति। तेइ्दीप्तिमद्भिः अग्नैः सुवर्णवस्त्रैः विलसं
तः शोभंतः भूजिताः पूजांप्राप्ताः अचिरयाभिः स्वर्थाभिः सरसा रसयुक्ताः श्लाघ्यताः ना कथाभिः ताभिः रंजिताः अपरेषा
मन्येषां गिरो वाचो येस्ते पंडिताः यस्य सदसि सभायां वसंतः वसंतीत्यर्थः। अभ्रं मेघो वारिवाहः इत्यमरः। अभ्रं मेघे
च गगने धातुभेदे च कांचने इति मेदिनी। १३। अजो संग्रामे जिताः सर्वे महीपाः भूमिपालाः येन अत एव स्तूयमानौ चर
णौ यस्याः स एव कुलस्य दीपो दीपवत्प्रकाशकः सोयं राजा भवभाजां संसारभजतां मम च नपाले कृतवन्दरणरे
णुमादरेण धियं तु लभतां अभ्यर्थना यां लोट्। १४। तत्रानीतां सुपरां सुमेरुं समर्कं गजं दर्शयति एष सिंधुरवरोहति

राजिताभ्रवसनैर्विलसंतः पूजिताः सदसि यस्य वसंतः। पंडिताः सरसवाक्कथाभिः रंजिता
परगिरो विलथाभिः। १३। सोयमजि जितसर्वमहीपः स्तूयमानचरणः कुलदीपः। पादरेणुम
वनं भवभाजामादरेण लवयिंद तु राजा। १४। एष सिंधुरपरोमदपूर्णो दीर्घगंधरहितः प्रवितो
पः। अस्तु तेच रजसा परिपूतं वस्तुतो नृपगृहं शुचिभूतं। १५। दृत्स्य दीर्घपरिसाधितहालं
प्रस्फुरीरितसदुक्तिममात्यं। अस्त द्वारमथ भिः परिगृह्य स्तंभस्फवाच्च वचनं क्रमनाशत्। १६।

श्रेष्ठो मदेन पूर्णः दीर्घस्य गंधेनापि वर्जितः। प्रविनीतो विनीतो स्रामेण दन्तः तस्मात् स्वतः शुचिभूतम
पि नृपगृहं तव चरणरजसा परितं आसमंतात् सितपवित्रमस्तु। १५। एवं युक्ति युक्तसचिव वाक्यमु
दाहत्य तदुत्तररूपं श्रीशंकरवाक्यमुदाहर्तुमादौ पूर्वप्रकारेण दीर्घिकापरिसाधितं दृत रूपं येन
प्रस्तुरीरिताः प्रस्तुस्तारिताः सतामुक्तयः समीचीनाउक्तयो वायेन समममात्यं सचिवं भीतिक्रमनशः क्रमेण वचनं

तदुदाहरति। भैक्ष्यं भिक्षासमूहरूपं अन्नं परिधानमाछादनमजिनं मृगचर्म विधानं कर्तव्यं नियमेन रूक्षमेव कष्टसाध्यमेव त्रिका
लस्नानादि कर्म कर्म प्रतिपादकवेदादि शास्त्रं हे दृत तवरस्त्वा मेद्यावनां दृशादृक्सुखदा यिनां वेदानां प्राप्तोपदूना कुत्रालाना
पदूनां ब्रह्मचारिणां शास्त्रविद्यविधानं श्रुतिस्मृत्यादिनियमेन रूक्षमेव कर्म तत्रापि नियमेन तेचान्। स्त्रीस्पर्श ग्रा
मेद्रावीति कर्मणा बाधित्वा भ्रामणं। १७। तथान्येरं विधा ब्रह्मचारिणो येनेजं स्वीयं कर्म विहाय कुभिपुरोगः भोग्यं त
दृतिभोग्याविषयास्तैरभिपुरःसरैः कुत्सितैः विषयसंभोगैः किं कुर्महे अहेति प्रसिद्धार्थक मध्ययार्थिकं नामव्ययं तहि

भैक्ष्यमन्नमजिनं परिधानं रूक्षमेव नियमेन विधानं। कर्म दृत्त वरशास्त्रविबूनां शर्मदायि निगमा
प्तिपटूनां। १७। कर्म नैजमपहाय कुभोगैः कर्महे किमु कुभिपुरोगैः। पृच्छ यासु स्वमं मास्य मयेतं गच्छ ना
थमसरूक्तथयेत्थं। १८। प्रस्तुत क्षितिभृता खिलवर्णी वृक्षपाहरणतो विगतवर्णाः। धर्मवर्त्मनि
रतास्वनीयाः कर्मवर्ज्यमितिनो वचनीयाः। १९। इत्यमुष्यवचनादकलंकः प्रसभालुनरमास्य
मृगांकः। वृत्तमस्यसनिशम्य धरायाः सन्तमस्य सन्निधं स्वयमाप। २०। श्रीशंकरप्रसन्न।

मयाकिं विधेयमित्याकांक्षायामाह। हे सचिवकर्तृक पृच्छ यासु स्वं यथास्यात्तथा यथेतं यथागतं तथा गच्छ
दृत्यमनुना प्रकारेण असदृशं नकथयेः। १८। यत्त्वयोक्तं तद्द्वृद्धिः कर्तव्यं न भवति अस्तु तत् भूमिपेन सर्वे वर्णो
ब्राह्मणाद्याः वृक्षपाहरणतः स्वलत् दुर्गाणि तत्शुद्धजीविकासंपादनेन विगता निरुद्धार्चि विधित्सुणानि ये ध्यस्त
था विधा धर्ममार्गे निरताः रक्षणीयाः स्वीयं कर्म वर्ज्यमिति नो कथनीयानेव कर्तव्याः। १९। ततः किं वृत्तमि
त्याकांक्षायामाह। इत्येवं विधादमुष्य शंकरस्य वचनात् पूर्णमास्यचन्द्रश्च राजर्षिरेक सत्त्वकं निवर्णनमकलं
कः पुनः प्रसंगात् स्वस्वामिनं प्रतिगमनं कृतवान् स भूमिपो अस्य वृत्तं कलाअकलंकस्य श्रीशंकरस्य

DR. BHAU DAJI MEMORIAL
DR. BHAU DAJI MEMORIAL

५८

चतुर्थश्लोकस्थंमुनिवरस्यकुमारंविविनष्टि भूस्कराणांभूमिदेवानांब्राह्मणानांअर्भकवरे बालकश्रेष्ठः परिवीतंप
रितोव्याप्तंभास्वरैर्दीप्यमानैः भास्वरस्यचोडपस्यचंद्रस्यगभस्तिभिः किरणैरूपस्यमुपवीतंयज्ञोपवीतमस्य
अच्छास्वच्छाआजंकुस्कतागंगातथाविलसंतंक्रमयंतंनगंहिमालयमिवसुच्छविंसुच्छविःकांतिर्यस्यतं॥२१॥
कृष्णहरिणस्यचर्मदधानंसर्वमुच्चितंकर्मपरिदधानंतन्नवमेघतुल्यंअंबरमस्यास्तीतितथातंश्रुतनायाःकं
सप्रेषितायाः अरिःशत्रुःकृष्णस्तस्यसहजंभ्रातरंवलभद्रंतुल्ययंतंनलुलयंदधानं॥२२॥जातरूपस्यस्वर्ण
स्यरुचिर्यस्यरुचिर्यस्यतस्यमुंजिसंकेतंस्यलक्षणविशेषस्यसुधाम्नासुष्ठुतेजसाआश्चर्यमंदिरेणच्छातं

भूस्करार्भकवरैःपरिवीतंभास्वरोडुपगभस्त्युपवीतं॥अच्छजंनुसुतयाविलसंतंसुच्छविंनग
मिवद्रुमवंतं॥२१॥चर्मकृष्णहरिणस्यहरिणस्यदधानंकर्मकृत्स्नमुचितंपरिदधानं॥नूतना ५८
(बुदनिभांबरवंतंश्रुतनारिसहजंतुलयंतं॥२२॥जातरूपरुचिमुंजिसुधाम्नाच्छातरूपकटि
भद्रतधाम्ना॥नाकभूजमिवसत्कृतिलब्धंपाकपीतलतिकापरिरब्धं॥२३॥सस्मितंमुनि
वरस्यकुमारंधीस्मितानरपतिर्बकुवारं॥संविधायविनतिंवरदानेतंविधात्ससद्रत्नभुवि
मेने॥२४॥तनपृष्ठकुशलःक्षितिपालःस्वेनपृष्टमयमाननकालः॥हाटकायुतसमर्पणपूर्वंनाटक

छन्नरूपंयस्यास्तत्तथाभूताकटिःश्रोणिर्यस्यसत्कृतिःसुकृतंतत्परलब्धंपाकेनपरिणत्यापीतापालीति
काःसूक्ष्मलतास्ताभिःपरिरब्धमालिंगितंस्वर्णभूमिजंकल्पद्रुममिव॥२३॥स्मितेनमंदहासितेनसहितंमु
निवरस्यौद्धवपुत्रोःकुमारंनरपतिर्बकुवारंप्रणतिंविधायतंभुविवरदानेब्राह्मणासमंमेनेतुर्वीत्सस्य
विनतिमिसनेनत्यासवंध॥२४॥तनश्रीशंकरेणपृष्ठकुशलेयस्मैसनात्रेयस्यतत्तुसमहस्यस्तत्र
संबंधिनावालोकातकोभूमिपालःदशासहस्त्रसरव्याकस्य्वर्णमुद्रासमर्पणपूर्वकंस्वेनरचितमपूर्वंनाट

६

नाटकत्रयंविविनष्टि तद्विस्थर्थंनुतन्नाटकत्रयंशृंगारहास्यकरुणारौद्रवीरभयानकाःवीभत्साद्भुतसंज्ञौचेत्यष्टौनाट्येर
साःस्मृताःइत्युक्तैःरसैःआर्द्रैःगुणैःथरसस्यांगिनोधर्माःशौर्यदाक्षिण्यइवात्मनःउत्कर्षहेतवस्तेस्युरचलस्थितयोगुणाः
माधुर्यौजःप्रासादाख्यास्त्रयस्तेनपुनर्दश॥आल्हादकत्वंमाधुर्यंशृंगारेद्रुतिकारणंकारुण्येविप्रलंभेतच्छांतेचातिश
यान्वितंदीप्त्यात्मविस्तृतेर्हेतुरोजोवीररसस्थितिःविभित्सरौद्ररसेरमास्तस्याधिक्यंक्रमेणचशुष्कंधनाग्निवत्स्वच्छ
जलवत्सहसैवयःव्याप्नोत्यन्यत्प्रसादोसौसर्वत्रविहितस्थितिरित्युक्तेःगुणाःरीतिर्नामगुणाश्लिष्टावर्णसंघट्टना
मता॥वैदर्भीगौडीपांचालीरूपकत्वाभिःरीतिभिश्चविशिष्टंयुक्तंतथाभद्रसंधिभिःश्रेष्ठसंधिभिःसुंदरंसोपनी

तद्रसार्द्रगुणरीतिविशिष्टंभद्रसंधिरुचिरंसुकवीष्टं॥संग्रहेणसनिशम्यसुवाचंतंप्रहाणवर
मित्यसुभूत्य॥२५॥तानितांतहृदयंगमसारांगांनिशम्यतुलितामृतधारां॥भूपतिःसरचितांज
लिबंधःस्वोपमंसुतभियेवसुबंधः॥२६॥श्रीशंकरप्रसन्न॥श्रीसांबांगावेनमः॥श्रीः॥

भएकेनप्रयोजनेनअखिलानांकथांशानांअवांतरप्रयोजनसंबंधः॥तत्रपंचसंधयःतदुक्तंदशरूपके॥मुखं
प्रतिमुखंगर्भःसावमर्शोपसंहृतिः॥मुखंबीजसमुत्पत्तिर्नानार्थरससंभवा॥लक्ष्यालक्ष्यस्यबीजस्यशक्तिःप्रति
मुखंमतं॥गर्भस्तुदृष्टनष्टस्यबीजस्यान्वेषणंमुहुः॥दुनायेनकेनापिविमर्शःसंधिरिष्यतेबीजवतांमुख्याद्यर्थानां वि
प्रकीर्णानांयथायथंएकार्थंमुपनयंसयत्रनिर्वहणंहितादृशादिसंधिभिर्भद्रतंग्राम्यचेष्टारहितंनिसुकले
अतएवशोभनकवीनांइष्टंकविपुङ्गवशोभनत्वंररसत्वादिलक्षणनाटकत्रयंसश्रीशंकरःसंग्रहेणाकर्ण्यसुपुत्रोक्ति
तमसुराजानवरंप्राहाणितत्याचि॥२५॥नितांतमत्यंतंहृदयंगमोमनोहरःसारोयस्यांतुलिताःमृतधारायया
तांगायत्रंवाणिंतिवाचंनिशम्यरचितांजलिबंधोयेनसवद्धांजलिःस्वस्यसधाप्रतिज्ञायस्यासभूपतिःस्वोपमं

एवंप्रार्थितः श्रीशंकरः तं राजानं उवाच एतद्वर्षसहस्रसंख्याकं हाटकं मम हिताय नास्ति तर्हि किं यत्कर्तव्यमिति
तत्राह नोऽस्माकं गृहवासिजनाय तु देहि तत्तेहि तं मनसाभिलषितं शीघ्रं भविष्यति तस्मात्पूर्णमनसा शीघ्रं
याहि गच्छेति मध्यमणिन्यायेन शीघ्रपदमुभयत्र संबध्नीयं ॥ २८ ॥ एवं जनस्य मा ✱ जउ का पुनाऱ हासिरएकांत
राजवर्यकुलस्य दृष्टिनिमित्तं तां कृतिविख्यातां श्रुतिप्रसिद्धां चित्तं क्लीबे दधने चाथ्य लिंगं ख्यातं सिंशो रितरति
मेदिनी ॥ अस्य रात्रिः सकलेष्टानां विधाता परमात्मा तस्य दृष्टिं प्रजां आजहार तत्र कारमुक्तवान् । तथाह

नो हिताय मम हाटकमेतद्देहि नस्तु गृहवासिजनाय ॥ ईहितं तव भविष्यति शीघ्रं याहि पूर्णमन
सेत्यवदत् ॥ २८ ॥ राजवर्यकुलदृष्टिनिमित्तां आजहार रकसिकृतिमितां ॥ दृष्टिमस्य सकलेष्ट
विधातुः स्पष्टमाप्रकृतया हि तिनेता ॥ २९ ॥ स विशेषविदासभाजितः कविमुख्येन कला
मृतांबरः ॥ अगमत्कृतकृत्यधीर्निजां नगरीमस्य गुणाननुदीरयन् ॥ ३० ॥ नहवः कृतिपौरुष
नः कवयो ध्येयपतत्रं करात्तु रोगमहतः सुमहांतिदृर्शनात्मकं धर्गतुं फणिराजकोविदाली ॥ ३१ ॥ प
ठितं श्रुतमादरात्तु नः पुनरालोक्यरहस्यनूतनं ॥ प्रविमर्म्यनिमज्जनं सुखेन सविधेयान् निदध्यतमां

ष्य । भूमिनेता राज्ञा तुष्टिमापेत्यर्थः ॥ २९ ॥ एविशेषज्ञेन कविमुख्येन श्रीशंकरेण सभाजितः पूजितः कला
नतां मध्ये श्रेष्ठः कृतं कृत्यं यथा सा बुद्धिः यस्य स राजा अस्य गुणान् वर्णयन् स्वीयां नगरीं अगमत् गतवान् इति
॥ ३० ॥ एवं केरलभूमिपतेः वरप्रदातादिकं मुपवर्ण्य वृत्तांतांतरं वर्णयितुमुपक्रमते बहवः कृतिपारदृश्वनो
वेदपारदृष्टवतः वयस्यः श्रीशंकरात् महतः गुरोर्महांति दर्शनानि शास्त्राणि फणिराजस्य शेषस्य कृत्यालताम
भिगंतुं अध्येषत अध्ययनं कृतवंतं तदर्थः ॥ ३१ ॥ पठितं कृतमनूतकमरसं दमादरात् रहस्यकांतं आलोक्य प्रविमर्श्य

विनीतरागलीविनीतस्वार्थ वसं ॥ ३३ अन्योन्ययोगस्य परस्परसंयोगस्य चिरहस्वनयोः शंकरसज्जनन्योः असत्वोप
चपि तथापि वोढुं परिणयं कर्तुं नेच्छति स्म तत्र हेतुमाह । मनुष्यभावाद्दूयाभिदेवत्वात् भरुं प्राप्तः किं दुःष्युरेतं दुष्टस्था
नमभिवांछति नैव वांछतीत्यर्थः ॥ ३४ ॥ आसाम्य बधव श्रुतं आप्तां श्रुत अथ च श्रुतिवारुतां संपादितां विद्यायन तत्तमसुंस्रि

सर्वार्थितत्वविदृपि प्रकृतोपचारैः शास्त्रोक्तभक्त्यतिशयेन विनीतरागली ॥ संतोषयन्स जननीमनयत्कि
यंतिसंमानितो द्विजवरैर्दिवसानिधन्यः ॥ ३३ ॥ सा शंकरस्य शरणं स्वतरज्ञनन्यां अन्योन्ययोग
चिरहस्वनयोरसत्वः ॥ नोवोढुमिच्छति तथाप्यमनुष्यभावात् मेरुंगतः किमभिवांछति दुष्यदेशं ॥ ३४
कृतचिद्घमसुं चिकीर्षितः श्रितगार्हस्थ्यमथाप्रबंधयन् ॥ अनुरूपगुणाभिर्वितयन् ननयद्येषु कु
लेषु कन्यकां ॥ ३५ ॥ अथ जातु दिदृक्षवः कलावतीर्णं मुनयः पुरद्विषं ॥ उपमन्युदधीचिगौतम
त्रितलागस्त्यमुखाः समाययुः ॥ ३६ ॥ प्रणिपत्य सभक्तिसन्नतः प्रसवित्र्या सहितान्विधान
वित् ॥ विधिवन्मधुपर्कपूर्वया प्रतिजग्राह सपर्यया मुनीन् ॥ ३७ ॥

तं गार्हस्थ्यं येन एवं चिकीर्षितं चिकीर्षवः
कर्तुमिच्छवो अनुरूपा गुणा अस्यास्तथाभूतां कन्यकां दोषवर्जितेषु कुलेषु चिंतयन् चि ॥ ३५ अथानंतरं जातु
कदाचित् त्रिपुरघ्नं महादेवं कलिस्युगे श्रीशंकरात्मना अवतीर्णं दिदृक्षवो द्रष्टुमिच्छव उपमन्युप्रमुखा मुनयः समाययुः
॥ ३६ ॥ नम्रास्सम्यक् नताः नम्रः प्रसवित्र्या जनन्या सह प्रणामपूजादिविधानवित्स श्रीशंकरस्तान्मुनीन् प्रणिपत्य प्रकर्षेण
नतो मधुपर्कः पूर्वं आदौ यस्याः तया सपर्यया पूजया प्रतिजग्राह स्वागतं कृतवानित्यर्थः ॥ ३७ ॥ श्रीशंकर ॥

विहितांजलिनाविपाश्रितान्दिदुषाओरीकारेणभगवंतएतानिआसनानिपरिग्रह्यतामितिविज्ञप्तेनयपूर्वकयोकथाआर्थितांविष्ट
राउसिनानियेभ्यस्तेपरमार्थस्यसंश्रयेभ्येयांतेमोक्षुनिष्ठाअमीऋषयःअमुनाओंकारेणसहकथाःकृतवंतःमोक्षाश्रया
इतिकथानांवाविशेषणं ३८ कथानामंतरेतत्कालेस्थलेसर्वत्तस्यजननीमुनीनुवाच्य मद्युवाच्यतदाहवयमद्यकृतार्थता
प्राप्तायद्यस्माद्भगवंतोगृहानुपागताः॥३७॥भवदागमनेनकेवलंकृतार्थतामाःएवसंपादकमपितुजन्मांतरीयानंत
सुकृतस्त्वकमपीत्याहायेनाहकेलिबहुदोषभाजनंकलिःअत्रकचयुष्मच्चरणावलोकनंअभान्वसमस्तदोषाभवे

विहितांजलिनाधिपाश्रितान्दिनयोक्तार्थितविष्टराउअमी॥ऋषयःपरमार्थसंश्रयाअमुनाशाक
मनीकरन्कथाः॥३७॥जिज्ञगारकथांतरेमुनीन्जननीतस्यसमस्तदर्शिनः॥वयमद्यकृतार्थतांगता
भगवंतोयदुपागतागृहान्॥३७॥कलिर्बहुदोषभाजनंक्वचयुष्मच्चरणावलोकनं।तदलभ्यत
चेत्सुरकृतंसुकृतंनःकिमितिप्रपंचये॥३८॥शिशुरेषकिलातिशैशवेपददोषागमपारगोभवत्॥महि
मापियदद्भुतोस्यतद्ध्यमेनकुरुतेकुतूहलं॥३९॥करुणाद्रहशानुगृहस्वतेस्वयमागसभवद्भिरप्ययं॥
यदितास्यपुराकृतंतपःश्रममाकर्ण्यखिलंमयायादि॥४०॥
कलियुगेअलभ्यंतत्युष्मच्चरणावलोक
नमलभ्यतचेत्तर्हिनोस्माकंपुराकृतंपुण्यंकिमितिप्रपंचयेनकथयामिस्पष्टमित्यर्थः॥३८॥एवंस्फुटसाअभि
मुखीकृतान्मुनीन्किंचित्प्रश्नमारभतेशिशुरिति।एषमन्मयोत्पन्नःशिशुरतिबाल्येसर्वागमपारगोभ
दभवत्महिमापियदद्भुतोभवदत्तदयंकुतूहलंकुरुते॥३९॥भवदागमनमप्येतदद्भुतमाहात्म्यसूचकमित्या
शयेनाह॥भवद्भिरप्ययंतावत्स्वदर्शनेनपवित्रत्वादिस्वयमागसत्वाधिकरुणाद्रहशायमनुगृहस्वतेतस्मादस्यपुरा

इत्येवंप्रकारेणसादरंयथास्यात्तथासप्तसोद्धारितांवाचमाकर्ण्यसादरमाकर्ण्यपतितांमहर्षीणांसंसदिसभायांतैरेवप्रेरितोअ
तिहृष्टोअगस्त्यःप्रतिवक्तुंप्रचक्रमे॥४१॥साक्षाच्छिवएवतपसाअतितपसासमाराध्यअन्धोनतयंकश्चित्तपस्वीसा
शयेनाह॥तत्रप्रायेणतत्रकिंचित्पतिव्रतेयंतनयप्राप्त्यर्थंतपसाप्रसादितोरजनीवल्लभस्यचंद्रस्यखंडोमंडन
मलंकारोयस्यसनिरालंकरकलाभूषणोभगवान्शंकरोस्यनमुपाददेभोक्तिवानत्वयासदैवतनयपल्लतपक्लस

इतिसादरमीरितांतयागिरमाकर्ण्यमहर्षिसंसदि॥प्रतिवक्तुमभिप्रचोदितोघटजन्माप्रचक्रमे॥४१॥सनयाप्यपुरापतिव्रतेतनयप्रत्यातपसाप्रसादितः॥स्मितपूर्वमुपाददेवचोरजनी
वल्लभखंडमंडनः॥४२॥वरयस्ववरांतामुपस्थितानपियासर्वमिदंमिलात्पुषं॥सुतमेकमितीरितः
शिवंमतिसर्वज्ञममयान्यतालभजं॥४३॥तदभीप्सितसिद्धयेशिवस्तवभाग्यात्तनयोभवत्स्वयमितिः॥
स्वयमेवबभूवसर्वविन्ननतोन्योस्तियतःसुरेष्वपि॥४४॥
भितिरयमेतनायसंबोधनं ४४ रेवंवचनमुदाहर
ति॥वरयस्वेतिहेसर्वविदःशतायुषःसुतान्वरयस्वापिवासर्वज्ञमल्पायुषमेकंसुतंवरयस्वेतिईरितस्त
यपतिर्हेसतिसर्वज्ञमात्मजंअभिवादयन्वितं॥४३॥तस्यतवयत्पुरभिलाषितस्याभिसिद्धयेस्वयमेवशिवोभा
ग्यान्तवतनयोबभूव॥हेयत्राशिवसेतिसंबोधयन्नतनयत्वःस्वामनार्थंबभूवेतिस्वयमतिःननुसर्वज्ञ
मन्यमपुष्पंकुतोनदत्तवानितिचेत्तत्राह॥यतःकारणाद्देवेष्वपितस्माच्छिवादन्यःसर्वज्ञोनास्तितत्रदूसर्थः॥४४॥
इत्येवंप्रकारेणतस्यागस्त्यस्यवचनंमितायुषंइत्यादिरूपंश्रुत्वासासतीमुनिश्रेष्ठंपुनरप्युवाचभोमुनेयतः

कृतंतपोयदतमयाआकर्ण्यखिलंयादृक्संयोग्यंकार्ईकृतेसर्थः ॥३०॥

६०

सकलज्ञोस्य तामुष्यामुः किय दुःखसरिमितमस्ति तत् करुणया वद यतो मिताभ्युपमितिमतुला मम त्रासो जात इति भावः ॥ ४७ ॥ एवं पृष्टो मुनि करुणार्द्र शारदः संचलसारः अथ तथा पुनरवं मिलितो बोधुरोति यावत अस्य तनयपुत्रस्य आयुः यद्यपि तथाप्यसौ ते तनयः कारणांतरात् अस्मिन् भुवने चोत्रा संचरतरात् पुनर्निवर्त्स्यति वासं करिष्यति ॥ ४८

इत्येवं प्रकारेण भाविनीं भाविष्यां कथां कुंभजेन गस्त्येन वादिनि सति मुनयस्तं निवार्य श्री शंकरं समुपामंत्र्य तेन च द्विजेन सह यथागतं जग्मुः ॥ ४८ ॥ अतिकष्टदां मुनिनावां श्रुतवती सती वर्णमतिसणिना अंकुशेन हस्तिनी व सामु

इति तद्वचनं निशम्य सा मुनिवर्यं पुनरप्यवोचदः ॥ कियद्वा पुरमुष्य भो मुने सकलस्योन्नो
नुकंपया वद ॥ ४७ ॥ शारदोपि पुनस्तथाप्यते तनयस्यायस्य तथाप्यसौ पुनः ॥ निवसिष्यति कारणां
तराद्भुवने स्मिन्नुदराद्च वत्सरात् ॥ ४८ ॥ इति वादिनि भाविनीं कथा मृषिमुख्ये घटजे निवार्य तं ॥ ऋ
षयः सह तेन शंकरं समुपामंत्र्य ययुर्यथागतं ॥ ४७ ॥ सृणिना वरिणीव सार्दिता श्रुचिना शेवलि
नी वशोषिता ॥ मरुता कदलीव कंपिता मुनिवाचा सुतवत्सला भवत् ॥ ५० ॥ अथ शोकपरीतचेतनां
द्विजराडिश्च मुवाच मातरं ॥ अवगम्य च संसृति स्थितिं किमकांडे परिवेदनां तया ॥ ५१ ॥ श्री ॥

भिवाचार्दिता पीडिता अभवत् ॥ शुचिना आषाढेन शेवलिनी शेवलं पल्लकाधं तत्संबंधिनी पुष्करिणी व सा शोषि
ता अभवत् वायुना कदलीव कंपिता अभवत् यतः पुत्रवत्सला ॥ ५० ॥ एवं मति कष्टवती मातरं श्रीशंकरो
यदुक्तवान् तद्रुकुसुपक्रमते अथ मातुः मुनिवाचः अतिदुःखप्रार्थनानंतरं शोकेन परीता व्याप्ता चेतना बुद्धि
र्यस्याः तां संसारस्य स्थितिं लक्षणभंगुररूपामवगम्य कांडे असमये परिवेदनाशोकः तव किमर्थं अपार्थं

अतिचंचले शरीरे मूढमतिरपि स्थिरबुद्धिं न कुरुते त्वं तु विमुक्तां तत्रतां कर्तुमसयोग्येति बोधयन्नाह ॥ प्रबलोयो अनिलो
वायुः तस्य वेगेन वेल्लितो लिकंपितो यो ध्वजस्तस्य यच्चीनदेशीयमतिसूक्ष्मं वस्त्रं तस्य कोटिरग्रभागस्तद्वत् चंचले
कलेवरे शरीरे स्थिरबुद्धिं मूढमतिः अविवेकः कुरुते न कोपी त्यर्थः ॥ उत्तमाप्यस्त्वं कसंबोधनं मां विवेकेति तथाच्या
स्मदं विवेकात् अतिस्वत्ता अतिचंचले कलेवरे स्थिरबुद्धिं त्वं शोचितुमर्हसीत्यर्थः ॥ ५२ ॥ किंच तत्र जन्मन्यनु
भूतानां पुत्रादीनां मानसात् सर्वेषां शोकासंभवात् एते शोच्याः एतेन स्मिन् विनिगमकाभावान्न केपि शोच्या
इत्याशयेनाह कतीति इह अस्मिन् संसारे कलिव धूलन नाना भुंजि इह न भुक्तवंतस्ते सुताः कतावध्वश्रयंत्र कतथा

प्रबलानिलवेल्लितध्वजचीनांशुककोटिचंचले ॥ अपि मूढमतिः कलेवरे कुरुते कः स्थिरबुद्धिमंबिके ॥ ५२
कति नाम सुता न लालिताः कति या नेह वधूरभुंजि हि ॥ क नु ते क्व च ताः क्व वा वयं भवसंगः खलु पांथसंगमः ॥ ५३
भ्रमतां भववर्त्मनि भ्रमान्नहि किंचित्सुखमंब लक्षये ॥ तदवाप्य चतुर्थमाश्रमं प्रपतिष्ये भववंधमुक्तये ॥ ५४

भवसंगः पांथानां नानादिग्भ्यः आगतानां पथिकानां एकस्मिन् प्रपादौ यथा संगमः तद्वत् संगोप्यनियतः
क्षणभंगुर इत्यर्थः ॥ प्रासंद्वचेत् इमि साहाय्यस्तिति तस्मात् के पि शोच्याः न भवंती त्याशयः ॥ एवं शोकापकारके यो
कैच मातरं प्रबोध्य स्वेनं परवत्स्यं कर्तव्यं तदाह ॥ भ्रमतामिति ॥ संसारमार्गे भ्रमात् ज्ञानात् ॥ तत्र भ्रमतां किंचिद्
पि सुखं न लक्षये पितृजननी जठरवासादि रूपं दुःखमेव तिस्त्वयत्र संबोधयाति अंबेति हि यस्मादेवं
तत्तस्मात् चतुर्थं संन्यासाश्रममवाप्य संसारलक्षणात् बंधात् मुक्तस्य प्रकर्षेण यत्नं करिष्यामि ॥ ५४ ॥

एवंश्रीशंकरवाक्यमुदाहृत्य तच्छ्रवणेन द्विगुणीकृतशोकायाः तस्या वचनमुदाहर्तुमाह। इतीति। इत्थंप्रकारेण यत्कर्णयोः कठोरं दुःस्पर्शं भाषणं चतुर्थमाश्रमं मिस्यादिरूपं तस्य श्रवणात् बाष्पैरश्रुभिः पिनद्धो विहितः कंठो यस्याः द्विगुणीकृतः शोको यस्याः अत एव गद्गदं वाक्यं यस्यास्तया मुनिः श्रीशंकरो जगदे कर्मणि प्रत्ययः। एवंभूता सा मुनिं जगादेत्यर्थः ५५ उदुपाच्चतदाह। त्यजेति। इदानीमेव चतुर्थाश्रमं प्राप्य प्रपतिष्य इतीमां बुद्धिं त्यज तर्हि किं कर्तव्यमिति चेत्तत्राह॥

इति कर्णकठोरभाषणश्रवणाद्बाष्पविनद्धकंठया॥ द्विगुणीकृतशोकया तया जगदे गद्गदवाक्यया
मुनिः॥ ५५ त्यज बुद्धिमिमां शृणु श्रमे गृहमेधी भव पुत्रमाप्नुहि। यज च क्रतुभिस्ततो यतिर्भवितास्यंग सता
मयं क्रमः ५६ कथमेकतनूभवा त्वया रहिता जीवितुमुत्सहे। बलीत नयेव बभुवोर्ध्व दहि किं प्रमदायां मयि कः कृ

गृहमेधी गृहस्थो भव किं न तदित्यत आह। पुत्रं प्राप्नुहि। क्रतुभिर्यजनं च कुरु ततस्तदनंतरं यतिर्भवितासि भविष्यसि अंग हे पुत्र सतां शास्त्रोक्तोऽयमेव क्रम इत्यर्थः। तथा च स्मृतिः। ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् इति। ५६ किंच एकस्तनूभवः पुत्रो यस्याः सा तथाविधा अबला अहं त्वया विरहिता शुचा त्वां केन च जीवितुं कथमुत्सहे। पुत्रस्य तव स्वर्गविधि दुःखदात्त्वमनुचितमिति सूचयन् कृत्स्नं बोधयति त्वन्नयेति पाठांतरे त्वयेत्यनेन संबंधनीयं किंच यदर्थं त्वमुत्पादितः तदेहोर्ध्वदेहिकं मयि प्रमृतायां कः करिष्यतीत्यर्थः॥ ५७॥ किंनाल्पविद्यापि वृद्धां जननीं न परित्यजते यदि केनचिदिति मूढेन त्यज्यते तर्हि ज्येले

तां त्वं तदेष घृणोचितमां त्यमातरं तत्रापि रूढां त्यक्तुमसयोग्यां परित्यज्य कथं गमिष्यसि मामपास्य गंतुमसंतो योग्योसीत्यर्थः। वत्स गमनं यथा गोः पीडाकरं तथा तव गमनं ममेति द्योतयन् संबोधयति वत्सेति एवमुक्रमप्यद्रवीभूतांतः करणं पुनर्मातृस्थारूढ यद्दृतिन तुनास्त च संबंधाभावादिदो मम कापि ममत्वाभावात् स्नेहाभावात् कथं मे हृदयं द्रवीभूतं भवेदित्याशंक्य तत्त्वविदामति दृढमातुलश्रवणात् ते हृदयं दयां कथं न प्राप्नोतीत्याह। न कथमितिया ५८॥ एवंप्रकारेण बहुधा प्रार्थयंतीमपि तां मातरमपास्त निरस्तवान् तां मातरं अविवेकोऽयं सतः ऋकुभिः वचोभिर्मिश्रं शोकनिवृत्तिप्रकारं जानातीति विधित्सुः श्रीशंकरः शोकरहितां विदधाद कृततत्त्व अद्वैयम

त्वमशेषविदप्यपास्य मां जठरां वत्स कथं गमिष्यसि॥ इयतेह दयं कथं न ते नकथंकारमुपैति वा
दयां॥ ५८॥ एवं प्रार्थां तां बहुधा श्रयंतीमपास्त मोहं बहुभिर्वचोभिः। अंबा मद्गो कांचिदधाद्धिधिरं
सुदुःखमेचिंतयदंततः॥ ५९॥ मम न मानसमिच्छति संसृतिं न च पुनर्जननी जिहासति। न
च गुरुर्जननीत्वदुदासते तदनुशासनमीप्सव इष्यते॥ ६०

यदि अंतर्मनसि एतदुह्यमानमचिंतयत् अथम वर्षात्मिकस्य कालस्य पुष्कलं कालिमलत्र्यत्वं॥ ५८॥ यद्चिंतयत् तदूद्रयति। ममेति। मम मनः संसृतिं संसृतिसाधनं प्रवृत्तिमार्गं नेच्छति जननी पुनर्नैव जहासति हातुं सक्नुनैव इच्छति मामिति विपरिणामेन संसृतिपदं चानुषंजीनीयं न तु जननी संसृत्सुना भिवांछितं त्याक्त च मनसा अभिवांछिता संसृतिं वा कृतो न जिहासती सा शंक्य तस्यास्त हि क्षणाभावादित्याह। न चेति न त्वं संसृति तन्मानसानीति वा न नतु त्वमाप्नसद्य प्रबोधनीमिति चेत्तत्राह॥ गुरुरिति अत एव संन्यासाश्रमणे तस्याहि तदनुशासन

माहात्म्यवृत्तं ६०

६२

एवं मनसि श्रीशंकरकृतां चिंतामुपवर्ण्य तदनुग्रासनं गृहीतुं नक्रकृतं चरित्रं वर्णयति इत्येवंप्रकारेण विचिंत्य स कदाचिन्मज्जनेच्छ
या वकुजलां नदीं समुपाययौ गत्वा जलमगाहत तत्र नद्यां जलं प्राप्तवतश्चरणे जलचरः सम्यक् जग्राह ॥ ६१ ॥ स च रुरोद रोदनं कृतवा
न् बलवता विकृतमुरुदृढमुखं यस्य तेन जलचारिणा ग्राहेण धृतो गृहीतः पादो यस्य स हं तज्जले क्लिश्यते अतः किं करोमि ननु ज
नी ब्रूहि कुतो नायासीः स्वामिन्याह एकपदं जलितुं न च पारये समर्थो न भवामि हा हतोस्मि विदे ॥ ६२ ॥ तस्य सुतरोदनं गृहस्था जननी उ

इति विचिंत्य स जातु निमंक्ष्यावकुजलां सरितं समुपाययौ ॥ जलमगाहत तत्र स मग्रहीज्जलचरश्चरणे जलमी
युषः ॥ ६१ ॥ स च रुरोद जले जलचारिणा धृतपदो ह्रियते बकरामि किं ॥ चालितुमेकपदं न च पारये बलवता हेवि
नारुमुखेन हहा ॥ ६२ ॥ गृहगता जननी तदुपाश्रयोस्वरवशाद्रुतमापसरित्तटं ॥ मम मृतेः प्रथमं शरणं धवस्त्वदुमे
शरणं तव योभवत ॥ ६३ ॥ स न मरिष्यति न कचरांगतः शिवनमे जनि हंत पुरारतिः ॥ इति शुचोच्चजनन्यपि तीरगा
जलगतात्मजवक्त्रगतेक्षणा ॥ ६४ ॥ स्वजति तूनमयं चरणे च लो जलचरो बत यानुमतेनमे ॥ सकलसन्यसने परि

पाश्र्वणात्स्कृत्वा च परवशा अतिविकला दुर्माश्रुसरित्तट मवापतीरं गता साजनन्यपि जलगतस्य पुत्रस्य मुखं गत प्राप्त ईक्ष
णे नेत्रे यस्याः सा इति शुशोच च कथमित्येत आह । मम मृतेरिति । मरणात् प्रथमं मम शरणं पतिस्ततः पतिमृत्यनंतरं पुत्रोम
शरणमभवत् स एव तनयो मरिष्यंति यतो नक्रस्य जलजंतोर्वशंगतो हं तात किं कृत्वं हे शिव पुरारे मुच्चितामभसीतिमर
णं नाजनि नाभून्नहि शिवोपासका यामम शिवप्राप्ति रसं ता तु चिंतेति संबोधनाशयः इत्येवं शुशोचेत्यर्थः ॥ ६३ ॥ ६४ ॥ एवमतिशो
कपरितां मातरं मालक्ष्याह स जननी तिहं बभ्रुवरण मयं च च लो जलचरत्तो अनुमतेन सकलसन्यसने परीकल्पितेसति मज्ज

तिन यात्यचमन्दितवानुमतिस्तदाहं परिकल्पये सकलसन्यसमिति विपरिणामेन संबंधनीयं ॥ ६५ ॥ इत्येवं प्रकारेणस्फुटं यथास्यात्तथा शि
शोव दति सति चकिता सांऽबिका द्रुतं शीघ्रमनुमतिमनुमोदनं व्यधिता कृतस्फुटमिति मध्यमणि न्यायेनात्रापि संबंधनी
यं शीघ्रानुमतिकरणे हेतुं तत्कृतं निश्चयं दर्शयति सति सुते सुतस्य दर्शनं मम भविष्यति मृते च तस्य तद्दर्शनं न भविष्यतीति
विशेषेण निश्चयोस्तीत्यर्थः ॥ ६६ ॥ तस्या मातुरनुमतेः पश्चाच्छ्रीशंकरः मनसा सन्यसनं व्यधात् अथ संन्यसनानंतरं दुष्ट
जलचरः शिशुं मुमोच संसारश्चैनाज्ञाननक्रेण दुष्टनक्रेण गृहीतस्य संन्यासं विना न मोक्ष इत्याशयः ततः किं
वृत्तमित्यपेक्षायामाह ॥ शिशुरत्र सन्नरितत्तटमुपेत्य सश्नोकेन व्याप्तां जननीं एतदुक्तमाणं उवाच ॥ ६७ ॥ मदुपनिनदाह

इति शिशोर्वचकिता वदतिस्फुटं व्यधितसानुमतिं द्रुतमंबिका ॥ सति सुते भवितामम दर्शनं मृतवतस्तु
इति धिया निश्चयः ॥ ६६ ॥ तदनुसन्यसनं मनसा व्यधादथ मुमोच शिशुं खलु नक्रकः ॥ शिशुरुपेत्य स
रित्तटमत्र सन्नसुमनेतदुवाच शुचावृतां ॥ ६७ ॥ मातर्विधेयमनुजानिधियदत्र कार्यं सन्यासिना तदुक
रोमि न संशयोहं ॥ यस्मान्नानेतय यथेष्टममी प्रदेयुः गृह्णंति येधनमिदं ममपेत्तकं यत् ॥ ६८ ॥ श्रीशंकर

हे मातर्विधेयमाज्ञापय अस्मिन्लोके यत्सन्यासिना कर्तुं योग्यं तान्निश्चयेन करोमि नाहं संदेहे संश
येपुको न भवामि तुं न संन्यासिना संग्रह इत्येन त्वया अकर्तव्यं भोजनाच्छादनप्रदानं करिष्यतीतिचेत्त
त्राह ॥ यस्मादिति । येधनमिदं गृह्णंति अमी यस्मान्नानेतय यथेष्टं प्रदेयुः यत् यस्मात् धनं ममपेत्तकं सर्वमपि
तस्मादित्यर्थः ॥ यत्तु मम पेत्तकं तद्दिहन्तितिया ॥ यत्सं तातिजकारत्तं ॥ ६८ ॥ ननु संन्यस्य त्वयि गते रोगाधीने
मद्देहे सति कः द्रक्ष्यतीति इति चेत्तत्राह ॥ देहइति हे मातस्तव देहे रोगवशगे अमी सनाभयः सपिंडाः शक्तिमनुस्त्वदहीनं

६३ करिष्यंति मरणप्रसक्तौ च दाहादिसंस्कारं यथाविधानं कुर्युस्तत्र हेतुद्वयमाह अर्थस्य मम पैतृकधनस्य ग्रहणाज्ज्ञातीनां
भयाच्च तस्मात् अरावपि न मेऽत्र यान कर्तव्यमित्यर्थः ॥६९॥ संस्कृतं चामी कुर्युरिति सुतोक्तमसहमाना सा स्वमतं च यदि
त्वं संन्यासस्य संगरोऽस्ति कृतिस्तदाज्ञा जलचरस्य मुखाद्यज्जीवितं तव यज्जीवनं तद्दृष्टं संगरो ॥ गीरुक्तौ तु
धीति विश्वप्रकाशः ॥ तथापि मम देहस्य पाते सति यत्र कापि स्थितस्त्वमागत्य विधिवन्मम दाहादिसंस्कारं कु
रु ॥ ननु संन्यासिनो मम दाहादिकर्मण्यधिकाराभावात् कथमेवं वदसीति चेत्तत्राह ॥ हे तनुज परमेश्वरस्य तव

देहे बत रोगवत्रागेन्वसनाभयोऽमी द्रक्ष्यंति शक्तिमनुस्त्यसमस्तिप्रसंगे ॥ अर्थग्रहाज्जनभयाच्च य
थाविधानं कुर्युश्च संस्कृतिममी न विधेयमीषत् ॥६९॥ यज्जीवितं जलधरस्य मुखात्तदृष्टं संन्या
ससंगरवशात्मम देहपाते ॥ संस्कारमेत्य विधिवत्कुरु तं करतं नो चेत्तदस्य मम मां किं फलमीर
यत्वं ॥७०॥ अर्धंबरात्रिसमये समयांतरे वा संचिंतयस्व यदा गां च यदागायवामो ॥ एष्यामि तत्र
समयं सकलं विहाय विश्वासमाप्नुहि मृताय विसंकरिष्ये ॥७१॥ श्रीशंकरप्रसन्ना ॥ ६३

न किंचिदपि दोषाय हरितिभावः ॥ ननु तथापि लोकविरुद्धत्वात् किमर्थमेवं विधेयामीति तत्राह ॥ नो चेदिति
मरणानंतरं दाहसंस्कारस्याप्यलाभे सति त्वामुत्पाद्य मया किं फलं लब्धमिति त्वमेव कथयस्व ॥७०॥
एवं स्वकर्तृकदाहसंस्कारे अतिनिर्बंधवतीं मतिं दुःखितां मातरमालक्ष्य श्रीशंकर उवाच हे मातः दिवसे
स्वयदा गा स्वाधीना रोगादिना पराधीना वा यदा मां चिंतयसि तत्र तच्चिंतनसमये सर्वं समयमाचारं
विहायागमिष्यामि समयः शपथाचारसिद्धांतसंविदिति मेदिनी ॥ मदुक्ते विश्वासमाप्नुहि मृतायास्तव संस्कारं करिष्ये ७१

६॥

संन्यासिनां कर्तुमयोग्यमप्यंगीकुर्वतो मे मम का प्रार्थना त्वमाप्य वचः स्वीकर्तव्येत्याशयवानाहाथ शंभुर्विधवा
मनाथां मातरं संन्यासं कृतवानिति मां प्रति कस्यांचिदप्यवस्थायां त्वया नाचिंतनीयं ननु तथापि रिपुत्व
त्वादिति कष्टं चेत् मया कथं न चिंतनीयमिति तत्राह ॥ स्थितवता मयायतस्त्विति फलं त्वया प्राप्यं हे मा
तस्तस्मात् शतगुणं फलमहं प्रापयिष्ये ॥७२॥ अनेन प्रकारेण मातरमुक्त्वा संगोत्रजनमुवाचेत्याह इत्थमिति
यदुवाच तदाह ॥ संन्यासेति संन्यासाय कल्पितं मनो येन सोऽहं दूरं गंतुमुद्यतोऽस्मि तस्मात्पतिरहितां

संन्यस्तवानिति शंभुरयं विधवामनाथां क्षमेति मां प्रति कदापि न चिंतनीयं ॥ यावन्मया स्थितवता
फलमापनीयं मातस्ततः शतगुणं फलमापयिष्ये ॥७२॥ इत्थं स मातरमनुग्रहपूर्वमुक्त्वा प्रोचे
सनाभिजनमेष किंचिदक्षणागमः ॥ संन्यासकल्पितमना अहमितोऽस्मि दूरं तां निक्षिपामि जननीं
धयां भवत्सु ॥७३॥ एवं सनाभिजनमुत्तममुत्तमाग्र्यः श्रीमातृकार्यमभिभाष्य करद्वयेन ॥ संप्रार्थ्य
यत्स्वजननीं विनयेन तेषु नाश्रयत तन्नयनाज्जलांबु नाविंदमानां ॥७४॥ आत्मीयमंदिरसमीपग
तामथासौ चक्रे विदूरगनदीं जननीहिताय ॥ तत्तीरसंश्रितयदूद्वहधाम कांचित्तानिम्नगारभत ताड

तां जननीं भयस्कर स्पार्श्वस्थापयामि ॥७३॥ एवं प्रकारेणोत्तमः सनाभिजनमुत्तमाग्र्यः श्रीशंकरः श्रीमातृकार्यं सम्यगुक्त्वा
मुकुलितेन हस्तद्वयेन सम्यक्प्रार्थयन् रुदंत्या जलांबुभिः निषिंचमानां समातरं विनयेन तेषु सनाभिजनेषु न्यक्षेपयत ॥७४॥
संन्यासग्रहणाय श्रीशंकरस्य गमनं वर्णयिष्यन्नादौ मनसमये समस्तदृष्टत्वात् नदीवृत्तं पतिमारभते आत्मीयेति अथानं
तरमसौ विदूरगां नदीं मातुर्हिताय स्वीयमंदिरसमीपगतां चक्रे तस्यास्तीरे तत्पार्श्वतीरे संश्रितस्य यदुश्रेष्ठस्य श्रीकृ
ष्णस्य धामस्थानं किंचित्तां नदी तरंगैस्ताडयितुमारभत ॥७५॥ ॥ किंच यथा सुहरो देवेंद्र वर्षति सलिलं पीडुश्च

६४ यनो हरिरितिकृत्वा सुधः॥ किंचिज्जलं भगवतो विष्णोरंतःपुरमागत्य मत्सां भ्रमन्तां मत्तिकामपनुनोदत्तत्स्थानं यथा
कृष्णमूर्तिः क्रमेण चलितुमारब्ध प्रवृत्ता ननु तज्जलं तद्भूस्सां कुतान मुक्त यदितित्त्वा हदेवो विभेदियभयं प्राप्त इवा
भवत् भीरुः हि सा च कोपि न सज्जती सतद्दत्यर्थः॥ ७६॥ एवं नद्याकूशितो भगवान् श्रीकृष्णो अनंगयान्त्रा शेरथावाचा
श्रीशंकरमवदत् उक्तवान् तं विशिनष्टि मातुश्चरणकमलद्वंद्वं प्राणियस्य केनापि प्रकारेण मातुराज्ञां च परिगृह्य

वर्षासु वर्षति हरौ जलमेतत् किंचिदंतःपुरं भगवतोपनुनोद मत्सां॥ आरब्धमूर्तिरनघा चलितुं
क्रमेण देवो विभेदिव नमुंच तिभीरुहिंसां॥ ७६॥ प्रस्थातुकाममनघं भगवाननंगयाचाय इत्कथम
पि प्रणिपत्य मातुः॥ पादारविंदयुगलं परिगृह्य वाचाज्ञां श्रीशंकरं जनहितेकरसं सकृष्णः॥ ७७॥
आनेष्यदूरगनदी भवपापभयान्यां सामातिमात्रमनिशं बत लोलभद्र हिस्ते॥ किं भातितातनपरानदको
स्तुपायो येस्तु क्षमेननितरां द्विजपुत्रयासि॥ ७८॥

गंतुकामं सकलदोषविनिर्मुक्तं एतेन स्वस्याज्ञा
नादिदोषनिवृत्त्यर्थं तस्य गमने छायादि नास्ति हि किमर्थं तस्य गमने छ स्यत आह जनानां हित एको मुख्यो
रसो यस्य तं तथा च लोकोपकाराय तस्य गमनं सन्यासग्रहणादिकमिति भावः॥ ७७॥ अनुवाच तदाह॥ ६४
यां दूरगनदीं भवान् हृत्पमा आनीतवान् सा अत्यंतं निरंतरमनंतो भेरिषे हस्ते त्वा उनपरा मां किं भाति
कूलानिवृत्तौ नदकोभ्युपायो यतो वत्सं न समर्थो भवामि हे द्विजपुत्र त्वं मा स्यताः सुतरां यस्कं न क्षमेद् इत्यर्थः॥ ७८॥
श्रीकृष्णोक्तं श्रुत्वा किं कृतवान् इत्यपेक्षयामाह॥ आकर्ण्येति॥ इत्येवं तामतनुं मदारीरा वाचं श्रुत्वा नो ऽस्माकं

गुरुरिति ग्रंथकारोक्तिः अचलमपि कृष्णं शनैकैर्भुजाभ्यां प्रकर्षेणांगभंगादिकं विनैवोद्धृत्य समीप एव प्रकर्षेण पुनश्चलनं यथा नस्या
तथा स्थापितवान् ननु विकट स्थापनेन पुनरपि नद्यबाधा भविष्यतीति चेत्तत्राह। यस्मिन् स्थाने नद्याबाधनास्ति तत्रेत्यर्थः
चिरकालं सुखमुपविशतु तस्मात् प्रतिष्ठयादि सन्न्येयः॥ ७९॥ तस्मात् श्रीकृष्णात् भक्तिवशात् स्वमातुरप्यनुज्ञां गृहीत्वा
सः संसारमहासमुद्रात् दविरक्तिमान् सन्यसनाय दूरं गंतुं मनो उत्कृतं किमर्थमित्यत आह। कि भिति नौका यां स्थितः समु
द्रं किं पतितुमिच्छति नैवेच्छति तद्वत् वैराग्यादिलक्षण नौस्थितः संसारसमुद्रे पतितुं नैवेच्छतीत्यर्थः॥ ८०॥ प्रथमनेन प्र

आकर्ण्य वाचमिति तामतनुं गुरुर्नः प्रोद्धृत्य कृष्णमचलं शनकैर्भुजाभ्यां॥ अतिष्ठयन्निकट एव नयमबा
धानचैसुदीर्घसुखमास्व चिराय चेति॥ ७९॥ तस्मात् स्वमातुरपि भक्तिवशादनुज्ञामादाय संसृतिमहाब्धि
धिरक्तिमान् सः॥ गंतुं मनो व्यधित सन्यसनाय दूरं किं नौस्थितः पतितुमिच्छति वारिराशौ॥ ८०॥ इत्थं स कृधीः सु
निरस्य गृहमात्तलक्ष्मीशानुग्रहो घरजबोधितभाधिवदी॥ एकांततो विगत भोग्यपदार्थतृष्णः कृष्णा प्रतीचि निर

भा कारपास सुधीः निरगात् सदनात् निरगात् निर्गतवानिति योजना॥ निरस्त तयस्त्व सदनं भवनागारमंदिरमित्यमरः
तं विशिनष्टि। माता च लक्ष्मी श्च मातृलक्ष्मी शो निरवग्रहो निरवधिर्मातृविष्णोरनुग्रहो यस्मिन् एतेन मातृ श्रीकृष्णा
भ्यां प्रसन्नतापूर्वकं प्रबोधितः इति बोधितं न तु लौकिकं किमर्थं गतवानित्यत आह॥ घरजेनागस्त्येन बोधितभाव
च्यं जानातीति तथा एन तु जीवनोपायमेव कृतो न कृतवानित्यत आह। एकांततः विगतानि वृत्ता भोग्यपदार्थे भ्योद हादि
भ्यस्तृष्णा यस्य सयतो कृषिर्वकृवाचकः शब्दोणश्च निर्वृत्तिवाचकस्तयोरैक्यं परं ब्रह्म कृष्णलक्षणमभिधीयत इत्युक्तत्व
त् कृष्णः प्रतीचि प्रसंग भिन्ने ब्रह्मणि

६५ नस्मिन्नैतच्चित्रमित्याह। यस्यत्रीणि नेत्राणि कामदाहक इति स्तोमस्सर्वात्मकानि यस्य सत्यपरो विग्रहो यस्य तस्यापरविग्रहस्येति वा
दृक्पथेपि कामेन नास्थीयत कामः स्वादुं नशक्तस्तस्मिन् महानुभावे कामन्तूलकः संसृतिपाशबंधः कथं प्रसज्येत ३॥८२॥ न
नु निसमु कस्य शिवस्य मन्यासेन किमाधिक्यमिति चेत्तत्राह। स्मरणेति यिधिधिभ्रमलाविधुश्यंदः तौ कामेन मोहितौ जातु
कदाचिदुस्तथौ च स्कन्तानुधावनेन तारायहणेन चोन्मार्गौ च तथाहंद्रो यदपि कामेन मोहितो मोहिन्याः कन्यास्तनादि निरी
क्षणपरो अहदुर्स्ततावयं मोहिनीम गामनुगतवानिति विचार्यसेः श्रीयोपतीशस्य वपुषा कामेन कृतायाः पीडाया वार्तया
प्युद्भितो अजागरीदाति रत्येन जागर्तिस्मेत्यर्थः॥ एथी॥८३॥ किंच यो धातुष्कवरो धनुष्मत्श्रेष्ठो मारः कामो असुरान्

यस्यस्त्रिनेत्रापरविग्रहस्य कामेन नास्थीयत दृक्पथेपि॥ तन्मूलकः संसृतिपाशबंधः कथं प्रसज्येत म
हानुभावे॥८२॥ स्मरेण किल मोहितौ विधिविधू च जातुसथौ तथाहमपि मोहिनीकुचकुचाद्दिवीक्षापरः॥
अगामहमोहिनीमिति विमरस्य सो जागरी यतीशयपुषाग्निविः स्मरकृतार्तिवार्तोद्भितः॥८३॥ निष्पत्रा
कुरुतासुरानपि सुरान्मारः सपत्नाकरोद्दृप्यन्नानि हनिष्कुला कृततरां गंधर्वविद्याधरान्॥ योधा
नुष्कवरो नराननलसात्कृत्वो दलासीदलं यस्तस्मिन्नकुशूरतेष समुनिभिर्वर्ण्यः कथं शंकरः॥८४॥

निष्पत्रा अकुरुत सपं स्वानां शरापांअपरपार्श्वेषु निर्गमानान्निष्पत्रान् कृतवान् तथासुरान् अपि सपत्ना
न्यकरोत् सपं स्वस्य शर प्रवेशनेन सपत्राकुरुतवान् सपत्रनिष्पत्रादति व्यथन इति शान्सतथा। स्या न पिगंधर्वविद्याधरा
निष्ठ जगति निष्कुलाकृततरां निर्गतं कुलं अंतरवयवानां समूहो येभ्यस्तथा कृतानत्यंतं कृतवानित्निष्कुलान् निष्कोषणे
इति शान्चतथा नरान् नलसात्साकल्येनाग्निरूपान्कृत्वा भस्मीकृत्वा लमुदलासीत्तस्य कद्दोधिमान भूत्तस्मिन् कामे यः
अकुशूरतशूरतां कृतवानसेषः श्रीशंकरो मुनिभिः कथं वर्ण्यो न कथमपीत्यर्थः॥ शार्दूलविक्रीडितं॥८४॥ श्रीशंकर॥ ६५

५३

किंचास्य श्रीशंकरस्य कुतो वैराग्यं तः कस्माद्धूरगपासर वैराग्याद् परवैराग्याद्वा शांतिः श्रवणाद्यतिरिक्ताखिलबुद्धिव्या
पारेभ्यः स्वाधिकारानुपयुक्तेभ्यो फलत्वत्तानपूर्वकश्चित्तनिरोधः सामनो वक्ष्यत्यवशम नयतु लथाशांतिस्तथा कृतबा
ह्यव्यापारेभ्यो बाह्यकरणानिरोधः सा गतिमुखाः क्रिया न्यरूं वैत्त गमनादान वदनविसर्गानंदश्रवणस्पर्शनदर्शना
स्वादनाघ्राणात्मिकाः क्रिया याक्याणिपादपायूपस्थश्रोत्रत्वक्चक्षूरसनघ्राणाख्येंद्रियव्यापारान् संरुंधत्यती
तथोपरतिः सत्यशुद्धो नित्यानामपि विधित एव त्यागः सा विषमांतराद्धूरवणादि व्यतिरिक्तविषयांतराउत्क्रियाश्र
आत्मासां आरम्भां त्यजन्नकुरुत यतीस्थाक्षांतिः स्वाधिकारापेक्षितजीवनविच्छेदकातिरिक्तानां शीतोष्णादिद्वंद्वानां

शांतिश्रवणाद्यन्य मनोगतिमुखादांतिस्त्र्यर्धरुंध क्रियाआधात्ताविषयांतरादुपरतिः क्षांतिर्द्वंद्वसं
स्पधाध्यानैकोत्कलतांसमाधिमितातिष्ठ केतथासप्रिया॥ अहृतं तस्य सुप्रथास्यतु कुतो वैराग्यतो
यतिनी॥८५॥ विजनता वनिता परिता विलोमायितीर्णा कृतात्मतनुस्थितिः॥ अहिहर भ्रमतां
गहनोचरां हृदयगेनशिवेन समंयमो॥८६॥
सहिष्णुता सामदुलं कोमलतां च यथात् शिक्षितवतीत्तथा
समाधियितातीयधीत्तिश्रवणादीन्सरोधिनिद्रादिनिरोधेन चेतो अवस्थानं समाधि सास्य संतति ध्यानैकोत्क
कतां च केआत्मेतिनापाठः तथाभद्गाधितो भुलेतिश्रुतौ य स्फुनिनमिति प्रथायस्यासाभिद्गुरुकेदांतवाक्येषु च
श्वास रूपाश्रियाआसवरूयेति नोयेष्टिरलसर्वकस्मात् वैराग्याज्जातमिति न जानामीत्यर्थः॥८५॥ एवं श्रीशं
करमुपवर्ण्य तस्य गमनं वर्णयति विजनते विजनस मूहशून्यता लक्षणया या वनितया गनया तोषं प्रापितो वि
धिनाहैयेन यितीर्णन दत्तेन भोगेन कृता स्वशरीरस्य स्थितिर्येन सङ्गरहितविषयं भ्रमतां परिहरन् हृदयगेन शिवे
न समं यमी परमात्मन न हृदि ध्यायन् यमाचितर्थः॥८६॥ ॥५॥ ॥५॥ ॥५॥ ॥६

६६

सः गच्छन्वनादीनि पश्यन्नपि यथेंद्रजालिको मायाद्भुतमिंद्रजालं दर्शयत्येवमायावधिनं श्रत्वनादिरूपं इद मद्भुतमिंद्रजालं दर्शयतीति मेने वसंततिः ८७ कुत्सितो ऽध्वामार्गो येषां तेरदंडितं सर्वेषां कुदध्वानां मंडलं समुदायो येन स जगद्गुरुर्वादिभिः स्वस्वमार्गे कर्शितां जरद्वीकर्शितत्वात् शिथिलावयवां श्रुतिलक्षणां वृद्धां गां निजअद्वैत लक्षणे पथि प्रवर्तयन् दंडमेकमवहत् तस्य दंडधारणमेतदर्थमित्यर्थः शानशाधिहरथोद्धतालगो ॥ ८८ ॥ किं चाहं कुर्वद्भिः श्वःखलाः शहितेर्जल्पनशीलैः परममर्मभेदनकलालक्षणया कङ्काल्यालं अशान्तवलां अत्राांत भागो ये पौत: विश्वकद्रुभिः खचसारमेयैर्मयद्गुलमनसः सारंगा गानयविश्वकद्रुभिः खलैरहं कुर्वद्भिः तथाभूते: पाषांडैरि

गच्छन्वनानि सरितो नगराणि शैलान्ग्रामाञ्जनानपि पश्यन्पथि सोप्यपश्यत् ॥ नन्वेंद्रजालिक कृताद्भुतमिंद्रजालं त्रस्ते यमेव मादृशयतीति मेने ॥ ८७ ॥ वादिभिर्भिजनिजाध्वजकाश्रितां वर्तयन् पथि जरद्गवीं निजेंदंडमेकमवहज्जगद्गुरुर्दंडितासिलकदध्वमंडलः ॥ ८८ ॥ सारंगा यद्वे विश्वकद्रुभिरहं कुर्वद्भिरुग्रैः खलैर्जल्पाकैः परममर्मभेदनकलाकंडूलजिह्वांचलैः ॥ पाषांडैरिह कांदिशीकमनसः कन्दाश्रु स्वर्वेदिकाः ॥ कुत्रांदंडधरो यदस्मनुनमुनिरूत्ताताजगद्धृक्षिकः ॥ ८९ ॥ दंडान्वितेन धृतरागनवांबरेण गोविंदनाथवनमिंदुभवानदस्य ॥ तेन प्रविश्य मजनि षड्विनावसानेंडुलिपान्वशिरवरेंचलमान्तलस्य ॥ ९० ॥

हृभयद्रुतमनसो वैदिकाः कं कुत्रानाधुपुरखिलु सर्वमपि प्राप्नुयुर्यद्दिजगद्द्वैक्षिकोदंडधरो मुनिर्नत्राता स्मत्राणं न कुर्यात् विश्वकद्रुभिः पुंश्वले श्वानरवः शुनो पुमान्सारंगः पुसि हरिणपुलिमेदिनी ॥ शार्दू ॥ ८९ ॥ एवंभूतः श्रीशंकरो गोविंदनाथस्य वनं प्राविशदित्याह ॥ दंडसंयुक्तेन धृतरागं रजितं नवीनमंबरं वस्त्रं यस्य धृतानुरागश्चासौ नवांबरश्चेति वा तेन श्रीशंकरेण पार्दुडुभवा मान नर्मदा रख्याया नद्यस्तटे स्थितं गोविंदनाथं वनं दिनांते प्रविष्ट मजनिष्ट अहृतअरुणा

तीरवृक्षे प्राप्ते तनया धुना विशेषणा आगतः श्रमो यस्य स तथाविधः स्वगुरोगोविंदनाथवनस्य मध्यतलं तुलोके ददर्श दर्शनाथस्य लोकस्य धाल्तोर्लिडि अभ्यास रूपं यत्र मृगाजिन उज्ज्वलानि मृगचर्म कौपीनाच्छादनानि यासु ताभिः वृक्षा मननशीलानां यतीनां निवासं बोधयंतीति दित्यर्थः ॥ ९१ ॥ आदेशमनुपदेशमेकं मनुयोः कुभ्रष्ठुमयं श्रीशंकरो व्ययस्थान् निश्चयं कुर्वन् प्रादेशमात्रं छिद्रमेव द्वारपालं भजतीति न आतां यमिनां समूहेन कथितां गोविंदनाथगुहां कौतूकमुक्तः स नददर्श ९२ इच्छायत्तकृतयानं तदाह तस्य प्रपन्नानां शरणागतानां संतोषं दोग्धि पूरयतीति तथा तस्य शरणा

तीरद्रुमागतमरुद्गतश्रमः सन् गोविंदनाथवनमध्यतलं तुलोके ॥ शंसंतियत्र तरवो वसतीं मुनीनां रागस्वाभिरुज्ज्वलमृगाजिनवल्कलाभिः ॥ ९१ ॥ आदेशमेकमनुयोक्तुमयं व्ययस्थन्प्रादेशमात्रविवरप्रतिहारभाजं ॥ तत्र स्थितैः कथितां यमिनां गणेन गोविंददेशिकगुहां कुतुकी ददर्श ॥ ९२ ॥ तस्य प्रपन्न परितोषदुहो गुहायाः सत्रिप्रदक्षिणपरिक्रमणं विधाय ॥ द्वारं प्रति प्रणिपतज्जनतापुरोगं तुष्टावतुष्टहृदयस्तमपास्तशोकं ॥ ९३ ॥ पर्यंकतां भजति यः पतगेंद्रकेतोः पादांगदत्वमथ वा परमेश्वरस्य ॥ तस्यैव मूर्ध्नि धृतसा

गतसंतोषप्रदस्य श्रीगोविंदनाथस्य गुहायाः वारत्रयं प्रदक्षिणं परिक्रमणं विधाय द्वारं प्रति प्रणिपातं दीर्घनमस्कारं कुर्वन् जनसमूहस्य समक्षं तुष्टहृदयः श्रीशंकरोपास्तः शोकोपलक्षितः संसारो यस्मात्तं निरस्तसंसृतिकं अपास्तो दूरीकृतः त्रैविध्याणां वा शोको येन तं श्रीगोविंदनाथं तुष्टाव ॥ ९३ ॥ स्तुतिमेव वर्णयति चतुर्भिः यः गरुडध्वजस्य श्रीविष्णोः पर्यंकतां भजति अथ वा तस्य तथैवेत्यर्थः ॥ परमेश्वरस्य महादेवस्य यः पादांगदत्वं भजति पुनश्च शिरसि धृता समुद्रपर्यंतः सहिता भूमिर्येन तस्यैव शेषस्यात्रापसर्वा विग्रहमनुग्रहत्वाद्धाशेषविलक्षणं सत्ताका

BHAU DAJI MEMORIAL

BHAU DAJI MEMORIAL

६८ एवं त्रोबात्मकत्वयर्णनेन श्रीगोविंदनाथं स्तुत्वा तदवतारभूतपतंजल्यात्मना तं स्तौति। इष्ट्वेति। यः पूर्वं स्वीयां सहस्रमुखीं
मूर्तिं दृष्ट्वा अंते समीपे ये वसंतो ते वासिनः शिष्याः अभीषुर्भस्मीभवन्तु इति हेतोस्तां भयजनकां मूर्तिं परित्यज्य शान्तो निर्विष
सन्नेकमुखेन तु व्यवतीर्य शिष्यानन्वगृह्णीत् अनुगृहीतवान् स पतंजलिर्न तु निश्चयेन त्वमेवेत्यर्थः॥ ७५॥ जगदुपकारकां
वर्णयन्नाह॥ स्वयं इमे किंतु पातंजलं प्रक्रियोरगपतेः शेषस्य मुखात् साक्षादधीत्य जगदुपकारपरेण योगशास्त्रे
ण सहितं व्याकरणं भाष्यं भूमितले प्रकटितं इत्युत्तरेण संबंधः। अथ जिनयुगे कृतोपकारे [illegible]

दृष्ट्वा पुरा निजसहस्रमुखीमभीषुरे ते वसंत इति तामपहाय शांतः॥ एकाननेन भुवि यस्त्ववतीर्य शिष्या
नन्वग्रहीन्ननु स एव पतंजलिस्त्वं॥ ७६॥ उरगपतिमुखादधीत्य साक्षात्स्वयमवनेर्विवरं प्रविवक्षयेन। प्रकटित
मवनीतले सयोगं जगदुपकारपरेण शब्दभाष्यं॥ ७७॥ तमखिलगुणपूर्णव्यासपुत्रस्य शिष्याद्धिगतपरमा
र्थं गौडपादान्महर्षेः। अधिजिगमिषुरेष ब्रह्मसंस्थामहं त्वां॥ प्रसरमहिमानं प्रापमेकांतभक्त्या॥ ७८॥ तस्मि
न्निति सत्यवति वक्ते कैमिति ब्रुवंतं दिध्यासमाधिपदरुद्ध [illegible] गोविंददेशिकमुपाचेन दाववाणिः प्राचीन

श्रीशंकर[illegible] ॥ ६८ ॥

व्यित्वाग्ध्या॥ ७९॥ तं सर्वगुणैः पूर्णव्यासपुत्रस्य शुकाचार्यस्य शिष्याद्गौडपादान्महर्षेः अधिगतो लब्धः पर
मार्थो येन तं प्रसरमरं प्रसरणशीलो महिमा यस्य तं त्वां ब्रह्मनिष्ठामधिजिगमिषुरधिगंतुमिच्छुरेषोहमन ६८
न्यया भक्त्या प्राप्तः संप्राप्तोस्मि। नन मयपथुतयं नाल्लिनी भोगिलोके॥ ८०॥ तस्मिन्निति श्रीशंकर एवं स्तुवति सति किं
र्वीति सति कस्त्वमिति ब्रुवंतं भाग्यवशात् समाधिपदनिरुद्धमपि सुस्पष्टमुत्थापितं चेतयन्तं गोविंददेशिकं प्रा
चीनैः पुण्यैर्जनितस्यात्मविबोधस्य चिह्नैः पुरोः वचोभिः तस्मिन्काले श्रीशंकर उवाचेत्यर्थः॥ ८१॥ नसंताहिल

तद्वचनमुदाहरति। स्वामिन्निति। उपनिषत्प्रतिपाद्यमात्मानं दर्शयितुमितरवाद्यभिमतं तं निराकरोत्यहं न पृथिवीत्या
त्मन्नस्थूलोहं जानामीत्यादिप्रतीत्या स्थूलस्यैव वह्नात्वप्रतीतेर्देहाकारपरिणतं भूम्यादिभूतचतुष्टयमात्मेति चा
र्वाकेषु केचिदभिमतमात्मानं निराकरोति यत्पृथिवीत्याहं न भवामीयो ऽहं स पृथिवी न भवतीति परस्परसाद
त्म्यनिषेध एव मंत्रेपि न तु यादिनां संघातस्यैवात्मत्वाभ्युपगमात् प्रत्येकं पृथिव्यादेरात्मत्वनिराकरणं कोपयुज्यत
इति चेत्तु वादिनादिगुणगुरुत्वभियातिरिक्तचैतन्यानभ्युपगमात् भूम्यादीनि चत्वारि तत्त्वानीति वदता पंचमतत्त्वा
भ्युपगमप्रसक्तिभिया संयोगादिसंबंधानभ्युपगमात् संघातकर्तुरभावाच्च संघातानुपपत्त्या प्रत्येकभूतनिराकर
णे भौतिकदेहात्मवादनिरास इति ग्रहाणस्पर्शो ना वायुः तथा चात्मनो देशकालाद्यपरिच्छिन्नत्वात् परिच्छिन्नानां घटा

स्वामिन्नहं न पृथिवी न जलं न तेजो न स्पर्शनो न गगनं न च तद्गुणा वा॥ नापींद्रियाण्यपि तु विद्धि ततो विशिष्टो यः के
वलोस्ति परमः स शिवोहमस्मि॥ ८२॥

दिवदनात्मत्वात्पृथिव्यादिरहं नेत्यर्थः॥ एवं देहात्मवादं निराकृत्य शून्यवादिमाध्यमकस्य मतं निराचष्टे न गगनं
यच्छून्यं तदहं न भवामि यो ऽहं न स शून्यं न भवति अस्तीत्येवोपलब्धव्य इत्यादिश्रुतेः॥ निरधिष्ठानकभ्रमानुपपत्तेः
स्तनपानादिप्रवर्तकजन्मांतरीयसंस्कारोपलब्धेश्च भूतनिराकरणेन आपोमयः प्राणः अन्नमयं हि सोम्य
मन इति श्रुत्या भूतकार्यत्वेनांगीकृतयोः प्राणमनसोः क्रियाशक्तिज्ञानशक्तिप्रधानयोर्निरासः मनोनिरास
करणेन च मनोवृत्तेः क्षणिकविज्ञानस्य नतात्मत्वात्मवादः साधुः स्फुटो तस्य भोक्तृत्वादर्शनात् नाभिमन
आत्मवादस्तस्य करणत्वानुभवात् नापि क्षणिकविज्ञानात्मवादः सौगताभिमतः कर्तृत्वभोक्तृत्वयोर्वैय्यधि

६८ करण्यापत्तेः यद्धानगगनमित्यनेनाकाशस्य पंचमभूतस्य निरासः यद्यपि मतचतुष्टयतत्वप्रादिनोमतेअवरणाभा
वत्वेनाभिमतस्य स्थिरस्यासत्त्वआकाशस्यदेहानुपादनत्वं तथापि तस्य सिद्धांते भावत्वदेहोपादनत्वाभ्युपगमा
त्तत्राप्यात्मत्वप्रसक्त्यात्तन्निरासुतं एवंदेहोपादानानां भूतानामात्मत्वं निराकृत्य तदुपादान भूतानां गंधरस
रूपस्पर्शशब्दाख्यानां तद्गुणत्वेन प्रसिद्धानां पंचतन्मात्राणामात्मत्वं निराचष्टे नचतद्गुणा वा धाराद स्तथाश
•ब्दार्थ दृष्टावीपस्याभिश्रणोमी त्याद्यनुभवात्प्रत्येकमिंद्रियाण्यात्मेतिकेचित् विनगमकाभावात् मिलितानीत्यपरे तान्नि
राचष्टे नापीद्रियाण्याणीति प्रत्येकमिंद्रियाणामात्मत्वेयोहमश्रौषं सोहं पश्यामीति प्रत्यभिज्ञानुपपत्तिर्मिलितानां
तथात्वेएकेंद्रियनाशेआत्मविनाशापातः तस्मादिंद्रियाण्यप्यहं नापि तु तत्तस्मात्सर्वेषां बाधात्योवशिष्टः सर्वद्वै
त बाधप्यबाधितः केवलः कर्तृत्वभोक्तृत्वादिविनिर्मुक्तः परमः सर्वोत्तमः शिवाश्चिदानंदोस्ति सोऽहमस्मिअव
शिष्ट इत्यनेन शून्यमतनिरासः कर्ता भोक्ता चेति वैशेषिकतार्किकप्राभाकराभोक्तेवेति सांख्याश्च केवलपदेन
निराकृताः शिव इत्यनेन वैशेषिकाद्यभिमतमात्मनः सुखादिगुणकत्वं पराकृतं परम इत्यनेन निरतिशयत्वेन
परमपुरुषार्थत्वं तस्य बोधितं यद्वा पदार्थशोधनपुरःसरोऽखंडार्थोऽप्युक्तः तत्र पृथिव्यादिनिषेधेन
त्वंपदार्थः शोधितः केवलः परमः शिवो योऽस्तीति शोधिततत्पदार्थानुवादः सोहमस्मीत्यखंडार्थः॥ ६८
॥६९॥

इत्येवंभूतमद्वैतसाक्षात्कारात्समुत्थितं शंकरमुनेर्वचनं श्रुत्वा संप्राप्तहर्षः स गोविंदनाथः प्रोवाच हे शंकर सत्प्रसि
द्धः शंकर एव साक्षात्त्वं प्रादुर्भूत इत्यहं जानामि कथमित्यत आह। समाधिदृष्टेति ॥७०॥ तस्यैवं उक्तवतश्चरणे॥
गुहायाद्वारे दर्शितवतो गोविंदनाथस्य स शंकराचार्यः समीपमागत्य चरणोऽन्यप्रजयत किमर्थं न्यप्रजयदित्य
त आह॥ स शंकराचार्यः तत्र तेषु यतिषु तस्मिन्काल इति वा गुरुचरणप्रजननमाचार इत्युपदिष्टे वेदे गोविंदपादे

आकर्ण्य शंकरमुनेर्वचनं तदित्थमद्वैतदर्शनसमुत्थमुपात्तहर्षः॥ सप्राह शंकरस शंकर एव सा
क्षाज्जातस्त्वमित्यहमवैमि समाधिदृष्ट्या॥७०॥ तस्योपदर्शितवतश्चरणौ गुहायाद्वारेन्यप्र
जयदुपेत्य स शंकरार्यः॥ आचार इत्युपदिदेश स तत्र तस्मै गोविंदपादगुरवे स गुरुर्यतीनाम्॥७१॥
शंकरः स विनयैरुपचारैरभ्यतोषयदसौ गुरुमेनं॥ अलनद्विदितमप्युपलिप्सुः संप्रदायपरिपा
लनबुध्या॥७२॥

गुरुर्यस्य तस्मै शंकरार्याय स गोविंदनाथ उपदिदेशोस्यनुषंगः॥७१॥ असौ शंकरो विनयसहितैरुप
चारैरेनं गोविंदनाथं गुरुमभ्यतोषयत् किमिच्छन्नित्यत आह॥ तदुपनिषत्प्रसिद्धमखंडैकरसं ब्रह्मतत्त्वम्
कृज्ञातमप्युपलिप्सुमिच्छुः ननु विदितोपलिप्सायां को हेतुरित्यत आह॥ संप्रदायेति तद्विज्ञानार्थं स गु
रुमेवाभिगच्छेत् आचार्यवान्पुरुषो वेद इत्यादिश्रुत्युक्तगुरूपसदनादिलक्षणासंप्रदायस्य परिपा
लनबुद्ध्येत्यर्थः॥ स्वागता॥७२॥

६८ भक्तिपूर्वं कृतया तस्य परिचर्यया तत्कृतसेवया तया ऽधिकतरं यथा स्यात्तथा परितोषितो यतिश्रेष्ठो गोविंदनाथो वेदानां
ऋग्यजुःसामाथर्वणाख्यानां यानि शिरांसि उपनिषदस्तेषां वचोभिः क्रमेण प्रज्ञानं ब्रह्म अहं ब्रह्मास्मि तत्त्वमसि
अयमात्मा ब्रह्मेति चतुर्भिर्वचनैरमुष्मै श्रीशंकराय ब्रह्मभावमुपदिदेश ॥ १०३॥ एवं गुरुणोपदिष्टः सकलं विज्ञात
वानित्याह ॥ संप्रदायप्रभवेन पराशरपुत्रेण व्यासेन प्रोक्तेषु अथातो ब्रह्मजिज्ञासेत्यादिसूत्रेषु यन्मतं ब्रह्माद्वैत
लक्षणं तस्य गतिः स्थितिस्तस्याः अनुरोधात् दयालोर्व्यासस्य शास्त्रे गूढं यत् हृदयं अभिप्रायस्तत्सर्वमपि सु

भक्तिपूर्वकृतया परिचर्यया तोषितोऽधिकतरं यतिवर्यः ॥ ब्रह्मतामुपदिदेश चतुर्भिर्वेदशेखरव-
चोभिरमुष्मै ॥ १०३॥ सांप्रदायिकपराशरपुत्रप्रोक्तसूत्रमतगत्यनुरोधात् ॥ शास्त्रगूढहृदयं हि
दयालोः कृत्स्नमप्ययमबुद्ध सुबुद्धिः ॥ १०४॥ व्यासः पराशरसुतः किल सत्यवत्यां तस्यात्मजः
शुकमुनिः प्रथितानुभावः ॥ तच्छिष्यतामुपगतः किल गौडपादो गोविंदनाथमुनिरस्य च
शिष्यभूतः ॥ १०५॥ शुश्राव तस्य निकटे किल शास्त्रजालं यच्छ्रावणात्कणभुजं गसमागतं तत्
नंतात् ॥ शाब्दपुराणमखिलं समयं विधाय यश्चाखिलानि भुवनानि बिभर्ति भूयः ॥ १०६॥

बुद्धिरयं श्रीशंकरो विज्ञातवान् ॥ १०४॥ संप्रदायबोधनाय गुरुपरंपरां दर्शयति व्यास इति सत्यवत्यां परा-
शरमुनेः पुत्रो व्यासस्तस्य प्रथितानुभावः शुकमुनिः सुतस्तस्य शिष्यतां प्राप्तः गौडपादस्तस्य गोविंदनाथमु-
निः शिष्यभूतः १०५ तस्य गोविंदनाथमुनेः समीपे शास्त्रकदंबं श्रीशंकरः शुश्राव यश्च गोविंदनाथः शे-
षालयं गतो भवदीयं शास्त्रं भूतले प्रवर्तयिष्य इति संकेतं विधाय शब्दशास्त्रसमुद्रं शेषादशृणोत् यच्चानंतो

[illegible] ६८

एवं प्राप्तसंन्यासं श्रीशंकरं वर्णयितुमुपक्रमते ॥ सद्गुरिति पूर्वपुण्यसमूहैः प्राप्यं सर्वोत्कृष्टं यतिप्रमुखैरस्पृश्यमस्यं संन्यासाश्रमं
स आर्यः श्रीशंकरो लब्ध्वा तथाभूतं सर्वप्रमुखैरस्पृश्यमुन्नतं स्थानमागत्य ध्रुव इव रराज ॥ स्वा० ७ अरुणैः पाटलाख्या
श्वेतरक्तवर्णा शाटी पटी तल्लक्षणेन पल्लवेन कृष्णा आच्छादिता मूर्तिर्यस्य स यतिराजो रुरुचे शुशुभे तत्र दृष्टांतमाह । या
सरस्पदिकस्य उपरमे उपरमाहारकोपमेघस्तेन छादितो हिमगिरेः कूटः शृंगमिव रराज यथा स ध्रुव इति ॥ शिवो गजा-
सुरं निहत्य रुधिराप्लुतं तदीयं चर्म बिभर्ति स्म तथैव शंकरोऽज्ञानाख्य महागजं सम्यङ्निहत्य यद्रूपं यद्रुण-
शाटीपल्लवस्य व्याजेन रुधिराप्लुतं महेभस्य चर्म बिभर्ति ॥ ८॥ ब्रह्म धियेति श्रियो व्यतिरेके प्रदर्शनपूर्वकं श्री

सोऽधिगम्य चरमाश्रममार्यः पूर्वपुण्यनिचयैरभिगम्यं ॥ स्थानमन्यमपि हंसपुरोगैरुन्नतं ध्रु-
व इवैष वकान्त्या ॥ ७॥ धन्यमूर्तिररुणपाटलशाटीपल्लवेन रुरुचे यतिराजः ॥ वासवोपरमरक्त-
पयोदाच्छादितो हिमगिरेरिव कूटः ॥ ८॥ एष धूर्जटिरिवोग्रमहेभं संनिहत्य रुधिराप्लुतचर्म ॥
उद्यदुष्णकिरणारुणशाटीपल्लवस्य कपटेन बिभर्ति ॥ ९॥

शंकरस्य निगमप्रतिपाद्यत्वं दर्शयति श्रुतीनामिति सादिनां श्रुतीनां मध्ये असमं तातक्रीडायस्य प्रथितैः
प्रख्यातैः परमहंसैः परमहंसपरिव्राजकैः सहोचितां गतिं गमनं यस्य निजे स्वस्य रूपभूते सत्ये अबाध्ये
ध्यानिते जगति जगदनिवर्तिनि सर्वाधारे रतेऽभिरतः सदैव रतः सोऽयं श्रीशंकरो ब्रह्मैव यतः परब्रह्म
विसर्गे च दामलदमामनंतीत्यादि श्रुतेः ॥ श्रुतीनामासमं तातक्रीडायस्मिन् प्रथितानां परमहंसानां तत्त्व
रम्या चितां उचितां गतिं ब्रह्मविदाप्नोति परमित्यादि श्रुतेः ॥ प्रथितेति गते च विशेषणं समन्तात्

७०

प्रतिष्ठितः स्वमहिम्नीति श्रुतेरुक्तधाम्न्यभिरतं हिरण्यगर्भस्य तेनैवं विधोयतस्तस्योपयनादौ श्रीगुणतथाहं से
गीतिस्तथा त्रिलोकीपस्ताञ्चयेण त्रिजगत्स्वरुदेतौ भुवनात्मकस्य ब्रह्मणो ब्रह्माण्डस्यांतर्वर्तिनि वा ध्वस्योपेत्वजेउ को
केभिरतत्वस्मादाम्लिमञ्जीरोंकारे किल बृंहधातोरर्थमनयाच्छन्नबृहत्त्वरूपं साक्षादुपचाररहितं केवलतया
भिर्णीतितया कल्पये जानामि न तु संदिहे केवलः कुहते पिच्चनपुंसकं तु निर्णीतियान्त्यपदेन कस्त्वयोदि
तिमेदिनी। तथा च ब्रह्मवेद ब्रह्मैव भवतीत्यादि निगमागमकमलनादप्रतिपाद्यत्वं श्रीशंकरस्य निरूपयां

चकार नामार्कोदः प्रथितपरहंसोऽखिलगतिर्भिजस्त्वंधाम्नि त्रिजगदतिवर्तिन्यभिरतः॥ असौ
ब्रह्मैवास्मिन्न तु खलु विचार्यं किमु तत् कल्पये बृहदर्थं साक्षादनुपचरितं केवलतया॥ ७७॥
क्षितं पादेनैव त्रिभुवनमिहैकेन महसा यमुद्दूय स्तत्वं स्थिति जनि लयेष्वप्यनुगतं॥ द्वरी
कारातीतं स्वमतिमनिनिर्वेदरमणं ततस्तद्विष्णोः परमपदमारब्धातिनिगम॥ ११॥

एवं तद्विष्णोः परमं पदमिति निगमोऽपि निरूपचारेण श्रीशंकरे वर्ततइत्याह मितामितत्वायानस्य महिमा
ततो ज्यायांश्च पूरुषः पादोऽस्य सर्वा भूतानि अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेष्वित्यादिश्रुतेरेके
नैव महसा ज्योतिरूपेण यद्यस्य पादेनेह त्रिभुवनं मितमापितं विष्णोस्त्वपादरूपेण त्रिभुवनं मापितं तत्त्वं
यस्य सत्त्वमबाधितस्वरूपं स्थित्युत्पत्तिलयेष्वप्यनुस्यूतं विष्णोस्त्वसत्त्वं सत्त्वगुणः स्थितावेवानुगतं
सत्त्वं निर्दोष निर्देश कारातीतमस्याकारात्मात्रिनिर्मुक्तो विष्णोस्त्वलघ्व मिराकारे मत्स्यादि भिर
तीतनमयुतितत्तस्त्वस्मात्स्वमहिम्नि निर्वेदनवैराग्येण सम्यक्बोधेन वा रमणं यस्य तं श्रीशंकरं वैकु
ण्ठलक्ष्म्याक्रीडितो विष्णोः सकाशात् परमं विष्णुसंबंधि यापरमं पदमित्यर्थ उक्तो निगमो निरूपचारेणा

तथा शिवपदप्रवृत्तिमवितस्मिन्नद्दर्शयतिनेति। प्रसिद्धशिवस्य भूतप्रेतादिभिः समंतात्संगोऽस्य तु क्वचन कस्मिंश्चिद्देशे काले वा भूतेषु
प्राणिषु आकाशादिषु वा संगआसक्तिर्नास्ति प्रसिद्धशिवस्य गजचर्मणा विहरणमस्य तु क्वापि गजाद्रिणा विहरणं नास्ति स्य भूसा
भस्मना संसर्गः संबंधः प्रसिद्धोऽस्य तु भसा ऐश्वर्येण संसर्गो नास्ति स्यैते भोगिभिः सर्पैः परिचितिता प्रसिद्धाऽस्य तु विषयसं
भोगवद्भिः परिचयो नास्ति यद्यप्येवं चेल्लक्षणं तथापि शिवं शांतमद्वैतं चतुर्थं मन्यन्त इति वेदांतः केवलस्य विशुद्धस्य ब्रह्म
णो दर्शनेन परमार्थदृष्ट्या मात्रमात्राणां स्थूलसूक्ष्मकारणरूपाणां पुराणां दहनात् द्विद्वंद्व सुखदुःखादिद्वंद्व शून्यं च
तुर्थं संज्ञं शिवं सम्यक्तं शंकरं वर्णयतीत्यर्थः॥ १२॥ च प्रसिद्धः शिवो धनुपाणिः सहरुते त्रिपुरं जित्वा तत्तं प द्विनिगम

न भूतेष्वासंगः क्वचन न गजाद्याविहरणं न भस्मा संसर्गो न परिचिति तता भोगिभिरपि॥ तदप्याम्नायांतत्त्वत्रि
पुरदहनात्केवलद्वंद्वातुरीयं भिन्नं द्वंद्वं शिवमतितरां वर्णयतितं॥ १२॥ न धर्मः सोवर्णो न पुरुषफलेषु प्रवणता
न चेवाहोरात्रस्फुरदहरिश्रुतः पार्थिवरथः॥ असाहाय्येनैवं वसति धितनपुर्यष्टकजयकथं तं न ब्रूयान्निगमनिकु

सरूहः प्रतिपादयतीतीशं सहायं विनैव पुर्यष्टकविजयकर्त्तारं श्रीशंकरं कथं न ब्रूयादित्याह। नेति प्रसिद्धशिवस्य तु सौ
वर्णः सुवर्णगिरिमयोधर्मो धनुः धर्मो स्त्री पुण्य आचारे न्यायधनुर्मर्म सोमयोरितिमेदिनी। अस्य तु ब्रह्मप्राप्त्या वो
मनवर्णसंबंधि धर्मो नास्ति तस्य तु पुरुषो विष्णुः स एव फलं फलकं यस्मिन् वा बाणस्तत्र प्रवणता श्रद्धा सक्तताऽ
स्य तु पुरुषार्थानां फलेषु ऐहिकामुष्मिकेषु प्रवणता नास्ति तस्य अहोरात्रस्फुरता चरित्र चंद्रसूर्याभ्यां चक्र
रूपेण स्थिता भ्यां युक्तः पृथिवीमयो रथोऽस्य त्वहोरात्रस्फुरता हंकारादिलक्षणोऽरयस्तैर्युतः पार्थिवो देह
लक्षणो रथो नैवास्ति तथाप्येवं प्रकारेण सहायं विजितं नयेन वसतिस्त्वपुर्यष्टकं तत्स्वप्राणपंचककर्मेंद्रियपंच
कज्ञानेंद्रियपंचकांतःकरणचतुष्टयाविद्याकामकर्मवासनालक्षणस्य जयेसति तं श्रीशंकरं परशिवं वेदस्तु

अथ नस्य परहंसत्वं बहुधा वर्णयति । दुःखान्येवासारो वेगवद्वृष्टिर्यस्यां दुरंतानि दुष्कृतानि पापान्येव मेघा यस्यां दुःखासारा
यास्यो दुरंतदुष्कृतघनतामिह लोके दुर्धारां दारुणां दुःसंसृतिलक्षणां प्रावृषं वर्षाऋतुं दूरादेव परिहरन् परित्यजन् हंस
कुलशिरोभूषणपदभाक् सतां हृद्धिमनससरोवरस्थानीये क्रीडतीति संबंधः शुद्धे हृदीति वा तं विशिनष्टि उदाराशयः
पुनश्च उच्चं उग्रे प्रतिपक्षपंडितास्तेषां यश एव नालीकस्याब्जखंडस्य नालानां दंडानां अंकुरः ग्रासो यस्य स नालीकः शर

दुःखासारदुरंतदुष्कृतघनां दुःसंसृतिप्रावृषं दुर्धारामिह दारुणां परिहरन् दूराद् उदाराशयः ॥ उच्चं
उग्रप्रतिपक्षपंडितयशोनालीकनालांकुरग्रासो हंसकलावतंसपदभाक् सन्मानसे क्रीडति ॥ १४ ॥ क्षीरं ब्र
ह्म जगच्च नीरमुभयं तद्योगमभ्यागतं दुर्भेदं ललितरेतरं चिरतरं सम्यक् विभक्तीकृतं ॥ येनाशेषवि
शेषदोषलहरीमासेदुषीं सन्मुषीं सोयं शीलवतां पुनाति परमो हंसो द्विजात्यग्रणीः ॥ १५ ॥ ९ ॥

शल्यापोषघ जखंडनरसकं । नालो नालं पद्मखंडे दूर इति मेदिनी व्या० १४ क्षीरनीरयोर्ब्रह्मजगतोर्विवेचकत्वादप्ययं पु
रहंसइत्याह ॥ क्षीरं दुग्धं परमानंदघनं ब्रह्म जगत्पुनानीरमानंदवर्जितं दुःखात्मकं तदुभयं योगं परस्परसं
ताराध्यं प्राप्तं पुनश्च लेरलरं भेत्तुं विलक्षणीकर्तुं दुर्घटं येन सम्यक् विभक्तीकृतं सोयं द्विजातीनां द्विजानामग्र
णीः परहंसः श्रीशंकरो अशेषाये विशेषेण दोषा उत्कृष्टदोषा रागद्वेषादयस्तेषां लहरीमासेदुषीमासमंतात्
सेवितवतीं शेमुषीं शीलवतां बुद्धिं पुनाति पक्षे द्विजातयः पक्षिणः ॥ १५ ॥ श्रीशंकरस्य परमहंसत्वं प्रकारांतरेण
प्रतिपादयति नीरक्षीरनये न जलदुग्धे यथा संमिश्रिते तद्रीत्या तथ्यं ब्रह्म ललितं अंमिथ्याभूतमज्ञानादि

श्रीशंकरस्य परमहंसत्वं प्रकारांतरेण प्रतिपादयति । नीरक्षीरनये न जलदुग्धे यथा संमिश्रिते तद्रीत्या तथ्यं ब्रह्म ललितथं
मज्ञानादि ते संपृक्पिंडितत्वादात्म्यं प्राप्तस्य मस्तैः पंडितैरितरपक्षिस्थानीयैरिदं तथ्यमिदं वितथमिति बोद्धुं बोधयितुं
च दुर्घट्यः श्रीशंकराख्यो मुनिर्विवेचयति विविच्य स्थापयति सोयं विवेचकत्वात्परमो हंसोऽस्त्ययेपुनरिह विवेचने
अशक्ताः सर्वे स्थितास्तान् जंपात्स्वेनभजनितरोगविशेषस्थानीयरागादेर्हेतोर्निंबफलस्थानीयविषयसंभोगे कर
सिकांस्तान् काकान् मन्महे जानीमः ॥ १६ ॥ प्रकारांतरेणापि हंसत्वमाह ॥ दृष्टिमिति हंससूर्यो बाधेनतमसा मंदी

नीरक्षीरनयेन तथ्यवितथे संपीडिते पंडितैर्दुर्बोधे सकलैर्विवेचयति यः श्रीशंकराख्यो मुनिः ॥ सो
यं परमो रूत्ययेपुनरिहाशक्ताः समस्ताः स्थिता जंपान्निंबफलाशनैकरसिकान् काकान्मन्म
हे ॥ १६ ॥ दृष्टिं यः प्रगुणीकरोति तमसा बाधेन मंदीकृतां यन्नालीकप्रियतां प्रियाति भजते मिथ्यत्व
मव्याहतं ॥ विश्वस्योपकृते विलुंपति स्फुटं चक्रस्य चार्तिं घनां हंसः सोयमभिव्यनक्ति महतां जिज्ञास्यम

कृतां दृष्टिं प्रगुणीं प्रकृष्टां तमो निवारणेनापावृतां करोति अयं तु अबाध्येनांतरेणात्मनो या बाधेन वाज्ञानल
क्षणेन तमसा मंदीकृतां आत्मदृष्टिं प्रगुणीकरोति प्रकृष्टगुणयुक्तां यथाभूतात्मदर्शनयोग्यां करोति स तु क
मलप्रियतां याति अयं तु अलौकिकभूतविषयादिप्रियतां न प्रयाति सकलकारायजगतो मिथ्यात्वमव्याहतं भ
जते तथाऽपमप्युपकारायसर्वस्याव्याहतं भिन्नत्वं भजते स स्फुटं दृश्यमानस्य चक्रवाकस्य घनीभूतां रात्रि
प्रयुक्तां प्रियाविरहजनितां व्रियाधिलुंपति स तु ज्ञानमिष्टं घटपटादिरूपमर्थं मुहुरभिव्यनक्ति प्रकाश
यति तथा सोयमपि महतां जिज्ञासूनां मुमुक्षूणां जिज्ञास्यं परमार्थभूतं ब्रह्मैक्यलक्षणमर्थं मुहुरभिव्यनक्ति ॥

सुधींद्रे श्रीशंकरे हंसभावे यतित्वं अधिगत्य संसृतिमुक्त्यर्थं तं हंसं परमात्मानं समर्च्य इति सति विषयेषु विद्युद्वच्चपलतां कथमन्विव मेघः संचचलस्या ॥ १८ ॥ मेघकर्तृकाद्दिसरोधनस्य हेतुमुत्प्रेक्षते एषस्सूर्योऽस्मान्मेघान् निष्ठुरपादैः परुषकिरणैः स्पृशति तत्स्पर्शनं तु तिष्ठतु परं तु भूम्ये वितीर्णं तदस्मदीयपुष्यं मेघपुष्पम भांचिप्यनेषीदृत्यनीतवानिति विचार्य कमलिनीपतिरब्देरवरोधिकमलिनीपतिरस्तनेनास्मद्भार्यायाः दुःख दात्रविरोधनेन लब्धार्याया: कमलिन्याः दुःखं प्रहेयमिति ध्वनितं स्या ॥ १९ ॥ किंच मेघ निचयेक्षणमा

हंसस्वभावमधिगत्य सुधींद्रे तं समर्च्य तिन्नसंसृतिमुक्त्यै ॥ संचचालकथयन्निव मेघश्चंचला
चपलतां विषयेषु ॥ १८ ॥ एष नस्स्पृशति निष्ठुरपादैस्तत्तु तिष्ठतु वितीर्णं भवन्येऽ ॥ अस्मदीयमपि
पुष्पमनेषीदित्यरोधि नलिनीपतिरब्दैः ॥ १९ ॥ वारिवाहनिवहे क्षण लक्ष्मीररोचत
चिररोचिः ॥ अंतरंगगतबोधकलेव व्याप्तस्य विदुषो विषयेषु ॥ २० ॥ किन्नु विष्णुपदसंश्रय
तोऽद्य ब्रह्मलतामुपदिशंति सुहृद्भ्यः ॥ यन्निशम्य निखिलाः स्वनमेषां विभ्रमंति स्म किल निर्भ
रमोदात् ॥ २१ ॥ देवराजमपि मानयजं तिन्नानगर्वभरिताय तयो मी ॥ उत्समर्पवरागनपयोदसं

त्रं लक्ष्मी श्रीर्यस्य सा चिररोचिः क्षणप्रभा विद्युद्रोचत यथा विषयेषु व्याप्तस्य विदुषोंतःकरणगता
ज्ञानकलाद्योपमेत तद्वत् ॥ २० ॥ मेघा विष्णुपदसंश्रयणात् स्वहृद्भ्यः किं ब्रह्मलतामुपदिशंति नु यितको
पद्यस्मादेषां मेघानां स्वनं नादं श्रुत्वा निखिलाः सर्वे निर्भरमोदात् विभ्रमंति स्म किलेति प्रसिद्धं ॥ २१ ॥
ज्ञानगर्वेण भरिता आनिराधिता अमीयतयो देवराजमपि मानयंतीत्यमर्षवरागनपयोदजलदः स एव स्यं

कुब्जे गिरिमल्लिका कुटजः शक्रो वत्सको गिरिमाल्लिकेत्यमरः ॥ कंदलं नवांकुरः कंदलं तु कपालेस्यादुपरागे नवां
कुर इति विश्वप्रकाशः ॥ बाणौ सैनी झिंटी नीलाम्लीझिंटी द्वयोर्बाणे समरस्तथा स्त्रीकुटजादीना विशाल रेणुभिः कलि
ता व्याप्ता सा यनवासा बनसंबंधिय वायुसमूहाः सत्वरजस्तमोगुणैः मिश्रिता जगत्सुमायिका यिलासाः परि

आबवुः कुटजकंदलबाणास्फीतरेणुकलितावनवासाः ॥ सत्वमध्यमतमोगुणमिश्रा मा
यिका इव जगत्सु विलासाः ॥ २३ ॥ विभ्रमुस्तिमिरसच्छविगात्रा ध्वांतकार्मुकभृतः स्वर
घोषाः ॥ ध्यानयज्ञमथनाय यतीनां विद्युदुज्वलदृशो घनदैत्याः ॥ २४ ॥ उत्ससर्जुरसरु
ज्जलधारा वारिदा गगनधाम पिधाय ॥ शंकरो हृदयमात्मनि कृत्वा संजहार सकलेंद्रियवृत्तीः २५

णामादूरा ववुः प्रचलिताः ॥ २३ ॥ तिमिरेण तमसा समाना छविः कांतिर्यस्य तथाभूतं गात्रं शरीरं येषां ते चित्रा
ख्यं इंद्रचापलक्षणान् कार्मुकान् धनूंषि विभ्रतीति तथा स्वरो निष्ठुरो गर्जनलक्षणो घोषो येषां ते विद्युल्लक्ष
णानि उज्वलानि दर्शनेत्राणि येषां ते मेघलक्षणा दैत्या यतीनां ध्यानलक्षणस्य यज्ञस्य मथनाय भ्रमुः ॥
॥ २४ ॥ एवंभूता वारिदा आकाशधाम आवृत्य जलधारा मुहुर्मुहुः उत्ससर्जुः सम्यक्तत्सर्जुः तस्मिन्काले
श्रीशंकरोंतःकारणमात्मनि कृत्वा समस्तेंद्रियवृत्तीः सम्यक् उपसंहृतवान् ॥ २५ ॥ श्रीशंकराचार्याय नमः ॥

७३

स्य निरुद्धालः कारणाद्देस्तस्य बुद्धिर्लयमवापेत्याह ॥ नैवेत्यासस्नैः सहितं यथास्यात्तथोपनिषदां शनैः सांत्वालापैरव्यर्थमधुरभाषणैरुपनीतास्समीपं प्रापिताश्चिरकालमालंब्यात्स्वीकृतं सहजमनादिसिद्धं दृढतरमभिमानं सत्कालक्षणमेव तत्त्वं श्रुत्यादिप्रसिद्धं परब्रह्मास्पदं परहंसं परमात्मानं प्राप्य पुनरसौ तस्य बुद्धिसस्मरद्युम धीराक्वचिदपि न क्षणमेकमुलयमगमत्तथा काचिन्मानिनी समीपस्थानां सखीनां युक्तिसहितं मथाभवेत्तथासांत्वालापैरनुनय वाक्यैः कांतसमीपं नीता

शनैः सांत्वालापैः सनयमुपनीतोपनिषदां चिरायात्तं त्यक्त्वा सहजमभिमानं दृढतरं समेत्य प्रेयांसं सपदि परहंसं पुनरस्याच धीरा सस्य कुतु सपदितड्डीलयमगात् ॥ २६ ॥ न सूर्यो नैवेंदुः स्फुरति न च तारा न तडिदियं कुतो विद्युल्लेखा कियदिह कृशानोर्विलसितं न विश्लोरोदस्यो न च समयमस्मिन्न जलदे चिदाकाशे सांद्रस्वसुखरसवर्षैरापविरतं ॥ २७ ॥ श्रीशंकर ॥

चिरायात्तं स्वाभाविकं दृढतरमभिमानं विहाय सपदि समुत्कंठं प्रेयांसं कांतं प्राप्य पुनरसौ संस्मद्युम धीराकस्मिंश्चिदंगे सपदि लयमाप्नोति तथेत्यर्थः ॥ अत्र प्रस्तुतवृत्तांते वर्ण्यमाने विशेषणसामान्यबलादप्रस्तुतवृत्तांतस्यापि परिस्फुरणात्समासोक्तिरलंकारः समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य चेदिति लक्षणात् ॥ २६ ॥ यत्र सूर्यादीनां न विस्फुरणं न संभवति तत्र बुद्धिस्फुरणस्य का प्रत्याशेत्याशयेनाह ॥ नेति कृशानुरग्निः रोदस्योर्द्यावाभूम्यो अविरतं सततं घनीभूतस्वसुखरसवर्षैश्चिदाकाशे सूर्यादिर्मानस्फुरतीत्यर्थः ॥

किंच सहजानंदसमुद्रेति स्वच्छे तत्एव लुच्छीकृतासकलासकार्यामायायस्मिन्पुनश्च स्वमहिमनि विस्मापनपदे स्वतः सत्येन तु कार्यापेक्षा मद्दारवद्विस्तत्त्वे परमे रहस्यसंततमुचितदेतस्मिन्नेव भल्लगामिन्ने परशिवे सः स्तौति श्रीशंकरः किमादेयं हेयं च किमिति निस्यमकृतेव मनुसंधानं सदैव कृतवान् ॥ २८ ॥ पुनः चर्वर्तु वर्णयति विष्णुपदभागपि विद्युदुज्ज्वलकांतानुसक्तश्च मेघः प्रावृडागमनतो मलिनत्वं प्रापातो भूयव न्यापि भूमावपि निरागं कोनभजेदपितु सर्वोपि वैराग्यमाप्नु

किमादेयं हेयं किमिति सहजानंदजलधावति स्वच्छे तुच्छीकृतसकलमायापरशिवे ॥ तदेतस्मिन्वस्वमहिमनि विस्मापनपदे स्वतः सत्ये नित्यं रहसि परमे सोकृत यती ॥ २८ ॥ प्राप विष्णुपदभागपि मेघः प्रावृडागमनतो मलिनत्वं ॥ विद्युदुज्ज्वलरुचाभिसृतश्च को भवन्यापि भजेन्न विरागं ॥ २९ ॥ आशये कलुषितेसलिलानां मानसोत्कहृदयाः कलहंसाः ॥ कोन्यथा भवति जीवनलिप्सुर्नाश्रये भजति मानसचिंता ॥ ३० ॥ अभ्र वर्त्मनि परिभ्रममियच्छुभ्रदीधितिरदभ्रपयोदे ॥ नप्रकाशनमवापक

यादवस्था ॰ ३० सलिलानां जलानां आशये कलुषिते सति मानससरोवरं प्रत्युत्कमुत्कंठितं हृदयं येषां तथाभूताः कलहंसाः अभवन् आश्रये अन्यथा भवति सति को जीवनलिप्सुः मानसचिंतां न भजति किंतु सर्वोपि भजत्येव ॥ ३० ॥ अनल्पाजलदाय स्मिन्नतभाक्ततेत्वोममार्गे परिभ्रममियच्छुभ्रांशुश्चंद्रः कलावानपि उरुकलापूर्णोयतो मलिनाकारोभवासीत्तस्मात्प्रकाशनं प्राप्तवान् शुभ्रकांतिः सकलकलासपन्नोपि मलिनयसनश्चेत्कः प्रकाशनं न कोपीत्यर्थः ॥ ३१ ॥

७४ अनल्पापिपासाजलपानेच्छा यस्याः सा चातकानां पंक्तिः चिरं अलस्पत्त प्रिमवापघनं दृढ माश्चर्यं करोतीति तथा अमृतम
प्याकिर्यां घनकालात् प्राप्नुयात् बलप्रसिद्धं ॥३२॥ इत्येवं प्रकारेणोक्तः पयोदः विशेषणनीलैस्फीतेन विशालेन पा
युना परिकंपितातमालाः वृक्षविशेषाः यस्मिन् प्राणिनां विचरणे प्रतिकूले निबिडनीलघनैः युक्ते अग्रहाराणां
ब्राह्मणग्रामाणां शतेन संभृता शोभा यस्मिन् तथाभूते वर्षाकाले सुधीभिः उपास्यौ चरणौ यस्य तथाभूतं गुरुं

चातकावलिरनल्पपिपासाप्राप्नुयादमृतमप्यभिवांछन्काल
तो बलघनाश्रयकारी ॥३२॥ इत्युदीर्णजलवाहविनीलस्फीतवातपरिभूततमाले ॥ प्राणभृच्च
चरणप्रतिकूले नीडनीलघनराजितिकाले ॥३३॥ अग्रहारशतसंभृतशोभे सुग्रहाद्गुरुग
समहात्मा ॥ ओध्रुवासलदभिंदुभवायाः सुध्रुपास्यचरणं गुरुमर्चन् ॥३४॥ नस्तमर्त्यगणाम
स्ताभितां हस्तिहस्तपृथुलोदकधाराः ॥ मुंचति स्म समुदंच्य दुकुलं चराचर महि वा सुरजस्त्रं ॥३५॥
तीररूहहततीर्यैरेकर्षणच्यहारनिकरैः सहपूरः ॥ आययावधिकघोषमनल्पः कल्मषाविलहरीवतटिन्याः

सम्यक् पूजयन् सुरेखनरहोविषयलक्षणमार्गेभ्यः स्तंभनं येषां तथाभूता अलक्षणा अन्यायस्य सन्निग्रहीतास
र्वकरणो महात्मा ॥ अक्रूर स्वभावं इंद्रमयसंज्ञिकायां नद्यां स्तटमध्युवास निवासं कृतवानिति द्रुमोरर्थः ॥३४॥
नस्तमर्त्यगणमस्तभिता वेत्यं यथास्यात्तथा आहतानुर्वीभ्रारिः इंद्रः समुदंचती समुल्लसं तीविद्युत् यस्मिन्
नुतस्मिन्चराचर मजस्रं हस्तिशुंडावत्पृथुला विपुला जलधारा मुंचति स्म ॥३५॥ अथानंतरं तीररुहाणां
तत्तीर ग्रहारस महैः दाहतस्तैः ताः स्तीरस्थवृक्षपंक्तीराकर्षन्त इत्यान द्याअनल्पः पूरोजलप्रवाहः प्रलेप ७४

सैष श्रीशंकरोघषसहितजलरुहेभ्यो भीरूणां नराणां कलुषं घोषं श्रुत्वा उपेद्यशरं श्रीगोविंदनाथं कृपं निश्चलं समा
धेर्विधानं यस्य कृपस्य समाधेरितिचात भाक्तेय द्विघ्नलक्षणमार्त्तं कथनेच्छा रहितं सुष्ठीमभूत् ॥३७॥ पश्चात्
श्रीशंकरः त्वरमाणः करकं कुंभं अभिमंत्र्य सत्या सौ प्रवाहस्तस्याः प्रवाह इति वा तस्याग्रे प्रस्थाप्य निकरके
सर्वजलं प्रावेशयत् अगस्त्यो यथा समुद्रं स्वहस्त आवेशायत् तथेत्यर्थः ॥३८॥ तमुदंतं वृत्तांतं निखिलैरपिलो
केरुक्तं समाधितो सुस्थितो अस्य श्रीशंकरस्य गुरुः श्रुत्वा आश्चर्यात् द्वीघ्रमेवामं योगसिद्धिमवापेति परि

घोषवारिरुह भीरु नराणां घोषमेष कलुषं सन्निशाम्य ॥ देशिकं कृपसमाधिविधानं नीस्वच
क्षणमभूद्विघ्नक्षः ॥३७॥ सोऽभिमंत्र्य करकं त्वरमाणस्तत्प्रवाहपुरतः प्रणिधाय ॥ कलसनम
मत्र समवेशयदंभः कुंभसंभव इव स्वकरे ब्धिं ॥३८॥ तं निशाम्य निखिलैरपिलोकैरुक्तमेतदुद्वृत्तं ॥ योगसिद्धिमचिरादयमापत्सम्यपद्यत तरां परितोषं ॥३९॥ छात्रमुरुस्य मुमा
हृक्रियद्भिर्यो सरेगीतवनेगगनेसः ॥ पश्यसोम्यत्र शरदाविमलं रवं विद्युत्येव निवृत्तं परतत्त्वं ॥४०॥ यादि
दृयतिवराज्ञस्सुपायोधारयासुदुपक्षा गिरन्त्या ॥ ओषधीरनुचरं स्वशतार्थीकृत्य संप्रतिहियांतिपश्यछं ॥

तोषमभ्युपद्यततरामतिशयेन परितोषं प्राप्तवानित्यर्थः ॥३९॥ क्रियद्भिर्दिवसैः गतघने गगने सति शिष्या
ग्यममुं श्रीशंकरः गुरुराह यदुवाच्यं तदाह हे सौम्य अग्रमदशीन शारत्काले निर्मलगगने गपरूपतत्त्वं दृष्टां
तः यथा शरत्विद्यं सो विद्युत् विनादअनवधिर्नं तस्य लोकस्य लक्षणं तत्त्वं तद्वत् ॥४०॥ जलदाः सुजल
स्यधारया ओषधीः कृतार्थीकृत्य यतिवराज्ञ संदुपरशीयंत्याः पुनरनुचरां श्रेकृतार्थीकृत्य संप्रतिपश्यच्छं
गच्छंति ॥४१॥

७५

असौ श्रीसद्दीधितिश्चंद्रोऽजलसुगिभिर्मेघैस्ललक आकाशमार्गे यस्य स अतिस्फुटकांतिर्भाति मायिकस्यावरणस्य नि
र्गमेन शुक्लः शुद्धसत्त्वचिद्रूपो बोधो यथा प्रकाशते यद्वत्॥७२॥ वारिवाहानां मेघानां निवहसमूहप्रतिपाते सति
शुचिभानि शुद्धप्रभानि शुभ्राणि भानि नक्षत्राणि भांति यथा रागद्वेषादिविगमे सति मैत्र्यादिपूर्विकाः गुणाः
मुदितादयः परिशुद्धाः प्रकाशंते तद्वत्॥७३॥ मत्स्यकच्छपमयी पुनश्च धृतं चक्रं सुदर्शनाख्यं यया गर्भ
वर्तीनि चतुर्दशभुवनानि यस्या नलिनैः कमलैः शोभा लक्ष्म्या संयुता मधुरिपोर्विष्णोर्मूर्तिर्यथा पर

शीतदीधितिरसौ जलमुग्भिर्मुक्तयद्वत्तिरतिस्फुटकांतिः॥ भाति तत्त्वविदुषामिव बोधो मायिका
वरणनिर्गमशुक्लः॥७२॥ वारिवाहनिवहप्रतिपाते भांति भानि शुचिभानि शुभानि॥ मत्सरादि
विगमे सति मैत्रीपूर्विकाश्च गुणाः परिशुद्धाः॥७३॥ मत्स्यकच्छपमयी धृतचक्रा गर्भवर्तिभुवनान
लिनाढ्या॥ श्रीयुता घ तटिनी परहंसैः सेव्यते मधुरिपोरिव मूर्तिः॥७४॥ नीरदाः शुचिरसंभृतमे
तज्जीवनं द्विजगणाय वितीर्य॥ स्वं विधुय दबलाः परिशुद्धाः प्रव्रजंति घनवीथिगृहेभ्यः॥७५॥

हंसैः परमहंसपरिव्राजकैः यतिभिः सेव्यते तद्वत् अथ मत्स्यादिप्रचुरा धृतानि चक्राणि पुटभेदाश्च यया गर्भवर्तिनी
भुवनानि जलानि यस्याः कमलैः आढ्या शोभायुक्ता तटिनीयं नदी परमहंसैः उत्कृष्टैर्हंसाख्यपक्षिभिः परम
हंसैरिति वा॥७४॥ एते जलदाः सुचिरसंभृतं जीवनं जलं द्विजानां ब्राह्मणादीनां पक्षीणां च गणाय वितीर्य दत्वा
स्वत्वात् विलक्षणाः अबलांगनाय्यैः परिशुद्धाः समंतात् शुभ्रा मेघवीथिलक्षणेभ्यो गृहेभ्यः प्रव्रजंति प्रयांति
पक्षे नीरदा निर्गतदंता जराग्रस्ता इति चिरसंभृतं चिरपर्यंतं संचितं जीवनं धनधान्यादि ब्राह्मणगणाय प्रदत्वा

सस्मलित गात्रः कमंडलुशोभी काषायवस्त्रसंवृतो यथा यतिस्तद्वत् अयमनेहा शरत्कालः चंद्रज्योत्स्नालक्षणेन भस्मना
च चर्चितं लिप्तं गात्रं शरीरं यस्य चंद्रमंडललक्षणेन कमंडलुना शोभी अस्यास्तीति तथा बंधूकपुष्पसमूहलक्षणया शा
टयासंवृतः प्रभातीत्यर्थः॥७६॥ वारि सरसं सरः संबंधि जलं तापकं लब्धीयमनद्व प्रतिभाति हंसाख्यपक्षिसंगेन विल
सत्त्वं तद्विगतपांसुकं च पक्षे परमहंसानां संगेन विलसच्च तद्विगतरजोगुणं च निरस्तकर्दमं पक्षे निरस्तपापमलं सु

चंद्रिकाभसितचर्चितगात्रश्चंद्रमंडलकमंडलुशोभी॥ बंधुजीवकुसुमोत्करशाटीसंवृतो यतिरिवायम
नेहा॥७६॥ हंससंगविलसद्विरजस्कं क्षोभवर्जितमपंकुलपंकं॥ वारि सारसमतीव गभीरं तापकं मन
इव प्रतिभाति॥७७॥ शारदं शुजले घोरे परीतं भ्राजते गगनमुज्ज्वलभानु॥ लिप्तचंदनरजः समुदंचत्कौ
स्तुभं मुररिपोरिव वक्षः॥७८॥ पंकजानि समदूरहरीणि प्रोद्गतानि विकचानि कनंति॥ सौम्य
योगकलयेव विफुल्लान्युन्मुखानि हृदयानि मुनीनां॥७९॥

दुभिति मायदन्यसमानं॥८०॥ शरत्काली
नानां जलधराणां जालैर्व्याप्तं मेघावरणविनिर्मुक्तत्वात् उज्ज्वलो भानुर्यस्मिन् तथाभूतं व्योम शोभते तत्र
दृष्टांतः लिप्तानि चंदनरजांसि यस्मिन् समुदंचन् संस्फुरन् कौस्तुभाख्यो मणिर्यस्मिन् तथाविधं मधुरि
पोः श्रीविष्णोः वक्ष इवेत्यर्थः॥८०॥ हंसौम्ययोगकलयाद्यर्थं मुखानि प्रफुल्लानि सम्यक् उद्गतानि आरूढो
हरिर्विष्णुर्येषु तानि प्रकर्षेणोद्गतानि ऊर्ध्वतां प्राप्तानि मुनीनां हृदयानि कमलानि यथा कनंति प्रकाशं
ते तथा प्रोद्गतानि प्रकाशानि विकासं प्राप्तानि सम्यक् दूरं हरयः सूर्यरश्मयो येषु तानि पंकजानि कनंतीत्य
र्थः॥८१॥

एकाविद्ध द्विधात्रिकं वलाअवलात्ये घेदः पर शुद्धांतः करणाः
छलेप्सवतोचीधौ पपुलस्योत्पत्यये भः प्रव्रजंति सस्यनाडातीस

७६ रेणुलक्षणेन भस्मना शोभितैः पत्रलक्षणया शाट्या संवृतैः कुसुमलिहो भ्रमरास्तल्लक्षणा जपमाला येषां तैः प्रसव
बंधे कुड्मलानि कलिकास्तल्लक्षणा कमंडलुयुतैः क्षितिरुहैर्वृक्षैः यतित्वसाम्यं धार्यते ॥५०॥ धारणाध्यानसमाधि
भिः श्रवणमननानि दिध्यासैः वर्षकाणि द्वंद्वसाम्यपनीयात् अपादपपक्षरजसा जगंति पुनंतो महांतः संचरंति ॥५१॥
यस्मादेवं तत्तस्मात् हे वत्स महादुःखदां जन्ममरणलक्षणसंसारात्मकस्यंदनस्य वनाग्नेः मेघमालां तत्त्व

रेणुभस्मकनितैर्वल्लिशाटीसंवृतैः कुसुमलिट्जपमालैः ॥ वृत्तकुड्मलकमंडलुयुतैर्धार्यते क्षि
तिरुहैर्यतिनौल्यं ॥५०॥ धारणादिभिरपि श्रवणाद्यैर्वर्षकाणि द्विसाम्यपनीय ॥ पादपक्षरज
सा च पुनंतः संचरंति हि जगंति महांतः ॥५१॥ तद्भवान् व्रजतु वेदकदंबादुःखदां भवदवांबुदमा
लां ॥ तत्त्वपद्धतिमभिज्ञापयितुं सत्वरं हरपुरीमविनिक्तां ॥ ५२॥ अत्र कृष्णमुनिना कथितं मे पुत्र त
च्छृणु पुरा तु हिनाद्रौ ॥ तत्र वासुमुखदैवतजुष्टं सत्रमत्रिमुनिकर्तृकमास ॥५३॥ संसदि श्रुति
शिरोर्थमुदारं वीक्ष्य संसति समस्तपराशरसूनुः ॥ इत्यपृच्छमहमत्र भवंतं सत्यवाचमभियुक्ततमं तं ॥५४ ७६

पद्धतिमविविक्तां विवेक्तुं यं तत्त्वपद्धतिरियं नेति विवेचनं कर्तुं शीघ्रं शिवपुरीं काशीं गच्छतु ॥ ५२॥ अ
थ शारीरकसूत्रभाष्यकरणाय प्रेरयिष्यन् वृत्तं तत्कालमावेदयति अत्रास्मिन् पद्धतिविवेचने कृ
ष्णमुनिना वेदव्यासेन यन्मे कथितं हे पुत्र तत्त्वं शृणु पूर्वं हिमाद्रौ तत्र वासुमुखैरिंद्रप्रभृतिभिर्देवैः
जुष्टमत्रिमुनिकर्तृकं सत्रमासं बभूव ॥५३॥ तत्र सभायां सपराशरसूनुः श्रुतिशिरसामर्थमुदारं
वीक्ष्य संसति तमभियुक्ततमं सत्यवाचमत्र भवंतं भगवंतं श्रीव्यासमिति वक्ष्यमाणमहमपृच्छं इत्याह ५४

यत्स्य इत्याह हे आर्य वेदनिकरो वेदनिचयः प्रकर्षेण विभक्तो विलक्षणीकृतस्त्वयेति शेष एवमग्रेपि ॥५५॥ अत्र ब्रह्मसूत्रेषु
हास्मिन्लोके केचिद्विप्रतिपन्ना विप्रतिपत्तिं प्राप्ताः स्वमतानुसारेण यथायोग्यमर्थान् कल्पयंति तस्माद्धे भगवन् अ
न्यथार्थग्रहणं निगृह्य दसमस्य ब्रह्मसूत्रस्य भाष्यं त्वया करणीयं ॥५६॥ ममवचनं सत्यपराशरसुतः श्रुत्वा सभायां

आर्यवेदनिकरः प्रविभक्तो भारतं कृतमकारि पुराणं ॥ योगशास्त्रमपि सम्यगभाषि ब्रह्मसूत्रमपि सू
त्रितमासीत् ॥५५॥ अत्र केचिदिह विप्रतिपन्नाः कल्पयंति हि यथायथमर्थान् ॥ अन्यथाग्रहणनिग्रहदक्षं भा
ष्यमस्य भगवन्करणीयं ॥५६॥ सद्वचः सच्चनिशम्य सभायां विद्वदग्र्यसरवाचमवोचत् ॥ पूर्वमेव हि विबुद्धिरुदी
र्णः पार्वतीयसहस्यममर्थः ॥ ५७॥ वत्स कर्म शृणु समस्तविदेकोमत्समस्तवभाविष्यतिशिष्यः ॥ कुंभ एव स
रितः सकलांबुः संहरिष्यति महोत्बणमंभः ॥५८॥ दुर्मतानि निरशिष्यति सोयं रामदायि च करिष्यति भा
ष्यं ॥ कीर्तयिष्यति यत्रास्तत्र लोकः कार्तिकं दुकरकोत्तुकियेन ॥५९॥ श्रीशंकरप्रसन्न ॥

हे विद्वद्ग्र्यवर वाचमुक्तवान् तां दर्शयति ॥ द्विपिपद्भिः वेदैः अयं त्वदुक्तः अर्थः शिवस्य सभामुक्तः ॥५७॥
तस्मात् हे वत्स त्वं शृणु समस्तवित् सर्वज्ञः ॥५८॥ सुखप्रदं भाष्यं करिष्यति येन शिष्येण नतत्कृत्के
ण भाष्येण या कार्तिकचंद्रकिरणवत् कौतुकमस्यास्तीति तत्तत्र यत्र लोकः कीर्तयिष्यति ॥५९॥ श्रीशंकर ॥

७७ इत्थं प्रकारेण स मुनिराट् वेदव्यासो वनमध्ये उक्तापार्वत्याः पत्युः शिवस्य गिरिं कैलासं प्राप तस्य व्यासस्य मुखा
च्छ्रुतं सर्वं मया हे सन्मुनिप्रिय त्वयि दृष्टं ॥६०॥ हे तत्त्ववित् श्रेष्ठ तत्तस्मान्निर्दुष्टमेव धैर्यं तस्य ॥६१॥ शशिमौलेश्चंद्रशे
खरस्य नगरे स्वच्छरूपया देवनद्या गंगया कमनीयं सुंदरं तावत्तागमनमात्रेणैव तस्मिन्नगरे आद्याद्वैया

इत्युदीर्य मुनिराट् स वचनं तेन पूरुषस्य गिरिशं गिरिजायाः ॥ तन्मुखाच्छ्रुतमशेषमिदानीं सन्मुनि
प्रियमयात्वयि दृष्टं ॥६०॥ सत्तमुत्तमपुमानसिकश्चित्तत्वविच्छ्रवरतान्यसमानः ॥ तद्यतस्व निर
यत्न निर्बंधैः स च एव जगदुद्धरणाय ॥६१॥ गच्छ तस्य नगरं शशिमौलेः स्वच्छदेवतटिनीकमनीय
तावता परमनुग्रहमाद्याद्देवता तव करिष्यति तस्मिन् ॥६२॥ एवमेनमनुशास्य दयालुः पा
वयन्निजदृशा विससर्ज ॥ भावतः स्वचरणांबुजसेवामेव स स्वदृशि कामयमानं ॥६३॥ पं
कजप्रतिभटं पदयुग्मं शंकरोस्य अनुरागादसहिष्णुः ॥ तद्वियोगमभिवंद्य कथं चित्तद्वलो

कयाद्देवता तव परमनुग्रहं करिष्यति ॥६२॥ एवमेनं श्रीशंकरं दयालुरनुशासनं कृत्वा दृशा स्वपाद
ध्याप वित्रीकुर्वन् भक्त्यातिशयेन स्वचरणांबुजसेवामेव सदैवाभिकामयमानं विससर्ज ॥६३॥ अस्य श्री
गोविंदनाथस्य गुरोः पंकजप्रतिभटं पदद्वंद्वमभिवंद्य तस्य पदयुग्मस्य वियोगमसहिष्णुरपि तस्माल्लि
लोकनं हृदया ज्ञेन यत्नमान्नुवन् कथंचिद्रगात् ॥६४॥

सहितापसश्रेष्ठः श्रीशंकरः काशीं प्राप तां धिशिनष्टि नीपानां कदंबानां घनेन व्याप्तं समीपं यस्याः आपगायाः न
द्याः निकटानां सुवर्णेन चेचितानां स्तूपानां यज्ञस्तंभानां पंक्तिभिः समुदंचिता शोभा यस्यां सा तां ॥६५॥ एवं काशीमु
पवर्ण्य गंगां वर्णयति स योगिराट् भगीरथेन तमस्या महती ब्रस्याल्पं तत्लीक्षणस्य तपसः फलभूतां उच्चितास्ती
रनिकुंजा यस्याः सर्पभूषणस्य शिवस्य जटानां तटस्य भूषामलंकृतिं गंगां संददर्श ॥६६॥ स्फाटिकमणिस

प्राप तापसवरः सहिकाशीं नीपकाननपरीतसमीपां ॥ आपगानिकटहाटकचंचद्यू
पपंक्तिसमुदंचितशोभां ॥६५॥ संददर्श स भगीरथतपसामंदतीव्रतपसः फलभूतां ॥ योगिरा
डुच्चिततीरनिकुंजां भोगिभूषणजटातटभूषां ॥६६॥ विष्णुपादनखराजनताङ्ग्रो भुमौलिशि
शिसंगमनाङ्ग ॥ या हिमाद्रिशिखरास्तनताङ्गा स्फाटिकोपमजला प्रतिभाति ॥६७॥ गायतीव कल
बद्दपदनादैर्नृत्यतीव पवनेश्चलिताब्जैः ॥ मुंचतीव हसितं सितफेनैः श्लिष्यतीव चपलोर्मिकरैर्या
॥६८॥ श्यामला क्वचिदपांगमयूखैश्चित्रिता काचनभूषणभाभिः ॥ पाटला कुचतटीगलितैर्या कुंकुमैः क

द्रजलां गंगां निधास्यक्षति ॥ विष्णोश्चरणनखात् जननाङ्गा संगमनं समागमः हिमाद्रिर्हिमाचलः ॥६७॥
अव्यक्ताक्षरैर्मधुरैर्भ्रमरनादैर्गायतीव वायुना संचलितैः कमलैर्नृत्यतीव श्वेतैः फेनैः हास्यं मुंचतीव चपलोर्मि
लक्षणहस्तैः आलिंगनं कुर्वतीव ॥६८॥ दिव्ययवनीकटाक्षकिरणैः क्वचिद्दृतिश्यामला आभूषणदीप्तिभिः क्वचन
चित्रिता चिचित्र भूषणभानां चिचित्रत्वत्तासास्तनतटीभ्यो गलितैः कुंकुमैः क्वचित्पाटला श्वेतरक्ता एवं भूता

DR. BHAU DAJI MEMORIAL
DR. BHAU DAJI MEMORIAL

७८ सः श्रीशंकरः गंगायाः जलमवगाह्य त्रिशितिकंठस्य शिवस्य जटाभ्यो जाह्नवीसलिलवेगेन हृतस्तस्याः आहृत्याः संयो
गेन पुण्येन परिपूर्णश्चंद्र इव उत्तलारो हृतः ॥७०॥ स्वःसिंधोर्जलकणैः अभिहिता शोभा यस्याः सा अस्य शंकरस्य
मूर्तिः सुतरां शुशुभे ॥ तत्र दृष्टांतः चंद्रकिरणैर्गलितां जलकणानां अंबाभिं शोभि यस्याः सा चंद्रकांतशिलारचि

सोऽवगाह्य सलिलं सुरसिंधोः स्फुरत्तार त्रिशितिकंठजटाभ्यः ॥ जाह्नवीसलिलवेगहृतस्य योगपुण्य
परिपूर्ण इवेंदुः ॥७०॥ स्वर्नदीजलकणाहितशोभा मूर्तिरस्य सुतरां विललास ॥ चंद्रपादगलदंबुक
णांका पुत्रिका शशिशिलारचितेव ॥७१॥ विश्वेशाश्चरणयुगं प्रणम्य भक्त्याहर्यो यो स्त्रिदशवरैः
समर्चितस्य ॥ सोऽनैषीत्प्रयतमना जगत्पवित्रे क्षेत्रेऽस्मिन् कियंतमार्यः ॥७२॥ इ
तिश्रीमाधवीये तत्सुखाश्रमनिवासगः संक्षेपशंकरजये सर्गोऽयं पंचमोऽभवत् ॥ मूलसंख्या

ता प्रतिमा यथा तद्वत् ॥७१॥ विश्वं इष्टे इति विश्वेट् तस्य विश्वनियंतुः विष्णुर्ब्रह्मादि देववरैः संपूजितस्य चर
णयुगं भक्त्या प्रणम्य प्रयतमनाः सोऽसावार्यः कियंतं कालं जगत्पवित्रे अस्मिन् क्षेत्रे अनैषीत् नीतवानि ७८
त्यर्थः ॥ प्रहर्षणीवृत्तं ॥७२॥ इतिश्रीपरमहंसपरिव्राजकाचार्य बालगोपालतीर्थश्रीपादशिष्य
दत्तवंशावतंसरामकुमारस्य सूनुपतिसूरिकृते शंकरविजयडिंडिमे पंचमः सर्गः ५ टी० सं० ६२२॥

श्रीगणेशाय नमः ॥ एवं सपरिकरं जीवन्मुक्तिसुखप्रापकं श्रीशंकरकर्तृकं चतुर्थाश्रमनिवाससुपवर्ण्य इदानीं तत्कर्तृकं ब्रह्मविद्याप्र
तिष्ठितिं सपरिकरां वर्णयितुमुपक्रमते । अथ स आदिनाथ काशी प्राप्त्यनंतरं कश्चित्कमलेक्षणो ब्राह्मणसुतो इधीतवेदो दिशि
दिदृक्षमाणः स्वभासा तेजोराशिरवलयन् आदरात् अगमत् इति योजना ॥ उपजातिः ॥१॥ दृढं दुःप्रापं गुरुकारुण्यनावमधिरुह्य
दुरुत्तरं संसारसमुद्रमुत्तितीर्षुर्वैराग्यवान् अतः स्त्रीपरिग्रहो येन स आगत्य श्रीशंकरस्य पदयुग्मचरणकमलयोरपतत् ॥ प
तितवान् वसंततिलका ॥२॥ तं ब्राह्मणकुमारं उत्थाप्य द्विजानां गुरुः देशिकः उवाच । त्वं कः ब्राह्मणो वा क्षत्रियादिर्वा धाम गृहं त्व

अथागमद् ब्राह्मणसूनुरादरादधीतवेदो दलयन् स्वभासा ॥ तेजोराशिकश्चित्सरसीरुहाक्षो दिदृक्षमाणः
किल देशिकेंद्रं ॥१॥ आगत्य देशिकपदांबुजयोरपतत्तसंसारवारिधिमनुत्तरमुत्तितीर्षुः ॥ वैराग्यवान् ह
तदारपरिग्रहश्च कारुण्यनावमधिरुह्य दृढां दुरापां ॥२॥ उत्थाप्य तं गुरुरुवाच गुरुर्द्विजानां कस्त्वं क
धाम सुत आगतवानसि धैर्य ॥ बालोऽप्यबालधिषणः प्रतिभासि मे त्वमेकोऽप्यनेक इव नैकशरीरभा
वः ॥३॥ पृष्टो बभाण गुरुमुत्तरमुत्तरज्ञो विप्रो गुरो मम गृहं बुध चोलदेशे ॥ यत्रापगा वहति तत्र कवेरकन्या
यस्याः पयो हरिपदांबुजभक्तिमूलं ॥४॥
त्वदीयं कः इदानीं त्वं कस्माद्वा गदागतः ॥ यतः आत्तं गृहीतं धैर्यं येन
सः अतो बालोऽप्यबालबुद्धिस्त्वं मे प्रतिभासि निर्भयत्वात् पुनश्च न विद्यते एकस्मिन् शरीरे अहंभावो यस्य स पा
ठांतरे तु न विद्यते एकस्य शरीरस्याभिमानं यस्येति व्याख्येयं ॥३॥ एवं पृष्टः उत्तरज्ञो गुरुं प्रति जगाद हे गुरो अह
विप्रः इति प्रथमप्रश्नोत्तरं द्वितीयस्योत्तरमाह ॥ हे बुध यस्याः जलं हरिपादांबुजभक्तेः कारणं सा कावेरी नदी यत्र काले
ति तस्मिन् चोलाख्यदेशे मम गृहमस्तीत्यर्थः ॥ सर्वं तस्य तत्र न किंचिदप्यविदितमिति संबोधनाशयः ॥४॥

६९ तत्तीयप्रश्नोत्तरमाह ॥ नहलोदर्शने घुरठाद्यमानो भ्रम्यमाणमानो मृत्विस्त्रिमूस्य धर्म्यभृणोत्तिभ्यो यदु चास्यइतिक्षुदृ. क्रमादि
मं देशमुपागतोस्मि एवं स्वभावे यस्य प्रभोऽज्ञनमायेद्य तिसंसारसमुद्रमज्जनं विभेमि तस्मात् कृपया संसारस
मुद्रात्पारं विधेहि ॥ उपजातिः ५ हे परगुरो प्राम रूपवान् मम गुणं वा दोषं वा अविचार्य त्वं अत्युग्रैः कटाक्षलक्षणैरम्
लहरभंगैः सुधाप्रवाहतरंगैर्यस्मान्नो केन स्विन्नमतएव दीनं मां कलया वलोकय गुणदोषविचारणे बाधकमाह ॥ गुणं

अदाद्यमानो महतोदिदृक्षुः क्रमादिमं देशमुपागतोस्मि ॥ बिभेमि मज्जन् भववारिराशौ नस्यारगं मां कृ
पया विधेहि ॥ ५ ॥ आपांगरूक्तंगरम्लहरभंगैः परगुरो सुन्चाद्रून दीनं कलय मामाभयिमन्वान् गु
णवादोषं वा मम किमपि संचिंतयासि चेत्तदा कैवल्याघो निरवधिकृपानीरधिरिति ॥ ६ ॥ स्यात्तेदी
नदयालुता कृतयशोराशिस्त्रिलोकीगुरो तूर्णं चेद्दयसे मम मार्द्य नलभाकारुण्यतः श्रीमति ॥
वर्षन्नम्बु मरुस्थलीषु जलभृन्न स्याद्धि यथा पूज्यते नैवं वर्षशतं पयोनिधिजले वर्षन्नपि स्व

वादोषं वा किमपि मम चिंतयसि चेत्तदा श्री शंकरः निरवधि कृपासमुद्र इति के वक्ष्यंति न कोपीत्यर्थः ॥ शि
खरिणी ॥ ६ ॥ एतदेव दृढयन् सदृष्टांतमाह ॥ हे त्रिलोकीगुरो श्री धूर्गुणदोषविचारं विनैव अद्य मम परि ७०
दयां करोषि चेत् तर्हि ते दीनदयालुता संपादित यशोराशिर्यथा स्यात्तथा श्रीमति कारुण्यतोयरा
शिर्न स्यात् यतो मरुस्थलीषु भूरि वर्षन् जलभृन्मेघः स द्धि यथा पूज्यते समुद्रजले वर्षशतं वर्षन्न
पि तथा न स्तूयत इत्यर्थः ॥ शा ॥ ७ ॥ तदीयसरस्वत्याः सारएव सारससुधाकूपारस्य चंद्रसंबंधमरतसमु

द्रस्य स्वत्सारसः स्रोतोभिः सत्सुखणानां सारसानां पक्षिणां कमलानां वा स्रोतोभिः प्रवाहैः संभृतं संमिश्रितं संश्रितं वा
संततमुज्ज्वलं जलं तस्मिन् क्रीडा यस्यास्तथाभूतासती मे मतिर्हे मुनेर्पंचत्वं स्फुरत्पंचशरः उन्मादनस्तापनश्च
शोषणः स्तंभनः तथा संमोहनश्च कामस्य पंचबाणाः प्रकीर्तिता उत्सुकः पंचसायकः कामः आदि येषां क्रो
धादीनां तत्कर्तृकेन न हतं अतएव स्पंचनी चंसुनश्च स्वहितज्ञानं अकिंचनमनात्कमात्रं तल्लोकं सर्वं प्रपंचं मा
लोकयंसं चतु खिचरत्तु सारसः पक्षिभेदे स्यात् सारसं सरसीरुह इति विश्वप्रकाशः ॥ ७ ॥ स्वरस्य सूर्यस्य धाम सु

तत्सारस्वतसारसारससुधाकूपारसत्सारसस्रोतस्संभृतसंततोज्ज्वलजलक्रीडामतिर्मे मुने ॥ पंचत्वं च
राद्रिपंचनहतं स्पंचं प्रपंचं हितज्ञानाकिंचनमाधिरं त्विमाखिलं चालोचयं संचतुर्थं ॥ ७ ॥ स्तोरं धामसुधामरी
चिनगरं पारंदरं मंदिरं कौबेरं शिबिरं कृतान्तनपुरं स्वामीरसन्स्यांतरं वैधंचावसथं त्वदीयमफणि
तिश्रद्धासमिद्धात्मनः शुश्रृंदुत्विद्दीनदोग्धि विरति श्रीघातुकं कौतुकं ॥ ८ ॥ नभोमारामाद्याः सुष
मविषवल्लीफलसमाः समारंभतेनः केमपि कुतुकं जातु विषयाः ॥ नगण्यं नः पुण्यं रुचिरतररंभा
कुचतटीपरीरंभारंभोज्ज्वलमपि च पौरंदरपदं ॥ ९ ॥

चाकिरणस्य चन्द्रनगरं पुरंदरस्येंद्रस्य मंदिरं
कुबेरस्य शिबिरं कृतान्तस्य यमस्य पुरं समीरस्य वायोः सद्म विधिश्च ब्रह्मणः सर्वोत्तरं अवसथं गृहं त्वदीया
या फणितावुक्तौ या श्रद्धा तया समिद्धः आत्मा यस्य तस्य शुद्धात्मविरोधा या वैराग्यलक्षणा श्रीस्तस्या घातुकं ना
शकं कौतुकं न दोग्धि न प्रपूरयतीति प्रत्येकं क्रियान्वयः ॥ ८ ॥ भो मा अस्माकं भवारामाद्याः योषितावयो विषयास्सु

८ कुसुमाद्योभनायायिषवल्लीतस्याः फलेनतुल्याः सुंदरस्य दुःखपल्याः फलं तेन नितरां नोस्माकं किमपि कौतुकं जातु कदा-
पि न समारंभितेना पुण्यं सुंदरतरायाः रंभारूपा अप्सरास्तस्याः कुचतटस्याः परिरंभस्यालिंगनस्यारंभेणा
ज्वलं पुरंदरस्येदं पदं इंद्रस्य पुरमपि नोस्माकं गणनीयं ॥१०॥ तर्हि ब्रह्मपदं भवतामादरस्पदं स्यादित्यत आह। नेति। अ
नेनेहामुत्रार्थभोगविरागो दर्शितः अथ अनयो स्तकं दर्शयति। कृतीन्द्रो करगुरुर्यद्वस्यं कल्याणात्मकं नयनं नवीनं न य
चनम कृतनतजिहातुरस्य कोरपंक्तीनां चंचुपुटे ह्वलितात्पूर्णचंद्रात्कलितायाः सुधाधारायाः आकारं पुनः
पुनर्वयमीहमहि मुहुर्मुहुः ॥११॥ द्यावाभूम्योः द्विजसुखं कुर्वतीति तथा तेः नवीनस्यासाधारणस्य यशसः प्रस्तावस्य

नव्यं चंद्रदुरिस्यं यदनपि भवेहादरपदं यच्चोपभव्यं नव्यं यदकृत कृतीन्द्रं करगुरुः ॥ चकोराली चंद्रपुटद-
लितपूर्णेंदुविगलत्सुधाधाराकारं तदिह वयमीहमहि मुहुः ॥११॥ द्यावाभूमी द्विजंकरैर्नवयशाः प्रस्ता-
पसौ वस्तिकैः पूर्वास्तपस्तपः पक्वेलिमफलैः सर्वौषधिमुष्टिंधयः दीनाद्युद्धरणोभवाय नितरां वैराग्यमाणैरलं-
कर्माणां प्रसितं त्वदीयभजनैः स्यान्ममकीनं मनः ॥१२॥

प्रसंगस्य सोयस्तिकैः स्वस्तियान्यकैः स्वस्ती त्याह
सर्थ तदाह इतिमाता कादिभ्य इवाच्य उसेन कप्रसयैः पूर्वस्य पूर्वाजितस्यानत्पतपसः पक्वफलैः सर्वेषामौ-
षधीनां मुष्टिंधयः सारोकर्षैः सर्वं च तत आधयः चेतिवाद्दी नानामाधुंकरणे भवाय संसाराय नितरां वैराग्यमाणैः
वैराग्यं कुर्वद्भिः शब्दैरलाहिनाकरोत्यर्थ अद्यप्रभृति त्वदीयभजनैरलं कर्मीणं कर्मक्षमं कर्मक्षमोलं कर्मीणाइत्यमरः
मदीयं मनः प्रसितं स्यात्तथा भूतस्तु त्वदीयभजनेषु लग्नं स्यादिति प्रार्थना सिता सक्तः यत्राप्यां स्तीया च सितेति
तत्तोघालग्नरप्रसितासक्ताधिकत्यमरः कः प्रसितं नामयस्तत्रैव संप्रति बद्धः कुरु एतत् कर्नोति परं बध्नात्यर्थ

ननु तर्हि यः कश्चिदपि गुरुस्त्वयास्वाभीष्टसिद्धये संसेव्यइतिचेत्तत्राह भिषकर्मत्वा भिषजां ऋणो मीति त्वत्तुलस्यस
दृश्यस्य यउदितः उक्तो अवतारो भूत्वा इदं पदं प्राप्तो अवतारउदित्तवतार इति वा सएवत्वं वैद्यानां मध्ये सद्वैद्यस्या
वतारभूतो भगवान्नोस्माकं संसारबंधलक्षणरोगदुःखनाशार्थमुपास्य इत्यर्थः ॥१३॥ इत्युक्तं यं तं ब्राह्मणस्तु
तु महात्मा श्रीशंकराचार्यः करुणामाधिधिवत् संन्यसनं मदीयं यत् तं सनंदनसंज्ञं देशिकेंद्रस्याद्यं शिष्यं महो
तः प्रकुः ॥१४॥ तदभीष्टं सम्यक्साधितवानित्याह। संसारलक्षणस्य घोरसमुद्रस्य तरणाय नारलं सायंत्रि

संसारबंधामयदुःखनाशे स एव नस्त्वं भगवानुपास्यः ॥ भिषकमं त्वा भिषजां ऋणो मीत्युक्तस्य यो
ऽस्य उदितावतारः ॥१३॥ इत्युक्तकं यं तं ऋपयामतात्मा मदीययत्सन्यसनं यथावत् ॥ प्राकुर्महातः प्र
थमं धिनेयं तं देशिकेंद्रस्य सनंदनाख्यं ॥१४॥ संसारघोरजलधेस्तरणाय नाभतत्सायात्रिकी
भवनमर्दयमानमेनं ॥ हे तात माश्रमतरीमधिरोप्य पारं भिन्ने निपातितकृपारसकेन्निपातः ॥१५॥
२ याता यप्यन्येमुं सेधितुं देवतां त्रास्त्वपि प्राप एवं विरक्ताः ॥ क्षेत्रेतास्मिन्ने च शिष्यं मस्य प्रभुः स्पष्टं कोकरी त्व

की भवनमर्दयमानं पोतवणिक् लंभयतीति पाल्यमानमेनं सनंदनं हे तत्तदानीमेवात्तमाश्रमतरीं संन्यासाश्रम
लक्षणां नौकां अधिरोप्य पारं नीतवान् नूयतो नितरां ज्ञिप्य सुसकापितायाः कृपायाः रसएव केनिपातो
नौकारंगैस्य नौकादंडः क्षेपणी स्यात्तदृशित्रं केनिपातितदु इत्यमरः ॥ निपातितः कृपारस एव केनिपातो
येनेति वा ॥१५॥ एवं प्रथमं विनेयमस्तां तं विस्तरेणाभिधायेतरेषां संक्षेपेण तमाह यद्यप्यन्ये विल्करवानंदगि
र्यादयो देवतांशान् अमुं श्रीशंकरं सेवितुं यातास्तेपि सनंदनवत्साम्येधिरक्तालस्मिन्नेव हि मुक्तक्षेत्रे एव नहमूलस्य

महादेवशिष्या अपि लोकरीसा यस्य पूर्वं शंकराचार्यशिष्या इति प्रसिद्धिं प्राप्नुमस्य शिष्यत्वमापुः शालिनु
कास्तौ तगोगविलोके ॥२६॥ तदिनस्फुट यति आरव्य विमोनमेव व्याख्या शिष्याःश्रुक नाम इवाद्यो
८१ यिथ्यस्य पवित्रं च तस्मिन् तं च तत्र रिति सेवांते ऽनुत्तरा उत्तर रहितायतः परिहलतोभिनावांगछंतः शंका
फलंकानां अंकुरायेभ्य स्तेच्छिन्न नटलसो मूले वृक्षाः शिष्या गुरुर्यु गुरोस्तु मोनं व्याख्यानं शिष्याश्च
छिन्नसंशया इत्युक्तत्वात् एव यस्य शिवस्य शिष्यास्तस्यैतस्य श्रीशंकरस्य विनीतलोकपंक्तिमुद्दलु

व्याख्यामौनमनुत्तराः परिहलच्छंकाकलंकांकुराः छात्राः विश्वपवित्रचित्रचरिता स्तत्वा
मदेवादयः ॥ तस्यैतस्य विनीतलोकलसितमुद्दलुं धारितीतलं प्राप्तस्याद्य विनेयतामुपगता ध
न्याः किलान्या दृशाः ॥२७॥ शेषः स्वाधुभिरेव तोषयति नद्वेदः पुमर्थार्थिनो वाल्मीकिः किं
चिराजएवचितथैरर्थैर्मुहुः कल्पितैः ॥ व्यासश्चेत्किल दीर्घसूत्रसरणिर्वाचं चिरादर्थदांव्यासः
शंकरदेशिकस्तु कुरुते सद्यः कृतार्थानिहो ॥२८॥

मस्मिन्मर्त्यलोकं प्राप्तस्येदानीं शिष्यतां प्राप्ताधन्याः किलयतोऽन्यादृशाः सर्वतोधिकसम्पाः शा॰ २७॥
शेषादिभ्यस्तस्याधिकत्वं वर्णयति शेषनागः साधुभिः शब्दैः एव पुरुषार्थार्थिनो नरान्तोषयति
नतु पुमर्थप्रदानेन सद्यः कृतार्थान्कुरुते तथा एव कविरजो वाल्मीकिरपि चितथैरस्यथार्थैर्मु
हुः कल्पितैरर्थैरिव नूनं तोषयति तथा दीर्घासूत्राणां सरणिर्यस्य सव्यासोपि चिरादतिविलंबेनार्थ

पुमर्थं चेहानीततांवान्छं व्यासे च शंकरस्त्वमेव हि ॥
स्तद्दोर्न्दतस्य सद्यः कृतार्थाननुकुरुते ॥२८॥

विष्णुतुल्यमहिमानं तं श्रीशंकरं अविमुक्ते शिवेन कटाक्ष्य निर्मुक्तेवासो येषां ते सेवां चक्रुः तदुपासनायाः फलं च
के भुरित्याह ॥ चक्रमार्गमनुसृतामपि स्वीयां बुद्धिं तस्योपासनया साध्वीं कृतवंतः स्वागता ॥१॥ भानुमंडले
किरणमंडले यथा चंडभानुः सूर्यः शोभते यथा च पुष्पनिचये पारिजातः यथा च नेत्रवारिजैः सहस्र
संख्याकैर्नेत्रकमलैर्वलत्रात्नुरिंद्रस्तद्वत् शिष्यपंक्तिभिः श्रीशंकरो उल्लसत् भासे ॥२०॥ अथेदानीं

चक्रितुल्यमहिमानमुपासांचक्रिरे तमविमुक्तनिवासाः ॥ चक्रसरत्यनुसृतामपि साध्वीं च
क्रुरात्मधिषणां तदुपास्त्या ॥१॥ चंडभानुरिव भानुमंडले पारिजातइव पुष्पजातके ॥ स्त्रदानु
रिवनेत्रवारिजैस्स्वात्रपंक्तिभिरलं सदुल्लास ॥२०॥ एकदा खलु चिपश्चिपुरं दूरफाललोचनहुता
शनभानोः ॥ विस्फुलिंगपदवीं दधतीषु प्रज्वलत्तपनकांतशिलासु ॥२१॥ दृश्यते खरमरीचिसर
स्वत्स्वरसत्ज्यपरमापि विभानो ॥ साधुनेकमणिकुट्टिममूर्ध्नि द्विमजालकवितावलपिधा ॥२२॥

शिवसंगमं वर्णयितुं प्रस्तौति । एकस्मिन्काले प्रज्वलत्सूर्यकांतशिलासु चियत्त्रिपुरद्विषो महादेव
स्यललाटनेत्रभूताया हुताशनाग्नेः क्लिष्टस्य भानोः किरणस्य विस्फुलिंगपदवीं दधतीषु सत्स्विसा
दृश्यम्यंता नावाकरो जान्हवी मज्जियमानलिप्यवाहितेनान्वयः ॥२१॥ रूरुभिर्मरीचिभिः सरस्वत्स
रस्य समुद्रपूरस्य सजिज्ञासितरिपुनश्च समीचीनानेकमणिभिः कुट्टिमो निबद्धभूमिः कुट्टिमास्ती
ति बद्धा भूरित्यहलायुधः तस्मिन्मूर्धन्यामाप्तेरत्नजालकेन द्वारचावलस्य मपूरस्यापिधानं दृश्य
ति भानोः परमोपिस्य परस्मिन्नूनं द्रजालिके सति ॥२२॥

पंकजावलिषु विलीनेषु मरालेषु हंसेषु सत्सु पुष्करांतर्जलमध्यमभिगत्वरे अभिगतवति मीने मत्स्ये सति शाखिनां वृक्षाणां छिद्रेषु शाखासु सम्यक् निद्रां कुर्वत्सु पक्षिषु सत्सु पर्वतानां कंदरस्थारण्या यस्य तथाभूते मधुपूरे सति दिवसमध्यमभागस्यैतानि विशेषणानि ॥२३॥ दिनस्य मध्यमभागे शिशिरं विधातुमिच्छु ग्रीष्मः सहस्रांशुकरः पंकजोत्पलानां परागेण कषायवर्णां जाह्नवीमभिययौ ॥२४॥ सः श्रीशंकरश्चतुर्भिः भीषणैः श्वभिरनुगतमत्यंजं चंडालं मार्गमध्ये समीपे नि

पंकजावलिविलीनमराले पुष्करांतरभिगत्वरमीने ॥ शाखिकोटरशयालुशकुंते शैलकंदरशरण्य मधूरे ॥२३॥ शंकरो दिवसमध्यमभागे पंकजोत्पलपरागकषायां ॥ जाह्नवीमभिययौ सह शिष्यैरात्मकृत्यं शिशिरयिषुः ॥२४॥ सोऽत्यजं पथि निरीक्ष्य चतुर्भिर्भीषणैः श्वभिरनुद्रुतमारात् ॥ गच्छ दूरमिति तं निजगाद प्रस्तुवाच स तं च शंकरमेनं ॥२५॥ अद्वितीयमनवद्यमसंगं सत्यबोधसुखरूपमखंडं ॥ आमनंति शतशो निगमांस्तारूप्य भेदकलना तव चित्रं ॥२६॥

रीक्ष्य दूरं गच्छेति तं अंत्यजं स्पष्टमुक्तवान् स च अंत्यजः तं शंकरं प्रत्युवाच ॥२५॥ यदुवाच तदाह ॥ अद्वितीयमिति तत्र दूरं गच्छेत्युक्तिः संगताभेदाभावादित्याशयेनाह ॥ एकमेवाद्वितीयं एष आत्मा पहतपाप्मा निरवद्यं निरंजनं असंगो ह्ययं पुरुषः सत्यं ज्ञानमनंतं ब्रह्म विज्ञानमानंदमित्यादि शतशो वेदांता अद्वितीयादिरूपमात्मानमामनंति ते स्मिन्नात्मनि तव वेदांतितत्वेन प्रसिद्धस्य भेदकल्पनास्तीत्यहो आश्चर्यमित्यर्थः ॥२६॥ तथान्यच्च भेदकलनाया स्तत्वमप्येवं दर्शयति

पंकेऽपि चिन्निर्वासीति द्योतयन्नाह ॥ दंडेन मंडितानलंकृताहस्ता येषां ते धृतकमंडलवः पाटलाभाये षां तथाभूतानि वस्त्राणि येषां पदाब्धीयानि येषां ते ज्ञानलेशेनापि रहिताः किल केचन यतयो गृहं संस्थानं वंचयंति ॥२७॥ गच्छ दूरमिति शरीरं परसत्कुमिच्छसि उतात्मानमिति विकल्पं दूषयति गच्छ दूरमिति हि दूष्यस्त वनेन तु चित्तमिति धनयन्नसंबोधयति हे विद्वन् अन्नमयं प्रत्याहान्नमयादन्नमयं कामयते नैवमि ध्यते इत्यर्थः ॥ द्वितीयं प्रत्याह साक्षिणः साक्षी न हि भिद्यते त्वमेतत्तातं योग्योसीसाद्यपि नाह ॥ हयति पुंगवेति ॥२८॥ प्रत्यगात्म

दंडमंडितकराधृतकुंडाः पाटलांबरवसनाः पटुवाचः ॥ ज्ञानगंधरहिता गृहसंस्था वंचयंति किल केचन वेषैः ॥२७॥ गच्छ दूरमिति देहमुताहो देहिनं परिजिहीर्षसि विद्वन् ॥ भिद्यतेऽन्नमयतोऽन्नमयं किं साक्षिणश्च यतिपुंगव साक्षी ॥२८॥ ब्राह्मणः श्वपचभेदविचारः प्रत्यगात्मनि कथं तव युक्तः ॥ बिंबितेंऽबरमणौ सुरनद्यामंतरं किमपि नास्ति सुरायां ॥२९॥ शुचिर्द्विजो हं श्वपचव्रजेति मिथ्याग्रहस्ते मुनिवर्य कोऽयं ॥ सत्त्वशरीरे घनशरीरमेकमुपेक्ष्य पूर्णं पुरुषं पु

राणं ॥३०॥

निर्भेदं दृष्टांतेनापि निराचष्टे ॥ ब्राह्मणः श्वपचभेदविचारस्त्वया दर्शितः कथं युक्तः न कथमपीत्यर्थः ॥ यथा गंगायां मदिरायां च प्रतिबिंबितेंऽबरमणौ सूर्ये अंतरं किमपि नास्ति तद्वदित्यर्थः ॥२९॥ ननु आत्मनि भेदशून्यत्वेऽप्यतिपवित्रस्य ब्राह्मणशरीरस्यातिपापिष्ठस्यांत्यजशरीरस्य कथं अभेदः स्यादिति चेत्तत्राह ॥ शुचिर्द्विजो हं हे श्वपच त्वं दूरं गच्छेति शरीरे घनेकेऽप्येकमशरीरं कालत्रयेऽपि शरीरसंबंधविनिर्मुक्तमत एव पूर्णं पुराणं भिन्नं वंसदैकरसं पुरुषं तं उपेक्ष्यायं मिथ्याभूत आग्रहस्त्वत्कः नायं त्वया चितो

मुनिश्रेष्ठस्याभिलाष्यमानाहहेमुनि यद्यपीति ३०

३

स्वस्वरूपं चिस्म स्वक्षणभंगुरे देहे हंतातीवानुचितेति बोधयन्नाह। अचिंत्यमतः केनापिकरणेनन्नव्यक्तमतइ सव्यक्तमतएवानंतमतएवाद्यं मतउपाधिमलरहितंस्वस्वरूपमोहाद् विवेकादिस्मस्तगजकरणवत्रेचलाकारेस्मिन्न तु भूयमानेकलेवरे अहं भगवः कथमाविरक्तो प्रकरी भवति चियेकिनां केनापि प्रकारेणास्माआविर्भावोन मुक्तेइत्यर्थः ॥ ३१ ॥ ननुयद्यप्येवं तथापि लोकसंग्रहेच्छये मयोक्तमितिचेन्नत्राह। विमुक्तपदवीं मुक्तिमार्गभूतां विद्यां प्राप्यापि तुच्छजनसंग्रहेच्छा किं जागर्ति अहो ऽसावश्वयो मायाविनां वरस्य श्रेष्ठस्य तस्य परमा

अचिंत्यमव्यक्तमनंतमाद्यं विस्मृत्य रूपं विमलं विमोहात्। कलेवरेस्मिन् करिकर्णलोला कृतिस्सहंता कथमाविरास्ते ॥ ३१ ॥ विद्यामवाप्यापि विमुक्तिपद्यां जागर्ति तुच्छा जनसंग्रहेच्छा। अहो महांतोपि महेंद्रजाले मज्जंति मायाविवरस्य तस्य ॥ ३२ ॥ दुष्कर्दीर्यवचनं चिरते स्मिन् सत्यवाक्य दनुविप्रतिपन्नः। अस्मदाद्यचरितो त्सजमेनं प्रस्मनाच्च सत्वाविस्मितचेता ॥ ३३ ॥ सत्यमेव भवतामद्दिगमीं प्रसवादितुभत्तवरे तत्। अंत्यजयोयमितिसंप्रतिबुद्धिं संसजामि वचसात्मविदस्ते ॥ ३४ ॥ जानते श्रुतिशिरांस्यपि सर्वे मन्वते च विजितेंद्रियवर्गाः। मुंजते हृदयमात्मनि नित्यं कुर्वते न धिषणामयमेदां ॥ ३५ ॥

त्मनो महतींद्रजाले भवदादयो महांतोपि मज्जंतीत्यर्थः ॥ ३२ ॥ एवमंत्यजवचनमनुवादन्संश्रीशंकरवाक्यमुदाहरन्नाह इति वचनमुक्त्वा ऽस्मिन्नंत्यजे विरामंगते सतिततः पश्चाद्विप्रतिपन्नो ऽयमंत्यजो भवति न भवतीति विप्रतिपन्नः सत्यवचनो ऽस्मदाद्यचरितो विस्मितचित्तः सन् श्रीशंकर एनमंत्यजं प्रत्युवाच्च ॥ ३३ ॥ यदुवाच तदाह सत्यमिति न त्वमंत्यजः किंतु द्विजभत्तवरेतिसत्वनायसंबोधनं ॥ ३४ ॥ भेदश्शून्यबुद्धेः अतिदुर्लभत्वान्न कोप्युपालंभनीयस्त्वादृशमिनाह। सर्वे अनेके श्रुतिशिरांसि श्रवणेन जानंति तथा अनेके विजितेंद्रियवर्गाः

द्विकेपिन कुर्वंतीत्यर्थः ॥ ३५ ॥ ननु तिष्ठतु तेषां वार्ता तव बुद्धिरभेदास्तिन वेत्यात्रांक्याह। अभेदबुद्धिरिसक्तत्व मनुचिंतं मन्यमानो नमो वयं ब्राह्मणिष्ठायकुर्म इति याङ्गन लभ्यो किमनुस्त्यस आज्ञेनसमाधत्तेयस्यतु दृढबुद्धेः सर्वमपि जगत् सदेवात्मव्यतिरिक्तं भातिस ब्राह्मणो ऽस्तु श्वपचो वा भवतु वंदनीय इति मम दृढा निष्ठा ॥ ३६ ॥ न केवलं वंदनीय एव किंतु वंचिधः सम्यक् ज्ञानवान् साक्षान्मम गुरुरेवत्याह। चिन्मूर्तिर्वा त्रो मा यांति निश्चेतनः स्फुरति से वमुक्तिति पतिः कावरयधिषु जंतुषु स्फुरति से चकालत्रये प्यहं दृश्यं तु नैवास्तीति यस्य मनीषा स चांडालो वा भवतु तथापि मम गुरुः ॥ ३७ ॥ किं बहुनात्वाविस्सर्वापि मम गुरुरित्याह। अस्मिन्लोके तत्तद्दृषणतुभयकाले यत्र यत्र विष्णु

भातियस्य जगत् दृढबुद्धेः सर्वमप्यात्मात्मयैतेव। स द्विजोस्तु भवतु श्वपचो वा वंदनीय इति मे दृढनिष्ठा ॥ ३६ ॥ या चितिः स्फुरति विष्णुमुखे सा पुत्रिकावधिषु से वसदाहं। नैव दृश्यमिति यस्य मनीषा पुल्कसो भवतु वा स गुरुर्मे ॥ ३७ ॥ यत्र यत्र च भवेद्विहबोधस्तत्तदर्थसमवेक्षणकाले। बोधमात्रमवशिष्टमहत्त्वस्य धीरितिगुरुः सन रो मे ॥ ३८ ॥ भाषमाण इति तेन कलावान् षनेक्षततमं त्यजमग्र्य। धूर्जटिं तु समुदैक्षत तं मौलिस्फुरद्देवचकलं सहवेदैः ॥ ३९ ॥

ज्ञानं भवेत्ततत्सर्वं मिथ्याभूतं सर्वोपाधिबाधेनावशिष्टं ज्ञानमात्रमहमेव न मत्तः किमपि व्यतिरिक्तमस्तीति यस्य बुद्धिः स यः कश्चित् आपनरो मम गुरुः एतेन गच्छ दूरमिति मयादेहजिहीर्षया नोक्तं नाप्यात्मजिहीर्षया ऽपि तु मयतादात्म्याध्यासवा जिहीर्षया सत्वं तद्वनास्तीति चेत्तर्हि त्वमपि मम गुरुः एवं सोपदेशोपि परिहृतो वदितव्यः ॥ ३८ ॥ एवं निर्मलीकं भाषमाणास्सतां त्यजविग्रहप्रकटितस्वस्वरूपं महादेवं ददर्शेत्याह इत्येवं प्रकारेणतेन सह भाषमाण एव श्रीशंकरः तमंत्यजमग्रेन ददर्श किंतु मौलौ शिरसि स्फुरती चंद्रकला यस्य तं चतुर्भिर्वेदैः सहितं धूर्जटिं महादेवं संददर्श नंनु श्रीशंकराद न्यस्य द्विजस्याभावात् कथ

दृष्ट्वा यथाभूतोऽयं कृतवान् तदाह तं दृष्ट्वा भयेन भक्त्या विनयेन धैर्येण हर्षेण विस्मयेन च युक्तः शिष्यानुमतः श्रीशंक
रो नेत्रयोर्विषयमभूत् सर्वयोगात्मकर्तर्यो यस्य तं महादेवं स्तवैस्तुष्टाव ॥ ८० ॥ देहदृष्ट्या तव दासोऽहमस्मि यतः
शंभुरेव भवत्यस्मादिति शंभुस्त्वमेव तस्याभिलगुणयुक्त इति स च यन्त्वाह ॥ शंभो जीव इति जीवदृष्ट्या हं तवांशो
जातः नन्वकथं निरवयवस्य मम अंशस्त्वमिति चेद्यथा सर्वं भूम्यश्वत्थस्यापि तवसूर्यचन्द्रवह्निलक्षणत्रि
नेत्रविग्रहवत्त्वं तथा मायया लब्धांशस्यापि सम्भवादित्याशयेन ॥ संबोधयति त्रिदृष्टइति शुद्धात्मदृ

भयेन भक्त्या विनयेन धैर्येण युक्तः स्व हर्षेण विस्मयेन ॥ तुष्टाव शिष्यानुमतः स्तवैस्तं दृष्ट्वा दृग्गोचरं गत
मष्टमूर्तिं ॥ ८० ॥ दासस्तेऽहं देहदृष्ट्यास्मि शंभो जातस्तेंऽशो जीवदृष्ट्या ॥ त्रिदृष्टे सर्वस्यात्मनात्म
दृष्ट्या त्वमेवेत्येवं मे धीर्निश्चिता सर्वशास्त्रैः ॥ ८१ ॥ यद्यालोकाद्वलब्धिरपि च लोका धीतिमिरोन
मंजूषा यस्य जगति न ग्राणोऽचैनरवनिः ॥ यं तं तच्चैकांतं रहसि यतयो यत्प्रणयिनो नमस्तस्मै तस्मै ति

ष्ट्या तु त्वमेव त्वदन्यएवाहं तत्त्वमस्यादिश्रुतेः ॥ तत्र योग्यं संबोधनं सर्वस्यात्मन्निति त्वेवं प्रकारेण स
र्वस्मिन् शास्त्रैर्मे बुद्धिर्निश्चयं प्राप्ता शालिनी ॥ ८१ ॥ प्रसिद्ध शिरोभूषणमालितो ह्येतिरकं दर्शयन् स्वामि
नं शंकरं नमस्करोति यद्यादिति प्रसिद्धस्य ताद्दशमणेरालोकाद्बहिरेव लोकोऽधीति तिमिरो मंजूषापेटाग्रा
यो निकषः रवनिश्चयति भिः अभ्यर्थिता: प्रसिद्धस्य प्रसिद्धा अत एतस्माद्दसुलक्ष्यायतस्मै तस्मै इद
लक्ष्याय निखिलजगज्जिरोभूषणमणये तस्मै लंपदलक्ष्यामि ॥ न्यायनमः प्रणे भावो स्तु यस्य
प्रकाशादन्तर्बहिरपि च लोको धितिमिरो यस्य भासा सर्वमिदं विभातीति श्रुतेः ॥ निजगति यस्य मंजूषा
नास्ति नापि शाणो नापि रवनिः यत्प्रणयिनो यस्मिन् प्रीतिमन्तश्च तयोरहस्य कांतं रहसि ध्यायन्तं तं तस्मै इत्यर्थः ॥ ८२ ॥

गुरुकृपया शास्त्रात् लब्धस्य तत्त्वज्ञानस्यालंबनभूतखंडैकरसं स्वतत्त्वं नमस्यति अहो शास्त्रं परमतत्त्वबोधक
त्वात् धन्यतमं यद्यप्येवं विधं शास्त्रं तथापि यदि श्रीगुरुकृपया अस्मिन् लोके शिष्येणानस्याप्तिर्हि शास्त्रात्
किं न किमपीत्यर्थः ॥ चिंतासंचितासंपादितासा गुरुकृपया किं कुर्यात् किंफलं दास्यति तत्त्वज्ञानस्यावि
शेषेऽन्यबोधो नास्ति बोधानुसारिका सापि निष्फलेत्यर्थः ॥ तथा असौ बोधश्च किमालंबः आलंबनशून्य
एव यदि मम परतत्त्वं न स्यात्तस्मात्तत्त्वज्ञानालंबनभूताय परतत्त्वाय स्वात्मने न्यायतस्मै परमात्मने नमः
तथैतस्य तस्मादित्यर्थो यावद्धजगत्याश्चर्यबुद्धिर्यतो यस्मात्परं आश्चर्यबुद्धिविषयो नास्तीत्यर्थः ॥ ८३ ॥ एवं

अहो शास्त्रं शास्त्रात् किमिह यदि न श्रीगुरुकृपा चितासा किं कुर्यात् ननु यदि न बोधस्य विष
यः ॥ किमालंबश्चासौ न यदि परतत्त्वं मम तथा नमस्तस्मै तस्मै यदवधिरिहाश्चर्यधिषणा ॥
स्तुत्वेशं सुहारस्यचैनं भगवंतं संस्तुवंतमथ च प्रणामतं ॥ बाष्पपूर्णनयनं मुनिवर्यं शंकरं सबहुमान
मुवाच ॥ ८४ ॥ अस्मदादिपदवीममजस्त्वं शोधितातबतपोधननिष्ठ ॥ बादरायणइवात्तमविस्यासः स
द्गुरुर्ण्यमदनुग्रहपात्रं ॥ ८५ ॥ संविभज्य सकलश्रुतिजालं ब्रह्मसूत्रमकरोद्दनुशिष्टः ॥ यत्र काणभुजसां

स्तुत्वेशं श्रीशंकरं प्रति श्रीमहादेवो यदुक्तवान् तद्दर्शयितुमाह ॥ स्तुत्वेति स्पष्टा ॥ ८४ ॥ यदुवाच तदाह अस्मदादिति अभजः प्र
सवादनादिति सतां मध्ये श्रेष्ठ व्यासवत्त्वमपि मदनुग्रहपात्रं स्याद्धलासीर्वादः ॥ ८५ ॥ सूत्रभाष्यरचनेन नियोक्तुमुप
क्रमते नुशिष्टः सम्यक् शिक्षितः अनुपश्चात् शिष्टा यस्मादिति वा स सर्वशिष्याग्रणी वेदव्यासो वेदकदंबं सम्यक्
विभज्य ब्रह्मणा एकवेदं सस्यते येन तत्तथा अथातो ब्रह्मजिज्ञासा जन्माद्यस्य यत इत्यादि शास्त्रयोनित्वात् तत्तु
समन्वयादित्येवमादिरूपमकरोदित्यर्थः ॥ अनुपश्चादकरोदिति नायत्र ब्रह्मसूत्रे काणादसांख्यपातंजलप्रभृतीति

८५ तत्र ब्रह्मसूत्रे मूढमतयः कलिदोषात् दुष्प्राज्ञैर्भिर्वेदवचनैः उद्धलितानि उपहतानि भाष्यकाणि कुत्सितभा
ष्याणि अरचयन् रचितवंतः केचित् बत कुबुद्धयः ज्ञातं यैः दूष्यतां चोपगतानि ॥ ४८ ॥ ततस्मात् विदितवेदशिरसां अर्थो
येन तथाभूतो भवान् तानि कुबुद्धीनां मतानि निरस्य सूत्रभाष्यं विधातु विधोलो भाष्यलक्षणं तु सूत्रा
र्थो वर्ण्यते यत्र वाक्यैः सूत्रानुकारिभिः स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुरिति सागरादिवर्णनस्य
भाष्यत्वव्यावृत्तये सूत्रे सकलवार्तिकस्य तत्त्वनिरासाय सूत्रानुकारिभिः इति वृत्तेस्तत्त्व स्यादस्यार्थमुक्तं
स्वपदानीति उत्तरभाष्येभ्य उत्कृष्टताय तेनाय विधिना निष्ठिसमस्तश्रुतिभिः उद्धलिताभिर्युक्तिभिरासमंतात् युक्तं ॥

यत्र मूढमतयः कलिदोषाद् उज्झितवेदवचनोद्धलितानि । भाष्यकाण्यरचयन् बत कुबुद्धेर्दूष्यतामुप
गतानि च केचित् ॥ ४८ ॥ तद्वचांसि विदितवेदशिरस्यार्थस्तानि दुर्मतिमतानि निरस्य । सूत्रभाष्यम
धुना विदधातु श्रुत्युद्धलितमुक्तियुक्तं ॥ ४९ ॥ एतदेव विबुधैरपि सेव्यं सर्वनीयमनवद्यमुदारं ।
लौकिकैरमलमानिसभाषामुष्य वाप्स्यति वरां वरिवस्यां ॥ ५० ॥ भास्कराभिनवगुप्तपुरोगान्नी
लकण्ठगुरुमंडनमुख्यान् । पंडितानथ विजित्य जगत्यां ख्यापयाद्वयमतं परतत्त्वं ॥ ५१ ॥

ननु मया क्रियमाणं भाष्यमपि केषांचित् अनादृतं स्यात् इत्याशंक्य तर्हि किमर्थं कर्तव्यमिति चेत् तत्राह ॥
एतदेव तावकं भाष्यमिंद्रसहितैः देवैरप्यस्पर्शनीयं भविष्यति अपि च मनुष्यैः स्पर्शनीयं भविष्यतीति
किमु वक्तव्यं यतो निर्दोषमुदारं च न केवलं सेव्यं देवैः स्पर्शनीयं भविष्यत्यपि तु चतुर्मुखसभायाम
पि श्रेष्ठां पूजां प्राप्स्यतीत्यर्थः ॥ ५० ॥ किंच भास्कराभिनवगुप्तादीन् अभिनवगुप्तः शाक्तो नीलकंठो भेदवादी
शैवः गुरुः प्रभाकरो मंडनमिश्रो भाद्रमतानुयायी एतत्प्रभृतीन् पंडितान् अथ भाष्यकरणानंतरं विजित्य
एतस्यां अद्वयमतं परतत्त्वं ख्यापय अद्वयबुद्धिं इति संबोधनं ॥ ५१ ॥

किंच मोहलक्षणसंतमसभानून् शिष्यान् तस्मिन् देशे परतत्त्वसरण्याः पालनाय संस्थाप्य तदनंतरं कृतमवतारकृत्यं
येन समाप्स्यसि ॥ ५१ ॥ एवमेनं श्रीशंकरमनुगृह्य करुणापात्रं शिवो वेदैः सहांतर्धानमगात् शंकरोपि विस्मययुक्तेन
मनसा शिष्यैः सह स्वर्णदीं गंगां प्रत्यगच्छत् ॥ ५२ ॥ आह्निकविधिं संनिवर्त्य गुरुमीशं महादेवं ध्यायतो गुणसमु
द्रस्य श्रीशंकरस्य मानसं सर्वलोकहिताय भाष्यकृत्ये उद्युक्तमभूत् ॥ ५३ ॥ स विश्वनाथात् कर्तृत्वशक्तिं प्राप्य प्री
तः सन् अविकासभाजः काशीपुरान्निरगमत् ॥ चंचरीकनिबंधतो गंधलुब्धभ्रमरनिबंधनरूपात् सरोजमु

मोहसंततमसवासरनाथांस्तत्र तत्र विनिवेश्य विनेयान् । पालनाय परतत्त्वसरण्यामानुपेक्ष्य
सि ततः कृतकृत्यः ॥ ५१ ॥ एवमेनमनुगृह्य कृपालुर्नागमैः सह शिवोंतरधत्त । विस्मितेन मनसा स
पा ह शिष्यैः शंकरोपि सुरसिंधुमुपासीत् ॥ ५२ ॥ सन्निवृत्य विधिमाह्निकमीशं ध्यायतो गुरुमथाखिल
भाष्ये । कर्तुमुद्यतमभूद् गुणसिंधोर्मानसं निखिललोकहिताय ॥ ५३ ॥ कर्तृत्वशक्तिमधिगम्य स विश्व
नाथात् काशीपुरान्निरगमत् स्वविकासभाजः ॥ प्रीतः सरोजमुकुलाद् इव चंचरीको निर्बंधतः सुखम
वाप यथा द्विजेंद्रः ॥ ५४ ॥ अद्भुतदर्शनविद्यां भुवि सार्वभौमो मा पालयेषद् स्फुरदिंदुबिंबसितातपत्रं ।
अस्त्वाचलेयहतिचारुपुरः प्रकाश व्याजेन चामरमधादिव दिक्षु कांता ॥ ५५ ॥

कुड्मलादिव तिपुरोपमायथा पाक्षिणां भिक्षोरहं सोतिगंधसुखमाप्नोति तथा अयं श्रीशंकरोपि सुखं प्राप प्रल
यवत् उपमावाचको यथा शब्दो नादने चैव उपमा । यं. ५४ । भुवि अद्भुतत्वात् चिरं सार्वभौमो चक्रवर्ती
एवं श्रीशंकरो गच्छतीति सत् स्फुरद्बिंबात्मकं श्वेतच्छत्रं मस्तकाचलेयहतिसत्पुरः प्रकाशव्याजेन दिक्षु कां
कृतैः पुण्यैः प्राप्तवानस्मीति अहो मद्भाग्यमालास्यमितिभावः॥ ३७॥ अतोत्रास्मिन्लोके सचकराप्त
भंगीं धन्यतमो अवगाहते तां विशिनष्टि दयानामपि चतुर्विधपुरुषार्थकरीमिह च संसरतां जना
नामभिमुक्तिकरीं करुणालक्षणोर्मिभिः व्याप्तां प्र॰ ३८॥ ननु प्रमदालीनां कलोलाशयानां उक्तहयंवगा
हनास्यभवात्कथमिह संसरतां विमोक्षकरत्वं तस्याहुल्लावक्याह॥ केचिदिति विषयिणश्चंचललोचने

यस्यां लासो अंगनानां कुचतटीवक्षोजदेशे चालनादिरूपा सुलीला सुचंचलानां करणाः संति चेत् संतु तथाप्यमी
वशीकृतचित्ताः अप्रतिमयवासां कोशस्य पात्रं मंजूषादिरूपाः श्रीगुरोस्तव आहारेभ्यः क्षरितस्यानिःस्रत
स्यामृतस्य येऽखिलस्य लहरीलक्षणा सुदोलां सुखे स्व तिलकं कृपरिरंभोऽस्मादिति आलिंगनं संभ्रमास्तु रया
कालेऽभ्यासस्थानविपर्ययः कलाशिल्पेन पुण्यं प्रियानुकरणं लीलायाकृभिः गत्याचन्वेष्टव्याश्शार्दू ३७
किंच उद्यदुद्दामघनप्रोद्यदूर्जस्वललक्षणेन सोल्लासेन सद्यः परिहृतमज्ञानलक्षणं तिमिरं यैः चिंतायाः विचार
रूपसंतानलक्षणैः तंतुभिः ग्रथितानां नवीनानां भवत्सूक्तिलक्षणमुक्ताफलानां समूहैः चामीकरवंतो हारिणो
मुक्तुरहिता हारिणो मनोहराः इति या अमी संतो भवद्विधाः संतोषनंतः संति अतो हे यतिवर पंडितानां मंडनमनः

चिंतासंतानतंतुग्रथितनवभवत्सूक्तिमुक्ताफलौघैरुद्यदूर्जस्वलौघैः सद्यः परिहृततिमिरैर्हारिणो हा
रिणोऽमी॥ संतः संतोषयंतो यतिवर कि मतो मंडनं पंडितानां॥ विद्याकृद्धास्त्वयं तां धृतमरवमुखरा
न्याद्दयं तीहृणीते ॥ ८ ॥ संतः संतोषयाबंदधतु नवरुताम्नायशोभैर्यैः शोभिः साराली कैरुलूकादिव
निखिलखलामोहमाहो वहंतु ॥ ९ ॥ धीरश्रीशंकरार्यप्रणतिपरिणतिप्रक्षयद्दुरितध्वांताः संतो
वयं तु प्रचुरतरनिजानंदसिंधौ निमग्नाः ॥ १० ॥ चिंतासंतानशाखी पदसरसिजमार्वदनं नंदनं तस्य
कल्पः कल्पवल्ली मनसि सुगुण तुल्या वर्णिनाऽस्य वर्णदीयं स्वर्गदुर्गोऽस्य चिरस्य सद्भजनमतः संविचार्यदसा [illegible]

परं किं अयमेव पंडितानां अलंकारो न त्वन्यो ऽत एवातिरम्याविद्यालक्षणांगना पुरंदरप्रमुखानां वास्यतीत्येतान्
दृणीते ॥ ३८ ॥ किंच तव रुताम्नायस्योपदेशास्य शोभायेषु तैः यथा न्याभिः संतः संतोषस्य पोषं पुष्टिं धारयंतु अहो
स्त्र्यसंबंध्या लोके रूलूकादिव ते निखिलखलामोहं वहंतु वयं तु श्रीरम्यश्रीशंकरार्य प्रणतेः परिणत्या प्रणामस्य
परिणामेन प्रक्षयद्दुरितं तमो येषां तादृशाः संतः प्रचुरतरनिजानंदसागरे निमग्नाः धीरश्चासौ श्रीशंकरश्चेति
वा ॥ ३९ ॥

किंचेतत् चिंतनं सर्वाभिलषितसंपादकत्वात् कल्पवृक्षस्तथा तेऽपदकमलयोः वंदनं नंदनं तथा त्वद्गुणकोमनसि संक
ल्प आराधना दीक्षा कल्पवल्ली तथा तव गुणास्तु ते वर्णिना ऽयं स्वर्णदीगंगा तथा स्वर्गस्तेऽ दृक्गोचरके दाक्षविषये अतो
हे शंकरार्य दुरमबंधिधं त्वत्पदजनं दिव्यार्पत्यतीयावर्णितादृत्यं स्वर्गमिन्द्रछत्रणवदति लघुमन्यंते ॥ ४० ॥ तत्तस्मादसुहृं
तादि सर्वं परित्यज्य भयं च चरणो शरणं प्रणामि अतो अमुं मां किंकरं अनाथे आज्ञापय प्र० ४१ इत्येवं सुबुद्ध्या
मंडनेन स्तूयतो किंभिरुदीर्णगुणा आत्मवान् सो श्रीशंकरस्तमनुगृहीत भिक्षुरस्य मंडनस्य सहधर्मचरीयं
लीलां सुमुदे क्षतां विदितो मुनेरागायो यया सा सुरस्वती भूमिमवन्यत्त ॥ ४२ ॥ यदुवाच तदाह हे यतिव्याघ्र
पुंडरीक सितांभाजेऽस्मिन् छत्रेचभेषजे ॥ कोऽशकारांतरे व्याघ्रे पुंडरीकोऽग्निदिग्गजे इति विश्वप्रकाशः ॥

तद्देहं विसृज्य सुतस्वरगेहं प्रविश्यानि कर्मचंगेहं वा विहितं ॥ शरणं वृणोमि भगवच्चरणावनुशाधि किं
करममुं रूपया ॥ ४१ ॥ इति स्तूयतो किंभिरुदीर्णगुणः सुधियात्मवाननुजिघृक्षुरसो समुदैक्षतास्य
सहधर्मचरीं विदितां अथया मुनिमवोचत सा ॥ ४२ ॥ यति पुंडरीक तव वेद्मि मनो ननु पूर्वमेव विदि
तं च मया ॥ दुरवाविता पस सुखाद्विलं लघुदीयते शृणु सभ्यजनः ॥ ४३ ॥ मम भिजा तुमातुरूपकंठरु
षिप्रभयात दिप्रतिभये त्वद्दुः सितभूति रूषितसमस्ततनुः श्रमणो व्यपाद परस्यमीदृशः ॥ ४४ ॥ परिरि
स पाधि मुखयालघिया ऋचितांजलिर्नमितप्रवंततनुः ॥ जननीत सत्यतदीय मनुमुनिमन्वयुंक्त म [illegible]

अतस्तव मनोगतं वेद्मि पूर्वमेव चेहाग्निमत्र जन्मनि यतः सर्वं भविष्यं तापसमुखान्मया विदितं लघु
दीयते सभ्यजनैः सह त्वं शृणु ॥ ४३ ॥ एवं तापसमुखालिविदितं वृत्तांतं आविष्कुं भिक्षुरवी रूपं
तत्र आयय लिजानु केदाचित् मातुरूपकंठजुषि मातृसामीप्यं सेवमानायां मयि संसांप्रभयात् विद्युतप्र

लिभपाजटायस्य सितभस्याग्येतभस्मनारूषिताल्लिप्ताल तनुः शरीरं यस्य सः अपरस्सूर्य इव कश्चित्तपस्वी अभ्य
यात् अभ्यगमत्॥४७॥ तदा पाद्यार्घ्यादिपूजया मुनिं परिगृह्य रचितांजलिः नमिता पूर्वतनुः शिरोभागो य
या सा जननी अन्तावचिरं यस्यै पूजां अयनत मम मुनिं समभविष्यमाखिलमन्वयुक्त दृष्टवती॥४८॥ हे भग
वन् स्वदुहितुर्भविष्यमहं न जानामि भयान्तुहितपसा च वेति आर्य सद्दृशा नम्रजनेगोप्यमपि कृपया कथय से
या॥४९॥ एवं तं सन्मुखी सापरुधे पदधुति मे दुहिता किं यदायुः प्रापस्यतिसुतानुरकांतिवा प्राप्स्यति पतिं
कीदृशमुपेष्यति तथा प्रभूत धनधान्यवती सती यज्ञानपि करिष्यति॥५०॥ इत्येवं प्रसुवा जनन्याष्टष्टभा

भगवन्त्वयेक्षि दुहितुर्मम भाव्याखिलं च वेत्ति तपसा हि भयान्॥ प्रणतेजने हि सुधियः कथयंत्यपि
गोप्यमार्य सदृशाः कृपया॥४९॥ किं यदापुराप्स्यति सुतानुरकांतिवादयितं कथं विधमुपेष्यति च॥
अथ च ऋत्वनपि करिष्यति मे दुहिता प्रभूत धनधान्यवती॥५०॥ इति स दृष्टभाविचरितः प्रसूवाक्षण
मात्रमीलित विलोचनकः॥ सकलं क्रमेण कथयन्निदमप्यपरं जगाद सुरहस्यमपि॥५१॥ निगमाध्वनि
प्रबलबाध्यमतैरभितैरधिक्षिताखिलेद्रुहिणः पुनरुद्धृतिधीर्युरयं तीर्थरवंतु प्रतिभाति मंडनकवी
द्रमिषात्॥५२॥ तमवाप्य रुद्रमिव साद्रिसुता दुहिता तवाच्युतमिवाब्धिसुता॥ अनुरूपमाहृतसमस्त

भाविचरितं यस्मै सः क्षणमात्रं मीलिते विलोचने यस्य विलोचनके नेत्रे येन सः क्रमेण सकलं कथयन्
इदमप्यपरं रहस्यं अतिगोप्यं अपि जगाद॥५०॥ वेदबाह्यमतं येषां कर्मधारयो वा प्रबलेभ्यस्तैर्बाह्यमतैः संख्या
तैर्वेदमार्गे विक्षिप्ते लिप्तमोखिले उच्छिन्ने सति द्रुहिणो ब्रह्मा वेदमार्गमुद्धर्तुमिच्छुः मंडनकवींद्रव्याजेनायती
र्य किल भाति प्रकाशते॥५१॥ पर्वतसुता पार्वती रुद्रमिव समुद्रसुता लक्ष्मी विष्णुमिव सा तव सुता तं द्रुहिणमवतार

अथानंतरमिहास्मिन्लोके प्रबलैः कुमतैर्नष्टमोपनिषदं सनातनं सिद्धांतं साधयितुं ननु शिवो मानुषं वपुरवाप्य स्वचरणन्यासैः
भूमिमलंकरिष्यति॥५३॥ तेन यतिवेषजुषा श्रीशंकरेण सह तव दुहितुः पतिर्वादं प्राप्स्यते नाधिजितः सन्परित्यज्य गृहो
जगतां तारणं तं शरणं गमिष्यति॥५४॥ इति वाचमुदीर्य स मुनिः प्रययौ मम सर्वं भविष्यं यथा तेनोक्तं तथैवाभूत्
तस्माद्स्य मम पत्युर्भवदीय शिष्यपदं मुनेर्वचसि कथमसत्यं भविष्यति॥५५॥ यद्यप्येवं तथापि मद्विजयेन सकल

अथ नष्टमौपनिषदं प्रबलैः कुमतैः सनातनमिह साधयितुं॥ ननु मानुषं वपुरुपेत्य शिवः समलंकरि
ष्यति धरां स्वपदैः॥५३॥ सह तेन वादमुपगम्य चिरं दुहितुः पतिस्तु यतिवेषजुषा॥ विजितस्तमेव
शरणं जगतां शरणं गमिष्यति निरस्तगृहः॥५४॥ इति गामुदीर्य स मुनिः प्रययौ सकलं यथातथ
मभूत्खलु मम॥ भवदीय शिष्यपदमस्य कथं वितथं भविष्यति मुनेर्वचसि॥५५॥ अपि तु त्वया न स
मग्रजितः प्रथिताग्रणीर्मम यतिर्यदहं॥ वपुरर्धमस्य न जिता मतिमन्नपि मां विजित्य कुरु शिष्यमि
मं॥५६॥ यद्यपि त्वमस्य जगतः प्रभवो ननु सर्वविन्परमः पुरुषः॥ तदपि त्वयैव सह वादकृते हृदयं बि

भेत्स्या पराजितत्वात् मां विजित्य एनं शिष्यं कुर्वित्याह अपि तु किंतु प्रथिता नामाग्रणीर्मम यतिरयं त्वया समग्रो
जितो न भवतीति तथा यद्यस्मात् अहमस्यार्धशरीरं न जिता अतो नार्धपती तिरस्कृतः एतन्मूलं तु योग्योसी
ति सूचयन् संबोधयति हे मतिमन्निति तस्मान्मामपि विजित्य एवं शिष्यं कुरु॥५६॥ ननु मम स्वरूपाभिज्ञा मम या

इत्येवं यजनशीलस्य यत्प्राक्कथितमर्थवदनिंदितपदं मधुरं वचो निशाम्यासौ तं मुदितो यतिश्रेष्ठः श्रीशंकरः प्रतिवक्तुमैच्छत् ५८
मेहृदयं वादकलहोत्सुकं त्वा प्रतिपद्यत इति त्वमाय दुक्तं हे बले तद्युक्तं हि यस्मान्महायशाः सधूजनेन कथां न कथयंतिप८
स्यमतरक्षणाय प्रवृत्तेन त्वयैतन्न वाच्यमित्याशयेन सरस्वत्याहे हा स्मिन् लोके स्वमतं प्रभेतुं मः प्रलयं करोति स स्वधूज
नो स्त्यन्यो वा स्तु तस्य जये हे भगवन् स्वपक्षरक्षणपरैर्यतनं कर्तव्यमेव खलु प्रसिद्धं ६८ तत्रैवं विधो वृद्धानुशाहरति अत एव
गार्ग्या रव्यया अबलया सह याज्ञवल्क्यो मुनिराट् कलहमकरोत् तयोः संवादो बृहदारण्यक उक्तस्तथा जनकः सुलभा

इतियाज्ञकसहधर्मचरीकथितं वचोर्थवद्गर्घपदं मधुरं॥ निशाम्य मुदितः सुतरां प्रतिवक्तुमीहत यतिप्रवरः
५८ यदि वादि वादकलोत्सुकतां प्रतिपद्यते हृदयमित्यबले तदसांप्रतं न हि महायशसो महिलाजनेन कथयंति कथां॥ ५९॥ स्वमतं प्रभेत्तुमिह यो यतते स वधूजनोस्तु यदि वा त्वितरः॥ यतितव्यमेव खलु तस्य जये निजपक्षरक्षणपरैर्भगवन्॥ ६०॥ अत एव गार्ग्यभिधया कलहं सह याज्ञवल्क्यमुनिराट् करोत्॥ जनकस्तथा सुलभया बलया किममी भवंति न यशोनिधयः॥ ६१॥ इति युक्तिमद्दितमाकलयन् मुदितांतरः क्रतिसरिज्जलधिः॥ स तया विवादमधिदेवतया वचसामियेष विदुषां सदसि॥ ६२॥ अथ सा कथा प्रववृते स्म तयोरुभयोः परस्परजयोत्सुकयोः॥ मतिचातुरीरचितशब्दझरी श्रुतिविस्मयीकृतविचक्ष

याअबलया सह कलहमकरोदिति मोक्षधर्मे उक्तं यदुक्तं महायशास इति तत्राह किमेता बताअमी याज्ञवल्क्यादयो यशोनिधयो न भवंत्यपि तु भवंत्येव ॥ ६१॥ एवं युक्तियुक्तं तथा कथितमाकर्णयन् मुदितांतरः
क्रतिलक्षणानां नदीनां समुद्रः श्रीशंकरो वचसामधिष्ठात्र्या देवतया सरस्वत्या विदुषां सदसि वादमियेष

क्षिप्र परयुक्तिभरैरर्धाहमनयोः कथितं श्रुता फणीशोपि शेषमपि नातुलयन्नापि सूर्यं नापि वृहस्पतिं नापि शुक्रं जगत्य
परं नातुलयन्निति किं वक्तव्यं॥ ६४ तेष्वह्निक कालं संध्यावंदनादिषु नियतं कालं विना ६५ अथ शारदां अकृत पाक
प्रमुखेषु नाकिष्विव यद् याकृत प्रभृतिषु खिलेषु शास्त्रसमूहेषु तं परं मुनिं जेतुमशक्यमात्म निर्विचिंत्य पुरेन पौरं
वक्ष्यमाणां प्रतिसंचिंत्यमत्॥ ६६॥ यद्यचिंतयत्तदर्शयति अतिबाल्य एव कृतसंन्यसनयेन नियमैः परैरविधुरा
विकलश्च सदा कदापि नियमविनिर्मुक्तो न भवतीत्यर्थः अतः कामशास्त्रे एव मतनुबुद्धिस्त तस्मात् अनेन मदाग

अनयोर्विचित्र परयुक्तिभरैर्निशामध्यसंकथनमाकलितं॥ न फणीशमप्यतुलयन्नमपीनगुरुं कविं किमपरं जगति॥ ६४॥ न दिवानिशं निश्चयप्यपि च वादकथा विरराम नैत्यिककालमृते॥ इति जल्पतोः सममनल्पधियो दिवसा अभसप्तदशा व्यगमन्॥ ६५॥ अथ शारदाकृतकवाक्प्रमुखेष्व खिलेषु शास्त्रनिचयेषु परं तमजय्यमात्मनि विविच्य समुनिं पुनरप्यचिंतयदिदं त्वरसा॥ ६६॥ अतिबाल्य एव कृतसंन्यसनो नियमैः परैरविधुरश्च सदा मदनागमेष्वकृतबुद्धिरसौ पथ तदनेन संप्रति जयेयमहं॥ ६७॥ इति संप्रधार्य पुनरप्यमुना कथनप्रसंगमथ संगतितः यमिनं सरस्य मुमदप्यसौ कुसुमास्त्रशास्त्ररहस्यं विदुषी॥ ६८॥ कलाः कियंत्यो वद पुष्पधन्वनः किमात्मिकाः किं च पदं समाश्रिताः॥ पूर्वे च पक्षे कथमन्यथा स्थितिः कथं युवत्यां कथमेव पूरुषे॥ ६९॥

मनेदानीं अहं जयेयं॥ ६७॥ इत्येवममुना कथनप्रसंगं संप्रधार्य अथ प्रसंगात् स सरस्यममुं यमिनं कामशास्त्रस्य
रहस्यमसौ विदुषी सरस्वती अपृच्छत्॥ ६८ यदपृच्छत्तदुदाहरति पुष्पधन्वनः कामस्य कलाः कियंत्य इति संख्या
विषयकः प्रश्नः किमात्मिका इति स्वरूपविषयकः किं स्थानमाश्रिता इति स्थानगोचरः पूर्वे शुक्ले च पक्षे अन्य

इतीरितस्तत्रास्मिन्नर्थे विधिं चिंतयन् विचक्षणः श्रीशंकरः किंचिदपि नोवाच विचिंतनमाह तासां कलानां अकथने ममाल्पज्ञता
१४० भविष्यति तासां कथने तु मम यतेर्धर्मस्य संक्षयः ॥७०॥ इसेनं ससीश्रमनसा संविसंविदितकामागमोऽपि जगति व्रतिनां काम
शास्त्राभ्यासादिव्रतवतां परमहंसपरिव्राजकानां नियमं रक्षयितुं इच्छुरस्मिन् काले अन्यचतुष्पाद्मेत्रास्यैव
यसनं जगाद ॥७१॥ यदुवाच तदाह इहास्मिन् कलादिसंकथने मासमात्रमवधिः क्रियतां हि यस्माद्दिवसस्य गणो यतिभिर
नुमन्यते तथान्यमासानंतरं भोः सुरतिकाभवास्त्रनिपुणत्वमपि सस्यसि ॥७२॥ तथेति तया सरस्वत्या स्वीकृते सति योगिराट्

नेतीरितः किंचिदुवाच शंकरो विचिंतयन्नत्र चिरं विचक्षणः ॥ तासामनुक्तौ भविताल्पवेदिता भवेत्तदुक्तौ
ममधर्मसंक्षयः ॥७०॥ इति संविचिंत्य सहृदा प्रत्युदान् वचनं सुपुष्पशरशास्त्र इत्यविदितागमोऽपि सरिरक्षयिषुर्नि १४०
यमं जगाद जगति व्रतिनां ॥७१॥ इह मासमात्रमवधिः क्रियतामनुमन्यते हि दिवसस्य गणः तदनंतरं सुरति
दास्यसि भोः कुसुमास्त्रशास्त्रनिपुणत्वमपि ॥७२॥ उररीकृते सति तथेति तया क्रमतस्स योगिमृगराट् कु
गतं कृतविग्रहं ॥ श्रुतनिनेमुषुतोदधरं प्रचारमथ योगदृशा ॥७३॥ सदहर्नु कुत्रचिदमर्त्यमिव त्रिदिवच्युत
विगतसत्त्वमपि ॥ प्रनुजेश्वरं परिवृतं प्रचपलमदाभिरार्तिमदमात्यजनं अथो निशारवदवगाढवांश्रिले तरोर्म
र्मोहयशाल्सरासुं तं वीक्ष्य मार्गे मरकं नृपालं स सनंदनं प्राह स संयमींद्रः ॥७४॥

श्रीशंकरः आकाशमाक्रमते स्माथा
नंतरं कृतः समेमरकसंज्ञो विग्रहः स्वरूपं यस्य सः प्ररम्यालविग्रहः तथा कृतैर्विनयैः शिष्यैर्युतः सयोगदृष्ट्या अफ
चारमाकाशगमनमदधत् ॥७३॥ स कस्मिंश्चिद्देशे विगतजीवमपि स्वर्गात्पतितं देवमिव प्रलपंतीभिः प्रमदाभिः परिवृतं
आर्तिमान् अमात्यजनो यस्य तं नरेश्वरं ददर्श ॥७४॥ तथा निशायां शाप्रीतम् गया यत्र पारे यत्रो मृगया ह्लियामित्यमरः
अरण्यां वने वृक्षस्य मूले मोहमूर्च्छनं तद्वालात्परासुं सुकांतप्राणं तममरकसंज्ञं राजानं वीक्ष्य स संयमींद्रः स
नंदनं पद्मपादं प्रोवाच ॥७५॥ अस्य सौंदर्य सौभाग्य निकेतसीमाः परःशताः शताद्धिकाः कमलवंत्यः स एषामरकसंज्ञो

राजा भ्रमतो गतप्राणो भूमौ शेते ॥७६॥ परासोर्नृपस्य तमिमं देहं प्रविश्य राज्ये अस्य पुत्रं निवेश्य योगप्रभावात्पुनर
प्युपागंतुमस्मदीयं मे मनः उत्कंठते ॥७७॥ सर्वज्ञतानिर्हरणाय सर्वज्ञत्वनिर्वाहाय अमुष्य राज्ञः दृश्याः अदृश्याः नाना
अनेकविधाः कुशाग्र्याक्ष्यः कमलाक्ष्यस्तासां यानि किल किंचितानि शेषास्तु हर्षभील्मादेः संकरः किलकिंचित

सौंदर्यसौभाग्यनिकेतसीमा परःशता यस्य पयोरुहाक्ष्यः ॥ स एष राजामरकाभिधानः श्रांतेगतासुः
श्रमतो धरायां ॥७६॥ प्रविश्य कायं तमिमं परासोर्नृपस्य राज्येस्य सुतं निवेश्य ॥ योगानुभावात्पुन
रप्युपेतुं उत्कंठते मानसमस्मदीयं ॥७७॥ अस्यादृशानामदृशीयनानाकुशाग्र्याश्रौ किलकिंचिता
नां ॥ सर्वज्ञतानिर्हरणाय सोहं साक्षित्वमप्याश्रयितुं समीहे ॥७८॥ इत्यूचिवांसं यतितल्लजं तं सनं
दनः प्राह ससांत्वमेनं ॥ सर्वज्ञ नैवाविदितं तवास्ति तथापि भक्तिर्मुखरं जनोति ॥७९॥ मत्स्येंद्रनामा हि
पुरा महात्मा गोरक्षमादिश्य विभूॐ जांगगुस्थैः नृपस्य कस्याचित्तनुं परासोः प्रविश्य तत्पदृणमासस्माद ८०

भिसुकानि तेषां मन्यादृशानामतिविलक्षणानां साक्षित्वं साक्षात् दृष्टत्वमप्याश्रयितुं सोहं समीहे ॥७८॥ उत्कट
वंतं यतिश्रेष्ठं तमेनं श्रीशंकरं ससांत्वं यथास्यात्तथा प्रोवाच हे सर्वज्ञ सर्वं विदस्तव यद्यपि किंचिदप्यज्ञा
तं नास्ति तथापि तव भक्तिर्मां मुखरं वाचालं करोति ॥७९॥ एवं पुरावृत्तं वृत्तांतं श्रावयितुमभिमुखीकु
र्वन् श्रावयति हि प्राक्किल पुरा मत्स्येंद्रनामा महात्मा स्वशरीररक्षणाय गोरक्षसंज्ञं शिष्यमादिश्य
कस्यचित्मृतकस्य राज्ञः शरीरं प्रविश्य तस्य राज्यं प्राप्तवान् ॥८०॥ योगिश्रेष्ठे तस्मिन् भद्रासना
ध्यासति नृपासनमुपविष्टे सति प्रजानां भद्राणि निष्प्रायर्जितानि अभवन् अत्रापि कालेषु वर्षेस्स्यानि

चेष्टानुसारिफलानि अभूवन्॥ ८१॥ इहास्मिन्नृपस्य काये प्रविष्टं कमपि दिव्यं विज्ञाः सचिवा विज्ञाय राज्ञः कमलाक्षीः सर्वभावेन तस्य वशीकरणार्थं समाश्रितान्॥ ८२॥ एवं संप्रेरितानां तासां ललितेषु संगीतनृत्याभिनयादिषु सक्तंचित्तं यस्य स एष मुनिः समाधिं विस्मृत्य सर्वात्मभावेन प्राकृतवत् बभूव॥ ८३॥ अथानं

भद्रासनाध्यासिनि योगिवर्ये भद्राण्यनिद्राण्यभवन् प्रजानां॥ वर्षे च काले षु जलाहको विस्सस्यानि चान्नस्य फलान्यभूवन्॥ ८१॥ विज्ञाय विज्ञाः सचिवा नृपस्य काये प्रविष्टं कमपीह दिव्यं॥ समादिशन् राजसरोरुहाक्षीः सर्वात्मना तस्य वशीक्रियायै॥ ८२॥ संगीतलास्य (?) स्याभिनयादिमेषु संसक्तचेता ललितेषु तासां॥ स एष विस्मृत्य मुनिः समाधिं सर्वात्मना प्राकृतवत् बभूव॥ ८३॥ गोरक्ष एवाथ गुरोः प्रवृत्तिं विज्ञाय रक्षन् बहुधा स्वदेहं॥ निशांतकांतानटनोपदेष्टा नितांतमस्याभवदंतरंगः॥ ८४॥ तत्रैकदा तत्त्वनिबोधनेन निवृत्तरागं निजदेशिकं सः॥ योगानुपूर्वीमुपदिश्य निन्ये यथापुरं प्राक्तनमेव देहं॥ ८५॥ हंत दृष्टोऽयं विषयानुरागः किं चोर्ध्वरेतोव्रतखंडनेन॥ किं नोदये किल्बिषमुल्बणं ते रुसंभवी नैव कृतीति किंतु ८६

तदस्यैवो गोरक्षः गुरोः प्रवृत्तिं विज्ञाय बहुप्रकारेण अस्य गुरोर्देहं रक्षन् सन् निशांतस्यांतःपुरस्य कांतानां नर्तनोपदेशासन् अस्य गुरोरंतरंगोऽभवत्॥ ८४॥ तत्र तस्मिन् देशे एकस्मिन् काले तत्त्वनिबोधनेन निवृत्तरागं निजगुरुं सः गोरक्षः योगानुपूर्वीमुपदिश्य यथा पूर्वं प्राक्तनमेव देहं निन्ये॥ ८५॥ तथा चैवं विषयोऽयं विषयानुरागः किं चोर्ध्वरेतोव्रतखंडनेन नोल्बणं पापं किं ते नोदये दर्पितः दयदेयत

कश्चास्मदीयमतुलं महत्तद्व्रतं कृतेदमतिनिंद्यं कामवास्त्वं तदपि भवतैव यदीष्यते तर्ह्यस्मिन् लोके जगदनवस्थितमेव भवेत् तथा चोक्तं। यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः॥ स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥ ८७॥ इदं मया विदितं ज्ञापितं सर्वज्ञत्वात् तव किंतु प्रेम्णा दितमिसाह (?)॥ शिथिलमिमं यतिधर्मं भूयो प्रकटयितुं धूर्तकंकणस्य गृहीतप्रतिज्ञस्य भवतो विदितं किमस्ति न किमपि तथापि हे भगवन् प्रणयादिदं मयोक्तं॥ ८८॥ एवं पद्मपादवाक्यमुदाहृत्याचार्यस्तदुदाहर्तुमाह पद्मपादस्य वचः श्रुत्वा चास्य [illegible] ति तुल्याप्रतिमा

व्रतं मस्मदीयमतुलं क्रमहत्कृतं च कामव्याजामतिगर्ह्यमिदं॥ तदपीष्यते भगवतैव यदि स्यनवस्थितं जगदिहैव भवेत्॥ ८७॥ अविमदिति प्रथयितुं शिथिलं धूर्तकंकणस्य यतिधर्ममिमं॥ भवतः किमस्त्यविदितं तदपि प्रणयान्मयेरितमिदं भगवन्॥ ८८॥ स निशम्य पद्मचरणस्य गिरं गिरतिस्म गीष्पतिसमप्रतिभः॥ अतिगीतमेव भवता फणितं शृणु सौम्य वच्मि परमार्थमिदं॥ ८९॥ असंगिनो न प्रभवंति कामाः हरेरिवाभीरवधूसरस्य॥ वज्रोलियोगप्रतिभूः स एष वत्साव कीर्णोत्त्वविविपर्ययेनः॥ ९०॥ संकल्प एवाखिलकाममूलं स एव मे नास्ति समस्तपिष्णोः॥ तन्मूलहानौ भवपाशनाशः कर्तुः सदा स्यादकृतस्य षट्के (?)॥ ९१॥

स्य स उक्तवान् यद्यपि त्वया निंदितमेव कथितं तथापि हे सौम्य श्रोतुं स ... नो भव परमार्थमिदं कथयामि॥ ८९॥ किं तदित्यपेक्षायामाह॥ असंगिन असक्तिं निर्मुक्तस्य कामाः न प्रभवंति तत्र दृष्टांतः गोपवधूसरस्य श्रीकृष्णस्येव किंच यथा वज्रोलिसंज्ञिक योगप्रतिभूभिः स एव हे वत्स नोऽस्माकं भव कीर्णत्वस्य रेतःपातेन क्षते तत्र तत्त्वस्य विपर्यस्तः दभावः तस्यारेतआकर्षणसामर्थ्यसंपादकत्वात्॥ ९०॥ किंच संकल्प एवाखिलाभिलाषस्य मूलं स एव च कृष्णलुब्ध

मन्ये यत्कामभ्यंतरस्मोत्र चिलेतंकुकृतीस्मथः॥ ८५

मम नास्ति तथाप्यसौ रेव संसारदोषदृष्टेः कर्तुरपि कुकाम
मूलस्य संकल्पस्य हानौ तस्याभवपाशनाशः स्यात्

नन्वेवं तर्हि विधिप्रतिषेधशास्त्रं निष्फलं स्यादिति चेत्तत्राह ॥ यस्त्व देहाद्यविचार्य देहादेर्जडत्वादिना ऽनात्मत्व मविचार्याहमित्यहं प्रत्यालंबनमात्मानं कद्दम भिन्यते यतो जडबुद्धिस्तम बुद्धतत्त्वमधिकृत्य सर्वो विधिप्रतिषेध शास्त्रस्य सफलं प्र ॥ ७२ ॥ एवमज्ञस्याधिकारिणः सत्त्वाद्विधिप्रतिषेधशास्त्रसाफल्यमुक्त्वा तत्त्वविदो अधिका राभावमाह कृतासंपादिता महावाक्यजन्याधीर्येन सत्त्वो अमादिविनिर्मुक्तमात्मानमात्मना बगत्य बेहांतप्र तिपाद्यस्वरूपत्वान्निगमस्य मूर्ध्नि निवसन् विधिकिंकरतां न भजते तर्हि विधिग्रहणं प्रतिषेधस्याप्युपलक्षणं ॥ ७३ ॥

अविचार्य यस्त्ववपुराद्यहमित्यपि मन्यते जडमतिः ॥ सुदृढं तमबुद्धतत्त्वमधिकृत्य विधिप्रतिषेध शास्त्रमखिलं सफलं ॥ ७२ ॥ कृतधीस्त्वनात्मम मवर्ण्य मजात्मबोधमात्मजमेकरसं त्वतया व गत्य न भजेन्निवसं निगमस्य मूर्ध्नि विधिकिंकरतां ॥ ७३ ॥ कलत्राद्यंम त्वभमस्ति यथा त्वदृमंतरा जगदे वमिदं ॥ परमात्मजन्यमपि ते न विना सम मत्रयेपि न समास्ति खलु ॥ ७४ ॥ कथमज्यते जगदशेष मिदं कलयन्नपेक्षितदृदि कर्मफलैः ॥ न फलाय हि स्वपनकालकृतं स्कृतादि जातमनत बुद्धिहतं ॥ ७५

नन्वमवस्यमेव ते कर्मकल्पकोटिशतैरपीत्यादि स्वचनैः कर्मफलभोगस्यावश्यकत्वावगमात्कथं तेन तत्त्वविदो असंबंध इत्याशंक्य वाच्यार्थभणा विकारो नाम धेयं मृत्तिकेत्येव सत्यमिति श्रुत्युक्तदृष्टांतेन कालत्रयेप्यात्म व्यतिरिक्तस्य प्रपंचस्याभावविचारेणेन तस्य मृषात्व निश्चयादित्याह ॥ घटाद्यमृत्स्नं यस्कय थाम दृतेवि नानास्ति तथा परमात्मजन्यमिदं जगदपि परमात्मानं विना कालत्रयेपि नास्ति तदनन्यत्वमारंभणशब्दादिभ्य इति न्यायात् कल्पितस्याधिष्ठानानतिरिक्तत्वं प्रसिद्धमिति स्वल्प्वर्थः ॥ ७४ ॥ तथाप्येवं प्रका रेण दृश्यमानं जगन्मिथ्येति दृढानुसंधानः कर्मफलैर्न केनापि प्रकारेण लिप्यते हि यस्मात् स्वप्नकालकृ

तत्तस्मात् अयमश्वमेधशतानि करोतु अथवा असंख्यातानि विप्रहननानि करोतु तथापि परमार्थवित्सुकृतैर्दुरितैश्च न लिप्यते लेपकारणकर्तृत्वस्य निवृत्तत्वादिति हेतुमाह स्वगतकर्तृत्वयेति ॥ ७६ ॥ अयममितानि ब्रह्महननानि वा करोतु तथापि दुरितैर्न लिप्यत इत्यत्र प्रमाणाकांक्षायां त्रिशीर्षाणं त्वाष्ट्रमहनमरुन्मुखान्यतीन् शालावृकेभ्यः प्रायच्छं तस्य मे तत्र लोमापि न मीयते स यो मां वेद न ह वै तस्य केनचन कर्मणा लोको मीयते न स्तेयेन न भ्रूणहत्ययेति श्रुतिमर्थतः पठति त्रिशिरसं विश्वरूपमिंद्रोवधीत्तथा रौतिपयार्थशब्दमतीरितरुद्धहा

मदयं करोतु हयमेधशतान्यमितानि विप्रहननान्यथवा परमार्थविन्न सुकृतैर्दुरितैरपि लिप्यते स्त मितकर्तृतया ॥ ७६ ॥ अवधीत्त्रिशीर्षमदहत्त्वयतीन् वृकमंडलाय कुपितः शतशः बललोमहानिरपि तेन कृतान्यशतक्रतोरिति हि बह्वृचगीः ॥ ७७ ॥ बहुदक्षिणैरयजत क्रतुभिर्विबुधान तथैव दसंख्यधनैः जनकस्तथाप्यभयमाप परं न तु देहयोगमिति काण्ववचनः ॥ ७८ ॥

तथाक्यंतथैवं सुखे नास्तीति तान् रूपमुखान् शतशः यतीन् शालावृकसमूहाय कुपितः सन् अदात् तथापि शतक्रतोरिंद्रस्य तेन कर्मणा लोम हानिरपि नेव कृतेति ऋग्वेदिनां वागित्यर्थः ॥ ७७ ॥ हयमेधशतानि करोतु तथापि सुकृतैर्न लिप्यत इत्यत्रापि प्रमाणमाह जनको बहुदक्षिणैः क्रतुभिः देवान् यजत तथा असंख्यधनैः अतर्पयत् तथापि केवलं स कृतिः । जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे अभयं वै जनक आप्तोसीत्याद्याः ॥ ७८ ॥ फलितमाह तथा च तत्त्वविदन्यत्रारिपुः इंद्रः तद्भूतदुरितैः न हीयते तथा जनकस्तत्सुकृतैः न वर्धते किंच स तत्त्व

विरहं दुश्चरितं किमर्थमकरवं साधु कर्म च किमर्थं नाकरवमिति तापमपि न प्राप्नोतीत्यर्थस्तथा चश्रुतिस्तत्सु कृतदुःकृते विधुनुत इत्यनेनं हवाव न तपति किमहं साधु नाकरवं किमहं पापमकरवमिति साधुः ॥ ९९ ॥ तत्त स्माद्यद्यपि कामं चास्य परिशीलनं हे सौम्यानेनैव करणेन वपुषा शीलमपि न चरेष कृतं तथापि शिष्टस रणी परिपालनार्थमन्यच्छरीरं प्राप्य यत्नं करोतीति ॥ १०० ॥ इत्येवं भवभयभंजनकरीः सत्कथाः कथयन्नु कथनीयं यत्रो यस्य सच्चरणचारिजनैरतिदुःप्राप्यमद्रिशृंगं प्राप्य अथ गिरिशृंगं प्राप्यानंतरं सम्री ।

नचिहीयतेहि रिपुवद्दुरितैर्नन्वर्थतैजनकयत्क्रुतैः । न स तापमेस्य करवं दुरितं किमहं न साधु करवं स्विति च ॥ ९९ ॥ तदंगनत्र्य स्यपरिशीलनमप्यमुनैव सौम्य करणेन कृतं नहि दोषकृत्तदपि शिष्ट सरण्यवनार्थमन्यवपुरेत्यते ॥ १०० ॥ इति सत्कथाः सकथनीययत्रो भवभीतिभंजनकरीः कथयन्द सुदुरासदं चरणचारिजनैर्गिरिशृंगमेत्य पुनरेव जगौ ॥ १०१ ॥ अथ सोऽनुपश्यत विभाति गुहापरतः शिला समतला विपुला सरसी च तत्परिसरे स्वच्छजला फल भारनम्रतरुरम्यतटा ॥ २ ॥ परिपाल्य तामिह यसद्भिरिदं वपुरप्रमदमनघगुणाः । अहमास्थितः स्तदुचितं करणं कलयामि यावदसमेषु कलां ॥ ३ ॥

शंकरः भूयोऽप्युवाच ॥ १ ॥ यदुवाच तदुदाहरति गुहायाः पुरतः समं तलं यस्याः सा विपुला शिला विभाति तथा तस्याः गुहायाः परिसरे प्रांतभूमौ स्वच्छ जला पुनश्च फलानां भारेण नम्रैः रक्षैः रम्यं तटं यस्याः सा सरसी विभाति हे विनेयाः अनुपश्यत ॥ २ ॥ तथा च यावत् कामकलानां नायो चितं शरीरं मास्थितोऽहं विषमेषु कलामनुभवामि तावद्दृश्यां शिला ॥ यानसद्भिः अनघगुणा इह्येमं पुरप्रमादं यथास्यात्त था परिपाल्य तामित्यर्थः ॥ ३ ॥

इत्येवं शिष्यवर्गमनुशास्य गुहायां सक्तदेहः गुरुयोगबलः आतिवाहिकेन ज्ञानेंद्रियकर्मेंद्रियप्राणबुद्धिरूपेण लिंगशरीरेण युतो य मिनां प्रवरः श्रीशंकरः अमरकाभिधस्य क्षितिपस्य कायमाविवेश ॥ ४ ॥ कथं विसृष्टदेहस्तच्छरीरं प्रविष्टः । निसपेक्षा आतस्र कारंदशीव लिस्वशरीरांगुष्ठमारभ्य दशमद्वारपर्यंतं प्राणवायुं नयन् स ब्रह्मरंध्रमार्गात् बहिरागत्य मृतस्य राज देहस्य चरणाग्रपर्यंतं करंध्रमार्गेण शनैः प्रविष्टवान् एवं सत्यप्येकुबुद्धिरेव ॥ ३-५ ततः किं मृत्तमिति सपेक्षायामाह ॥

१

इति शिष्यवर्गमनुशास्य यमिप्रवरो विसृष्टकरणो धिगुहं । अधिहस्य सूक्ष्मगुरुयोगबलो विश दातिवाहिकशरीरयुतः ॥ ४ ॥ अंगुष्ठमारभ्य समीरणं नयन् करंध्रमार्गात् बहिरेत्य योगवित् ॥ करंध्रमार्गेण शनैः प्रविष्टवान् मृतस्य यावच्चरणाग्रमेकधीः ॥ ५ ॥ गात्रं गतासोर्वसुधाधिप स्य शनैः समास्पंदत हृत्प्रदेशे ॥ तथोदमीलन्नयनं क्रमेण तथोदतिष्ठत्स यथा पुरेव ॥ ६ ॥ आ दौ तदंगमुदपत्स्फुरत्कांति पश्चात् नासांत निर्यदनिलं शनकैः परस्तात् । उन्मीलदंघ्रिच लनं तदनूद्यदक्षि व्याकोचमुत्थितमुपात्तबलं क्रमेण ॥ ७ ॥

तकस्य भूमिपतेः गात्रं हृत्प्रदेशे शनैः समास्पंदत सम्यक्कंपवलितं तथा हस्तादिचलनक्रमेण नयनमुदमीलयत् तथा सराजा नृपः पूर्वमेवोदतिष्ठत क्रमेणोत्पुलकं तत्र केन क्रमेण साकांक्षायां क्रमं निरूपयति आदौ तस्य गंगात्रमुदपतीमुत्कांतिर्यस्मिन् तथा भूतं पश्चात् नासांतान्निर्गच्छत्प्राणवायुर्यस्मिन् शनकैः पश्चात् उन्मीलच्चरणयोश्चलनं यस्मिन् ततः पश्चादुत्पन्नं नेत्रोन्मीलकेनाक्षः संकोचविनिर्मोकाय स्मिन् लिसेयं क्रमेण पात्तबलं समुत्थितं वसंत ॥ ७ ॥

चिरहंदुश्चरितं किमर्थमकरवं साधु कर्म च किमर्थं नाकरवमिति तापमपि न प्राप्नोतीत्यर्थस्तथाच श्रुतिस्तत्सु
कृतदुःकृते विधुनुतएनं हवाव न तपति किमहं साधुनाकरवं किमहं पापमकरवमिति साध्याः॥९९॥ तन्न
स्मादस्यापि कामवासनापरिशीलनं हे सौम्यानेनैव करणेन वपुषा शीलमपि नन्वशेषरुत तथापि शिष्टस
रणीपरिपालनार्थमन्यच्छरीरं प्राप्यालंकरोति॥१००॥ इत्येवं भवभयभंजनकरीः सत्कथाः कथयन्नु
कथनीयं यत्रायस्य सच्चरणचारिजनेरतिदुःप्रापमद्रिशृंगं प्राप्य अथ गिरिशृंगप्राप्त्यनंतरं सश्री

नविहीयते हि रिपुवद्दुरितेन नैव वर्धते जनकवत्सुकृतैः। नसतापमेत्य करवं दुरितं किमहं न
साधु करवं त्विति च॥९९॥ तदंगनवासनापरिशीलनमप्यमुनैव सौम्यकरणेन कृतं न हि
दोषकृत्तदपि शिष्टसरण्यवनार्थमन्यवपुरेस्यते॥१००॥ इति सत्कथाः सकथनीययशो
भवभीतिभंजनकरीः कथयन्द्रसुदुरासदं चरणचारिजनैर्गिरिशृंगमेत्य पुनरेव जगौ॥१०१॥
अथसोनुपश्यत विभाति गुहापरतः शिला समतला विपुला सरसी च तत्परिसरे स्वच्छजलाफल
भारनम्रतरुरम्यतटा॥२॥ परिपाल्यतामिह वसद्भिरिदं वपुरश्रमस्मनवद्यगुणाः। अहमास्थितः
स्तदुचितं करणं कलयामि यावदसमेषु कलां॥३॥
शंकरः भूयोप्युवाच॥१॥ यदुवाच तदुदाहरति
गुहायाः पुरतः समं तलं यस्याः सा विपुला शिला विभाति तथा तस्याः गुहायाः परिसरे प्रांतभूमौ स्वच्छ
जला पुनश्च फलानां भारेण नम्रैः रुक्षैः रम्यं तटं यस्याः सा सरसी विभाति हे विनेया अनुपश्यत॥२॥
तथाच यावत् कामकलाज्ञानाय उचितं शरीरमास्थितोहं विषमेषु कलामनुभवामि तावदद्रयं शाला।

यां वसद्भिरनवद्यगुणा इत्यहमद्गुरश्रमाहं यथा स्यात्तथा परिपाल्यतामित्यर्थः॥३॥

इत्येवं शिष्यवर्गमनुशास्य गुहायां स्वदेह गुरुयोगबलः आह्निकाह्निकेन ज्ञानेंद्रियकर्मेंद्रियप्राणबुद्धिरूपेण लिंगशरीरेण युतो य
मिनां प्रवरः श्रीशंकरः अमरकाभिधस्य क्षितिपस्य कायमाविशत्॥४॥ कथं विसृष्टदेहस्तच्छरीरं प्रविष्टवानित्यपेक्षायां तत्प्र
कारं दर्शयति स्वशरीरांगुष्ठमारभ्य दशमद्वारपर्यंतं प्राणवायुं नयन् स तु शिरोरंध्रमार्गात् बहिरागत्य स तस्य राज
देहस्य चरणाग्रपर्यंतं कं रंध्रमार्गेण शनैः प्रविष्टवानेवं सत्यप्येकुबुद्धिरेव॥३-५ ततः किं वृत्तमित्यपेक्षायामाह
१
इति शिष्यवर्गमनुशास्य यमिप्रवरो विसृष्टकरयोगधिगुहं। अहिपस्य सूक्ष्मगुरुयोगबलाद्विश
दातिवाहिकशरीरयुतः॥४॥ अंगुष्ठमारभ्य समीरणं नयन् करंध्रमार्गात् बहिरेत्य योगवित्॥
करंध्रमार्गेणैव शनैः प्रविष्टवान् मृतस्य पादाच्चरणाग्रमेकधीः॥५॥ गात्रं गतासोर्वसुधाधिप
स्य शनैः समास्पंदत हृत्प्रदेशे। तथोदमीलन्नयनं क्रमेण तथोदतिष्ठत्स यथा पुरेव॥६॥ आ
दौ तदंगमुदपश्यत्सुखकांतिपश्चात् नासांत निर्यदनिलं शनकैः परस्तात्। उन्मीलदक्षिच
लनं तदनूच दृष्टिव्याकोचमुत्थितमुपात्तबलं क्रमेण॥७॥
तकस्य भूमिपतेः गात्रं हृत्प्रदेशे शनैः
समास्पंदत सम्यक्कंपचलितं तथा हस्तादिचलनक्रमेण नयनमुदमीलयत्तथा स राजा पूर्ववदुदतिष्ठदिति
क्रमेणोक्तं तत्र केन क्रमेणेत्याकांक्षायां क्रमं निरूपयति आदौ तस्याः गंगात्रमुदपश्यत् सुखकांति यस्मिन्
तथाभूतं पश्चान्नासांतनिर्गच्छत्प्राणवायुर्यस्मिन् शनैः पश्चात् उन्मीलच्चरणयोश्चलनं यस्मिन् ततः
पश्चादुत्थितं उन्मीलितं सकोच्च निमीकोयस्मिन्निसयं क्रमेणोपात्तबलं सदुत्थितं वसंत॥७॥

तंप्राप्तजीवंपतिमुपलभ्य प्रभूतो हर्षसमुत्कः शब्दो यासां प्रमुदितानि मुखकमलानि यासां ता नार्यो निरेजुः
१४४ तत्र दृष्टांतः अरुणोदयेन संप्रफुल्लानि कमलानि यासु ताः सारसशब्देन सहिता पुष्करिण्य इव ॥ ८ ॥ तासां वामेक्ष

तंप्राप्तजीवमुपलभ्य पतिं प्रभूतहर्षस्वनाः प्रमुदिताननपंकजास्ताः ॥ नार्यो निरेजुररुणोदय
संप्रफुल्लपद्माः ससारसरवा इव वारिजिन्यः ॥ ८ ॥ हर्षं तासां मुदितमतुलं वीक्ष्य वामेक्षणानां
मात्तप्राणं नृपमपि महामात्यमुख्याः प्रहृष्टाः ॥ दध्मुः शंखान्पणवपटहान्दुंदुभींश्चाभिजघ्नु
स्तेषां घोषः सपदि बधिरीचक्रिरे द्यामुर्वीं च ॥ ९ ॥ इति श्रीमाधवीये तत्सार्वज्ञोपायगोचरः
संक्षेपशंकरजये सर्गोयं नवमोभवत् ॥ ९ ॥ संख्या १०६ श्रीशंकरायनमः ॥ १४४

क्षणानां उदितं हर्षं वीक्ष्य नृपमपि आत्तप्राणं वीक्ष्य महामात्यप्रमुखाः प्रहृष्टाः संतः शंखान्दध्मुरितश्च
तः पणवादीन्वाद्यविशेषांश्चाभिजघ्नुः तेषां शंखवादीनां शब्दः द्यामुर्वीं च बधिरीचक्रिरे तदा
गीता ॥ १०९ ॥ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्य बालगोपालतीर्थश्रीपादशिष्यदत्तवंशा
वतंसरामकुमारसूनुधनपतिसूरिकृते श्रीशंकराचार्यविजयडिंडिमे नवमः सर्गः ९ टीका
संख्या ३२५

श्रीगणेशायनमः ॥ एवं सार्वज्ञोपायं सुप्रपंचं निरूप्य कामकलातत्त्वं सपरिकरं प्रपंचयितुमारभते उत्था
नंतरं कृतकौतिककर्मभिः पुरोहितादिभिर्यथोचितं विहितमांगलिकः आत्मस्थितामंगलगजोभूमेन स नर
पतिः नगरं यथोद्भुतविलंबितं ॥ १ ॥ पुरं समधिगम्य परिसांत्वितः प्रियजनाप्येन नृपतिभिः आदृतं
शासनं यस्य सः अधिराट् संमतैः सचिवैः सहदियमिंद्र इव भुवमपालयत् ॥ २ ॥ इत्थं नृपत्वं प्राप्य यति

अथ पुरोहितमंत्रिपुरःसरैर्नरपतिः कृतकौतिककर्मभिः ॥ विहितमांगलिकः स्वपभोचितं नररमा
स्थितमध्यगजो ययौ ॥ १ ॥ समधिगम्य पुरं परिसांत्वितः प्रियजनः सचिवैः सहसंमतैः ॥ भुवमपा
लयदादृतशासनो नृपतिभिर्दिवमिंद्र इवाधिराट् ॥ २ ॥ इति नृपत्वमुपेत्य वसुंधरामवति संय
मिभूभृति मंत्रिणः ॥ समधिगत्य परं कुलसंशयमात्मिति जजल्पुरनल्पधियो मिथः ॥ ३ ॥ मृतिमुपेत्य
यथा पुनरुत्थितः प्रकृतिभाग्यवशो न तथा त्वयं ॥ नरपतिः प्रतिभाति न पूर्ववत्समुदिताखिलसद्
गुणोदयः ॥ ४ ॥ वसु ददाति यथार्थिवदर्थिने वदति गीष्पतिवाङ्गुरनर्थवित् ॥ जयति फाल्गुनमं
तितिपार्थिवान् सकलमप्यवगच्छति सर्ववित् ॥ ५ ॥
राजेश्री शंकरेशहभिंअवतिरक्षितितं परमाधि
कलसत्स्विन्नपरस्मिन् अनल्पबुद्धयो मंत्रिणः कलसंशयाः संतः परस्परं ऊचुः ॥ ३ ॥ यस्य नमेयोरा
धृतिमृतिमुपेत्य प्रज्ञाभाग्यवशान्नयथा पुनरुत्थितस्तथैव यप्रकृतिभाग्यवशो नैवअयं न पूर्ववत्प्र
तिभाति किंतु समुदितानां अखिलानां सद्गुणानां उदयो यस्मिन् तथाभूतः प्रतिभाति सः ॥ ४ ॥ गुणानेवो

सर्गदशमे ... ॥

पयर्णपंक्तिउत्थिते प्रयाति ... भगवत्तं ... अर्थविन्दुः
वाद्ययति ... प्रतिभाति ... नवत् अर्थविन्द प्रत्य

अनुसवनं सर्वदा धिस्तरशीलैः अपूर्वैः प्रातरव्यादिभिः नान्यस्मिन् सुलभैः गुणैरेष भूमिपतिराधः परः पुमान् यस्मात् सर्वविभातिषु ख्यातास्मारतं ॥ ६ ॥ किंच वृक्षा अनृतुषु सुपुष्पिताग्राः गोमहिष्यश्च बहुतरदुग्धदुघाः क्षितिश्चाभिमतादृष्टिर्यस्यां सा अध्यसस्या प्रजाश्च सर्वा अपि विहितधर्मरताः ॥ ७ ॥ किं बहुना यद्राज्ञः प्रभावात् सर्वदोषाकरोपि कलिकालस्त्रेतामतिक्रामति तत्र उत्कर्षो भवति तस्मात् स्वां महैश्वर्यः कश्चिद् दस्मद्राज्ञः शरीरं प्रविश्य पृथिवीं शास्ति ॥ शालि ८ ॥ ततस्मादयं गुणसमुद्रो यथापूर्वं शरीरं न प्राप्नुमान् तथा कार्यमित्येवं

अनुसवनं विमलैरैरपूर्वैर्वितरणपौरुषशौर्यधैर्यपूर्वैः । अतितरसुलभैर्गुणैर्विभाति क्षितिपतिरेष परः पुमानिवाद्यः ॥ ६ ॥ अनृतुषु तरवः सुपुष्पिताग्रा बहुतरदुग्धदुघाश्च गोमहिष्यः । क्षितिरभिमतवृष्टिराध्यसस्या स्वविहितधर्मरताः प्रजाश्च सर्वाः ॥ ७ ॥ कालस्तिष्यः सर्वदोषाकरोपि त्रेतामत्येसराद्यराज्ञः प्रभावात् ॥ तस्मादस्मद्राज्ञ वर्ष्म प्रविश्य प्रोद्यैश्वर्यः शास्ति कश्चिद्धरित्रीं ८ तदयं गुणवारिधिर्यथा प्रतिपद्येत न पूर्वकं वपुः करवाम तथेति निश्चयं कृतवन्तः सचिवाः परस्परं ॥ ९ ॥ अथ तेषु यस्य कस्यचिद्गतजीवो वपुरस्ति देहिनः । अविचार्य तदाशु दर्शिताभिमतिभिस्तान् रहसि न्ययोजयन् ॥ १० ॥ अथ राज्यधुरं धराधिपः परमाप्तेषु निवेश्य मन्त्रिषु । बुभुजे विषयान् विलासिनी सचिवोन्यदिति

सचिवाः परस्परं निश्चयं कृतवन्तः ९ अथानन्तरं यस्य कस्यचिद्गतकस्य देहिनः शरीरं भूमौ अस्ति तदपि चार्यानु दर्शिताभिमतेन रसान् अनेकान् अयोजयन् १० एवं मन्त्रिणां जल्पनादिति रूपराज्ञः आकूतं वर्णयति तत्र उपक्रमते अथ राजदेहप्रवेशाद्यनन्तरं भूमिपः परमाप्तेषु मन्त्रिषु राज्यभारं निवेश्य विलासिनीसख

ज्योत्स्नावतः शुभ्रे स्फटिकफलके मनोज्ञानि गिरिरोग (?) हा णि उपबर्हणानि यस्मिन् तस्मिन् दुरोदरके द्यूतकारक्रीडासु भद्रैर्दीव्यन् सह राज्ञा मिथो जितमेअधरदशनं बाहाबाहि भुजेनोद्वहनं महोत्पलेन ताडनं रतिविपर्यमंतहं पणमकार्षीत् हरिर्यागरत्तं रत्तमुगहये स्त्रीस्त्रो स्त्रोगोपदाहरिणी तदेतिलक्षपात् ॥ ११ ॥ अधरराज्ञालायाः सुधायाः श्लेषादुच्चमुखवायोर्व्यतिकरयन्त्रात्संपर्कवन्नाल्सुगन्धि कान्तानां करेभ्यः प्राप्तमत एवाति प्रियं मदकरमिंदुच्छायमाचन्द्रप्रतिबिंबेन परिष्कृतं मधु मद्यं कामं यथेष्टं मादरात् स्वर्णपात्रैः पीत्वा पीत्वा प्रियाः समपाययत् १२

स्फटिकफलके ज्योत्स्नाशुभ्रे मनोज्ञशिरोगृहे वरखुरतिभिर्दीव्यन्नक्षैर्दुरोदरकेलिषु । अधरदशनं बाहाबाहिं महोत्पलताडनं रतिविनिमयं राजाकार्षीद्रहं विजये मिथः ॥ ११ ॥ अधरजसुधाश्लेषादुच्चं सुगन्धिमुखानिलव्यतिकरवशात्कामं कान्ताकरात्तमतिप्रियं मंदस्विन्नं मनोहरभाषणं विभ्रतपुलकं सीत्काराढ्यं सरोरुहसौरभं ॥ दरमुकुलिताक्षीषल्लज्जं विस्वरमन्मथं प्रवरदलकं कान्तावक्त्रं निपायकृती नृपः ॥ १२ ॥ विवृतजघनं सेदर्शोष्ठं प्रणुन्नपयोधरं प्रस्तमणितं प्राप्तोत्साहं रणन्मणिमेखलं निभृतकरणं त्रस्यत्गात्रं गलेतरभाषणं प्रस्मरसुखं प्रादुर्भूतं किम

मधुमदेन कलमव्यक्ताक्षरं मदस्विन्नमीषत्स्वेदयुक्तं मनोहरं भाषणं यस्मिन् निभृतरोमोन्नं सीत्काराढ्यं कमलस्य सौरभवत् सौरभं यस्य विस्वरः प्रसरणशीलो मन्मथो यत्र एवंविधं कान्तामुखं निपीय मधुमरकरं पायं पायं प्रियाः समपायत कनकचषकः इन्दुच्छायापरिष्कृतमादरात् १३ मधुमदकलं यः कृतकृत्यो ॥ विवृतं अवरणरहितं जघनं यस्मिन् सदष्टोऽधरोष्ठो यस्मिन् प्रणुन्नो प्रकर्षेण पीडितोऽस्तनो यस्मिन्

स्वार्थपश्चात्तान्नरमेवान्वभूदित्याह॥ मनसिजेति॥ श्रीमितिर लिप्पेव धृतिः कीर्तिर्नाम नयाविमलामेदिनी घोराम
दनो ह्लादिनी महामोहिनी दीपनी चैव शंखिनी वशकरी तथा रंजनी चैव मदनाकला स्यां गे धुसर्वेरु दृष्टिणांगं समाश्रिता
अंगिरश्चरणावधिपादगुल्फेरुथोरा च भगनाभौ कुचहृदिफ स्कंधे तथा स्वगंडेन त्रे श्रुताव पिरलाट च शिरोदेशा
पसेकाम स्तिथिक्रमात्यद् दक्षे पुंसः स्त्रियावामे शुक्ले कृष्णे विपर्ययदुल्फकृन्न कारेणमनोनसिजस्य कामस्य कला
स्वाभिज्ञो मनोज्ञो विचेष्टितं यस्य सकलविषयेषु व्यापारयुक्तानींद्रियाणि यस्य सरस्तुस्तनाः प्रमहोत्तमायेन रु
ताथाः कुच श्रोणि गुरुवासना तस्य अत्यंतं सुनिर्वृत्तं अंतःकरणं यस्य सा निरर्गलं निराबाधं निधुवनं मैथुनं

मनसिज कलातत्त्वाभिज्ञो मनोज्ञविचेष्टितः सकलविषयव्यापारसक्तः सदानुरक्तो नमः श्रुतकुच
गुरूपास्या संतं सुनिर्वृतमानसो निधुवनमरचल्लानंदं निर्गलमन्वभूत॥१८॥ पुरेव भोगानभुजे
महीभृत्सभोगिनीभिः सहितोप्यरंस्त॥ कंदर्पशास्त्रानुगतः प्रवीणो वात्स्यायनेनाभिनिरेक्षिता
सू॰ वात्स्यायनप्रोदितसूत्रजालं तदीयभाष्यं न निरीक्ष्य सम्यक्॥ स्वयं व्यधत्ता जिनवार्थगीर्भिः

यन्नरतमिसमरः तत्र वरो यः प्रश्नानंदस्तमनुभूतवान्॥१८॥ समहीभृत्पुरेव भोगिनीभिः सहितो भोगानबु
भुजे वात्स्यायनप्रवीणोः सहितश्च कामशास्त्रानुगतो रंस्त तत्र कंदर्पशास्त्रं स्वयं साक्षाद्दृष्टवान्॥१९॥
तद्दृष्ट्वा निबंधमेकं चकारेत्याह॥ वात्स्यायनेन प्रोदितं त्रिवर्गप्रतिपत्तिः विद्यासमुद्देशः नागरिकवृत्तं ना
यकसहाय दूतीकर्म विमर्शः प्रमाणकालभावेभ्यो रतावस्थापनं प्रीतिविशेषाः आलिंगनविचाराः चुंबन
विकल्पाः नखरदशनजातयः दशनच्छेद्यविधयः देश्याः उपचाराः संवेशनप्रकाराः चित्ररतानि प्रहणा
योगाः तत्कृतात्मसीत्कृतोपक्रमाः पुरुषायितं पुरुषोपसृप्यानि औपरिष्टकं रतारंभावसानिकं रतिविशेषा

एवं राजदेहप्रवेशानंतरं कृतं तदीयं चरितं निरूप्य तच्छिष्यचरितं वर्णयितुमुपक्रमते पराशरेण प्रोक्तं भिक्षुसूत्र
मधीतवद्भिः पाराशरी पतिः पाराशर्यं भिक्षुरिति अमरः तेषां अयतिभिः तैः शान्ति भोवांकरेरात्नः शरीरं प्रविश्य एवं ल
ह्लादिनीभिः विहरतिस्म तस्यागमनकालं संकेतं मासमात्रं व्यतिक्रांतं दृष्ट्वा अस्य शिष्याः शरीरं र
क्षंतः परस्परं जजल्पुः प्रहर्षयोः॥१९॥ तज्जल्पनमुदाहरति आचार्यैर्मासमात्रमवधिः कृतः सोतीतः पुनरपि
पंचषट्वासरा अतीतानि अद्यापि स्वशरीरं प्रवेश्यास्माकं सनाथान् कर्तुं तस्य मनसि करुणा न जायते रं

पाराशर्ययतिभिः तत्र प्रविश्य राज्ञो वपुर्वै विहरति ललिताह्लादिनीभिः॥ दृष्ट्वा तत्समयमतीतमस्य
शिष्याः पर्यतापुरित परं जजल्पुः॥१९॥ आचार्यैरवधिः कारि मासमात्रं सोतीतः पुनरपि
पंचषट्वाश्च घस्राः॥ अद्यापि स्वकरणमस्मनः सनाथान् कर्तुं तन्मनसि न जायते नुकंपा॥२०॥ किं
किं कुर्मः क्व नु गच्छामः क्व यामः को जानन्निह वसतीति नो विद्यात्॥ विलालुंकथमिममीशा हे वि
र्विसोप्यासिंधुक्षितितलमन्वगात्रगृहं॥२१॥ गुरुणा करुणानिधिना सधुनायादिनो विहिता विहि
तास्तजिताः॥ जगति कृताति भर्जितां सज्जनतां स्वपदं विपदं तद्दर्शितं दृढं॥२२॥

तस्मात्किं कुर्मः क्व गच्छा
मः नन्वनुकंपितगच्छत्वा कथ्यतां प्रष्टव्यः इत्याशंक्य आह। जानन्सन्निह वसतीति नो अस्मभ्यं अभिदधीत
न तु समुद्रपर्यंतां क्षितितलमन्विष्य स्वयमेव चिन्तयद्भिति तत्राहुः आसिंधुभूमितलं विचिन्त्य अन्योन्या
भीर्भगुरुं विलालुं किं समर्था भवामो यतो अन्यशरीरं गृहं॥२१॥ तथा करुणानिधिगुरुरपि यादृशं संनिधानं विधा
त्यति तदस्माकं कार्यं विगलितं नास्तीत्यारत्येनाहुः करुणानिधिना यादृशस्ताः यथा चमधुना सन्निहिता
न विहिता स्तद्विपदं तव दर्शितं स्वपदं भजतां पुनश्चेदं सर्वं त्यजतां जगति कृतानि कार्याणि स्वर्थः इहता

नन्वेवं भूतगुरुविरहवतां भवतां कथं जीवनमिति तत्राहुः। सर्वेंद्रियजाड्यहृद्ध्यानवीनोह्लादसंमुहुर्विनन्वतीपुनश्च
निस्समाश्लिष्टमस्य रजोपाभ्यां रजोगुणलक्षणायासुविनिर्मुक्तेय तीव्रास्य चरणकमलआश्रयोयस्याः अतएव
श्रेयसिआतिश्रेष्ठापुनश्चनिश्चस्फूर्तनिर्धिष्टं यथास्यात्तथाविजृंभमाणस्य द जिनस्योल्लासनाविनाशिकानि
रयाधिरूपायामनासाहृदयेन कलितालिंगनाचिरंभाव्यते तथात्वगुरुचरणवासनाभावनमेवजीवनमाधुनास्मि
तिभावः॥२३॥ २३ तत्र कश्चिदौत्सुक्यमाविष्कुर्वंत आहुः सत्वपादैः व्यवसायरूपस्पर्शैः फलितैरिवयोगसंपदां

निःशेषेंद्रियजाड्यहृन्नवनवाल्हादं मुहुस्तन्वती निस्याश्लिष्टरजोस्यतीव्रान्वरणांभोजाश्रयाश्रेयसी।
निष्प्रस्फूर्तिविजृंभमाणशुजिनस्योल्लासनावासनानिःसीमाहृदयेन कलितपरीरंभाचिरंभाव्यते॥
फलितैरिवसत्वपादपैः परिणामैरिवयोगसंपदां समयैरिवबोधकेश्रियां सवशरीरैरिवतत्वनिर्णयैः॥२४॥
सधनैरिजलाभवैभवात्सकुटुंबैरुपशांतिकातथा॥ अतदन्यतस्याखिलात्मकैरनुग्रहैय कदानु
धाममिः॥२५॥ अविनयविनयन्न सतांसतामतिरथांजयभवपावकं जयांतियाय तिमोगभरतां

परिणामैरिवबोदिकश्रियांसमयैर्भासैरिव समयः शपथे भाससंपदोरितिविश्वप्रकाशः तत्वनिर्णयैः
शरीरवद्भिरिव निजलाभवैभवात्सधनैरिव उपशांतिलक्षणा कांतयाकलत्रसहितैरिवतैभ्यो यस्या
भावनयात्सकलात्मकैस्तेजोभिः कदानुगृह्येत यअनुगृहीताभुविशाम्यामितिहृत्स्थार्थः॥ दि॰ २४।२५ तत्र क
श्चिदतीवदुःखित आचार्य एवमनगतिं विधास्यतीति आह। सतामविनयं विनयंदूरीकुर्वन् सतामति
वेगवंतं संसाराग्निं तिरयन् अपगतं कुरिष्यन् यो योगभरतां धरोजगतिजयति स एवममगतिं विधा

केचिद्दुर्दशैनैर्नैवशोकसागरस्यतरणं मत्वा आहुर्यं विगतमोहतलक्षणात्तमसां संहतिर्यस्मात् निरावरणात्तज्ज्ञानयतेप्राप्य
यतमो विधुतमायतमा अतिशयेन विधूता कंपिता माया यस्तथाभूता अभवन् तस्मास्यामहतेप्तरस्य चक्षुषो मार्गमहा
वरेवतदाशोकसमुद्रं तरेम॥२७॥ स्वफलानभिवर्तकमदुष्मानेनरप्रापकं तदीयमुपदेशं स्मरन् कश्चिदाह पुनः पुनर्मे
नाद्यविघातमोविधूयगलितहेतमद्रूपं पदमुद्दंचन्नप्रकाशयन् विध्यापुण्यविभाजकस्फुरणदृष्टसुविधनः सा
राकर्षकः शस्त्रंथकारात्मकेषुपांथानां मध्ये यदुकथकास्तेवाद भस्यकुक्षिंभरिर्भक्षकः कदाभवसिपृथिवी॰२८

विगतमोहतमोहतिमाप्य यं विधुतमायतमामतयो भवन्॥ अमलदस्यतदस्यदृशः स्तनायवलरे
मसुगपार्णवं॥२७॥ शुभाशुभविभाजकस्फुरणदृष्टिंधयःस्वयां धमतपांदुथेक्षकथकदंभकुक्षिंभरिः कदाभव
सि मे पुनः पुनरनाद्यविद्यातमः प्रभद्यगोलितंहृदयं परदमुदंचयन्नद्वयं॥२८॥ मर्त्यानां निजपादपंकजजु
षामाचार्यमार्कंधानोमातिकल्मषं त्वमिह किं कुर्वाणाभिर्वीणयाद्यश्नामास्वस्मिन्वेल्लुधीकृतपरीहासस्य
स्परास्सस्यते दुःखांतोनभवेदिती अयसपुनर्जानीहि मीनीहिमा॥२९॥ श्रीशंकराचार्याय नमः॥

कश्चित्वाति विक्लवः स्वन्तवदयं दर्शनं देहीत्याशयेनाह॥ हे आचार्य हे जीवरत्न मामेव किं कुर्वाणं किंकरतां
प्राप्तं निर्वाणं यस्यास्तया यायान्या निजपादपद्मजुषां मर्त्यानां बुद्धिकल्मषं समूलं कथानस्त्वं रं धेना
नाद्यास्यस्मिन्वल्लुबुद्धिभिः कृतः परिहासो यस्य तदास्यमेदुःखांतो न भवेदिति हे स्फुटस्य सपुनस्त्वं
जानीहि मां मामीनीहि नधृतपक्ष॥२९॥ ब्रूस्येवंमित्रजनेरवेदमुपयुषि सति परिज्ञातो यतिराज
स्य स्वगुरोः महिमायेनसपद्मपादार्थवलावन्चनेन नशोकं त्रामयन्निदं वक्ष्यमाणमुवाच॥
३० यं दुर्यान्वतदाह जोस्मान् लोकेबंपर्याप्त मतो हे सत्त्वाय उपस्थमिति ल्वा उत्साहं कृत्वा

सर्वां भूमिमपिधानात्तिरोधानादन्वेष्यामो ॥ अथानंतरं भुवि वराणि पातालानंतरं नंतरं दिवं देवमनुष्योरगा
दिषु रूढं महादेवमिव वेदेरं भ्रमैषि सगामं तनपूरा ॥ ३१ ॥ एवमुक्ते पितुः साधुमालोक्यो साहमकुर्वत अलक्ष्या
हानिर्विण्णा निर्वेदरहितं चित्तं यस्य स फलं सम्यग् स्यात् सुदुष्प्रापमप्यर्थं अवश्यं प्राप्नोति हि यस्मात्तु

इति स्वैरमुपेत्य सुपि मित्रजनेन प्रतियन्त्रयति क्षितिभृन्महिमा ॥ शुचमर्थवलात्समयन्त्वन्यसा
निजगाद सरोरुहपाददूरं ॥ ३० ॥ पर्यामिनः कृत्स्न्यमुपे सात्र सरवायः कृतो साहं भूमिमशेषाम
पिधानात् ॥ अन्वेष्यामो भुवि वराण्यथ त्वधांयदूर्ध्वं देवमनुष्यादिषु गूढं ॥ ३१ ॥ अनिर्विण्णचेता
समास्थाय सत्त्वं सुदुष्प्रापमप्यर्थमाप्नोति अर्थाम्बुकूर्मिं घ्नजालैः सुराहन्यमानाः सुधा
मप्यवापुर्हि निर्विस्मचित्ताः ॥ ३२ ॥ यदप्यन्यगात्रप्रतिघ्नस्वरूपो दुरन्वेषणः स्यात्प्र
रूर्नस्तथापि ॥ स्वभानुं दुरस्थः शशीव प्रकाशो स्तदीये गुरौ रेवते स्तु सत्त्व कथं ॥ ३३ ॥

कुर्मिघ्नजालैर्हन्यमाना अपि सुरा अनिर्विण्णचित्ता अतिदुर्लभाममपि सुधां प्रापुः २ हि यस्मात्
अनिर्विण्णचित्ताः अत एवं भूताः अपि देवाः सुधामप्यवापुरिति भुजंगप्रयातं भवच्छेद
सुर्मिः ३२ ॥ यद्यप्यन्यगात्रप्रतिघ्नस्वरूपत्वात् नोऽस्माकं गुरुर्दुरन्वेषणः स्यात्तथापि यथा रा
इरस्थो हुर्यातेपि चंद्रः स्वीयैः प्रकाशैर्विलातुं शक्यः तद्वत्तदीयैर्गुणैरेव स्वगुरुः वेत्तुं शक्यः ३३ ॥ ननु तथा
पि कगतो यत्रान्वेष्यः इति चेत्तत्राह ॥ इक्ष्वधन्वनः कामस्यागमापेक्षयायतिवारी रागनिर्गतः

स्कं भुवं विभ्रमायानां पदं कामशास्त्रस्योचितं चित्रभानुकांति राज्ञः शरीरं प्राप्नुमर्हति कामागमापेक्षयैव गतो न तु
स्वज्ञन्यसुखेच्छयेति बोधयितुमाह ॥ कामवि ॥ निर्मुक्तानां अग्रणीः रोगैश्चतुर्भिर्वृतास्त्वग्निपीसंमता ॥ ३४ ॥ नन्वेवम
पि राज्ञां बहुत्वात्कथमस्य हृत्रास्य राज्ञः शरीरे प्रविष्ट इति विज्ञेयमिति चेत्तत्राह ॥ निःसंग्राग्रगामिनाः स्प
ष्टरूपाः ज्झितदेहप्राणिनआनोदृताय तो रोगशोकादिना नावेक्षिता यतोऽत्योरपीडा पि निर्मुक्ताः स्वस्वध

इक्ष्वाच्चायागमापेक्षया निर्गतोऽयं भूतस्योचितं रुशावर्त्म भुवि विभ्रमाणां पदं सुभुवां भूपतेः प्राप्नु
मर्हसि कामाग्रणीः ॥ ३४ ॥ निःसंग्राग्रयाप्याखिलनिर्वृताः प्राणिनो रोगशोकादिनानेक्षिताः ॥ द
स्युपीडोज्झिताः स्वस्वधर्मे रताः कालवर्षी स्वराण्मेदिनीकामसूः ॥ ३५ ॥ तदिहालस्यमपास्य वि
चेतुं निरवधिसंसृतिजलधेः सेतुं देशिकवरपदकमलं मोनदृथा नेहसम्नयाम ॥ ३६ ॥ इति ज
लरुहपदवचनं सर्वं मनसि निधाय निराकृतगर्वैः कांक्षित्तअनिवेदपशरीरं रक्षितुमन्येनिरग

मैरताश्चस्युः स्वराड्इन्द्रः कालवर्षी स्यात् भूमिश्च कामसूः स्यात् ॥ ३५ ॥ तत्तस्मात् अस्मिन् काले आल
स्यं विहाय आजनाद्यनंत संसारसमुद्रस्य सेतुं देशिकवरस्य चरणारविंदं विचेतुं गच्छामो ऽस्मिन् देशे वृथा
कालं न नयामः नात्रा समकं नयमालान्तं ॥ ३६ ॥ इत्येवं पद्मपादस्य वचनं निराकृतगर्वैर्मनसि सर्वे
निधाय कोऽस्मि दुर्लभं गुरुशरीरं रक्षितुं तस्मिन् स्थाने निवेत्रयान्ये निर्गताः ॥ ३७ ॥ अतेपर्यन्तालयतंदे

२४५ शादेशं भूमिमनिशं विलंतोधिकृतानां देवानां निवेशायैस्तान्स्फीतान् अमरकनृपतेः देवान् प्रापुः प्रासेवंत॥२८
मत्वा पुनरप्युच्छ्रितममरकसंज्ञं नृपं पृथुदिलीपतुल्यं श्रुत्वा चार्यं मत्वा मंदं विरहजं दैन्यं हित्वा धैर्यं प्रापुः
२९ तेन च तरुणीषु सकं गानविलोलं भूपालं तां तास्वीकृतगायकवेषा नगरं विविशुः यतो विदित समस्तवि
शेषाः ३० राज्ञा ज्ञापित गान विद्यातिशयाय तस्य स्वराद्वैः संग्रहणाय विधितो ऽतिशयोये स्तेतारा

तेचिनंत शैलाच्चलं विषयादिषयं भुवनमनुवेलं प्रायुधिकृतयिश्रुधनिवेशास्फीतानमरकनृपतेर्दे
शान् ॥२८॥ मत्वा पुनरप्युच्छ्रितमेनं श्रुत्वा चैव दिलीपसमानं सत्क्वाधिरहं दैन्यममंदं मत्वा चार्यं धैर्यमधीय
॥२९॥ तेन च ताता गानविलोलं तरुणीसकं धरणीपालं विविशुः स्वीतगायकवेषा नगरं विदितसमस्तवि
शेषाः ॥३०॥ राज्ञा ज्ञापितविद्यातिशयास्तेन तत्संग्रहविधृतातिशयाः ॥ रमणीशतमध्यगमवनींद्रं
ददृशुस्तारारतमिस्त्वंद्रं ॥३१॥ यस्यामरकरतरुणीकंकणरंजितमनोहरपश्चाद्भागं गीतिगतिद्योद्धी
तश्रुतिसुरवतानसमुल्लसदग्निमदेशं ॥३२॥ धृतचामीकरदंडसितातपवारणरंजितरत्नकिरीटं ॥
श्रितविग्रहमिव रतिपतिमाश्रितभुवमिव सालैः पुरममरेशं ॥३३॥
धृतंस्त्वंद्रमिव तरुणीमध्यगतं
भूमींद्रं ददृशुः ॥३१॥ भूमींद्रं विशिनष्टि यस्य चामरकराणां तरुणीनां कंकणैः रंजितो मनोहरः पश्चा
द्भागो यस्य तं पुनश्च गीतिनिर्गतिर्भि उद्गीतेन श्रवणसुखेन तानेन समुल्लसदग्निमदेशो यस्य तं ॥३२॥
पुनश्च धृतश्चामीकरो हिरण्मयो दंडो यस्य तथाभूतेन सितेन आतपवारणेन छत्रेण रंजितं रत्नकिरीटं
यस्य तं स्वीकृतविग्रहं रतिपतिमनंगमिव यमाश्रितभूमिं अतः पुरस्थितं देवेशं पुरंदरमिव ॥३३॥

एवंभूतं राजानं दृष्ट्वा स्थितवंतस्ता रह रुचिरवेषाः २ तां संसदं समासाद्य नयनसंज्ञया दत्ता सनाराज्ञा सम्य
गाज्ञाप्तास्ताः षड्जेनाप्युदवदंस्तेस भीमोहयंतः सुस्वरं जगुः मूर्छना लक्षणं तु क्रमात्स्वराणां सप्तानामारोहणं सा मूर्छ
नेत्युच्यते ग्रामस्थास्ताः सप्त सप्तार्च्यैतेति तत्र स्वराः श्रुतिभ्यः स्युः स्वराः षड्जर्षभगांधारमध्यमाः पंचमो धैवतश्चाथ
निषाद इति सप्त गनुःस्मृताः सप्त सामान्यतः स्वरस्वरूपं तु श्रुत्यनंतरभावी यः स्निग्धोनुरणनात्मकः स्वतो रंज
यति श्रोतृचित्तं स स्वर उच्यत इति श्रुतिर्नाम स्वरारंभकावयवविशेषस्तदुक्तं प्रथमश्रवणात्तु शब्दः श्रूयते
ह्रस्वमात्रकः सश्रुतिः संपरिज्ञेया स्वरावयवलक्षणेति अथ ग्रामलक्षणं यथा कुटुंबिनः सर्वत्र एकीकृतो भवं
ति हि तथा स्वराणां संदोहो ग्राम इत्यभिधीयते षड्जग्रामो भवेदादौ मध्यमग्राम एव च गांधारग्राम इत्येत
रुचिरवेषाः समासाद्य तां संसदं नयनसंज्ञाविततीर्णमनाभ्युज्ञा समतिस्तघ्राश्तताः सुस्वरं मूर्छ
नापदविदस्ते जगुर्मोहयंतः सभां ॥३४॥ अंगलवसंगतिमयास्य निरिभंगे तुंगविरपनिसंगमत्यु
चितदंगे स्वांगरचिताः सकलुषं तारं गारं सगनवृत्ते नंगमुपयंति भंगाः ॥३५॥
ग्राममत्रयमुदाहृतं
नंद्यावर्तोथ जीमूतः सुभद्रो ग्रामकास्त्रयः षड्जमध्यमगांधारास्त्रयाणां जन्महेतवः इति तथान्ये यदुक्त
ग्रामत्रये पि प्रत्येकं सप्त सप्त च मूर्छनाः स्युः एकविंशतिर्मूर्छना भवंतीति तथाभूतमूर्छनापदविदस्ते सुस्वरं जगुः
इत्यर्थः ॥ अथ छंदो नाम मन्त्रगाथेति तत्संस्थितिः प्रोक्तं ॥ गानव्याजेन स्वगुरुप्रतिबोधनं कृतवतां तद्गानमुदाहर
ति हे भंग स्फुरितरक्ताहिलक्षणकुसुममकरंदास्वादनशीलतया संगतिसंगमनपास्य भिन्नायो यद्युष्मत्सं
तिनिरिभंगे संगमजुषितवदंगेन वनारि रसाति सुरतस्त्री रीरस्य रक्षणाय रचिताः सकलुषं दुःखमुक्तमंतर
गमंतः करणं येषां ते भंगाः शिष्या रसव संगमार्थं भंगमुपयंति भेदं प्राप्नुवंतीत्यर्थः ॥ दंडननो दमजसनेः सगुरु

पंचत्रास्यकामस्य यः समयः कलादिरूपः संकेतः सिद्धांतोवा तस्य संचयार्थं प्राप्तं। शीघ्रगुरूरूपं प्रपंचशरीरं
मुंचन्निहास्मिन् राजन् शरीरे स्थाने वा संचरसि तथाच्चेह पंचजनेषु मनुजेषु मुख्य श्रेष्ठ यद्वा। अस्मिन् पंचपंचजना
आकाशश्च प्रतिष्ठितस्तमेव मन्य आत्मानं विद्वान् ब्रह्मामृतोमृतमिति श्रुत्युक्तानां सांख्यरीत्या मूलप्रकृतिरवि
कृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुष इति पंचविंशतितत्वानां मुख्य
शुद्धात्मन् पंचजनपदस्य पंचपंचजनपरत्वाश्रयणात् सिद्धांतरीत्या वाक्यशेषस्थानां प्राणचक्षुःश्रोत्रान्नमन

पंचशरसमयसंचयकृते प्राग्वपुरुं चन्निवेह संचरसि प्रपंचं पंचजनमुख्य पंचमुखमध्यनं चन तं च गति
दिशति किंचकिंत्वं विवेचितोसो॥७५॥ पर्वशशिमुख सर्वमपहाय पूर्वं कुर्वद्दहगर्वमनुस्वल्पहृद हर्षं न स्मरसि
यस्त्व स्मरीयमिति कस्मात्त्वं स्मरतदस्मरपरमस्मदुक्त्या॥७६॥ नेति नेत्यादिनिगमवचनेन निपुणं नि १५०
षिध्य मूर्तामूर्तराशिं॥ यद्वाक्यनिकुर्वं स्वात्मरूपतया जानंति कोविदास्तत्त्वमसि तत्त्वं॥७८॥ श्रीः॥

सा पंचजनानां मुख्याधिष्ठानेस्यर्थः॥ पंचजननं मध्यगच्छन् शिवं स्वस्वरूपमध्यनाद्भुवन गति श्रासौत्वमिति हेतोः
कुतो खलु विवेचितोसि गता॥७६॥ किंच हे शार पूर्णमासीचंद्रमुख पूर्वं सर्वशांतिदांत्यादिकमपहायेह गर्वं कुर्वन्मा
नसमनुस्वल्पस्यास्मदीयं वा स्थिति कस्मान्न स्मरसि तत्तस्मात् हे स्मर कामास्मदुक्त्या परं स्वस्वरूपं संस्मर
तत्परमिति वा॥७७॥ अस्मदुक्त्या परं स्मरेत्युक्तं तथा तत् आदेशो नेति नेति अस्थूलमनणु अह्रस्वमदीर्घमनंतर
मयाद्य सद्वर्तमनश्वरं अशब्दमस्पर्शमरूपमव्ययं तथारसं नित्यमगंधवच्च यत् अनाद्यनंतं महतः परं ध्रुवं
निचाय्य तं मृत्युमुखात्प्रमुच्यत इत्यादिश्रुतिभिस्तत्स्मारयंति नेति नेत्यादिनिगमवचनेन मूर्तामूर्तराशिं सम्य
क् निषिध्य सर्वाधिष्ठानत्वात् निरवधिबाधायोगात् प्रतिबद्धः स्वरूपत्वेन प्रतिबोधसासि तस्मात्सिस्थिततत्त्वा

तथा पंचकोशविवेकेन कवयो यदात्मत्वेन प्रतिपद्यंते तत्तत्त्वं त्वमसीत्युक्तिस्मारयंति आकाशादिकं विश्वमुत्पाद्यानुप्रवि
श्यान्नमयप्राणमयमनोमयविज्ञानमयानंदमयकोशलक्षणे तुषजाले गूढमुक्तिलक्षणादेवाते न कवयो विवि
च्य तंडुलवद्यदाददति तत्त्वमसि तथाच्च श्रुतिः तस्माद्वा एतस्मादात्मनः आकाशः संभूतः आकाशाद्वायु
र्वायोरग्निरग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः ओषधिभ्योन्नं अन्नात्पुरुषः स वा एष पुरुषोन्नरसम
यस्तस्माद्वा एतस्मादन्नरसमयादन्योंतर आत्मा प्राणमयः तस्माद्वा एतस्मात्प्राणमयादन्योंतर आत्मा मनोमयः
तस्माद्वा एतस्मादात्मनोमयादन्योंतर आत्मा विज्ञानमयस्तस्माद्वा एतस्माद्विज्ञानमयादन्योंतर आत्मा आ
त्मा मनोमयः तस्माद्वा एतस्मादात्मनोमयादन्योंतर आत्मा विज्ञानमयः तस्माद्वा एतस्माद्विज्ञानमयाद्

स्वाद्यमुत्पाद्य विश्वमनुप्रविश्य गूढमन्नमयादिकोशतुषजाले कवयो विविच्य युक्त्या वघाततोपि तंडुल
वद्यादददति तत्त्वमसि तत्त्वं॥७९॥

न्योंतर आत्मा आनंदमयः सोऽकामयत बहु स्यां प्रजायेयेति स तपो
अतप्यत स तपस्तप्त्वा इदं सर्वमसृजत यदिदं किंच तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभव
दित्याद्या श्रुतिः स्तावद्वीमतो देह आत्मा न भवति कार्यत्वात् घटवत् न चानुपपक्षे बाधकाभावादप्रयोजकोयं
हेतुरिति चेन्नाकृताभ्यागमकृतविप्रणाशरूपबाधकसद्भावात् तथा विवादास्पदः प्राण आत्मा न भव
ति जडत्वात् घटवत् तथा मनोमयः आत्मा न भवति विकारत्वात् देहवत् तथा विज्ञानमयः आत्मा न भव
ति विलुपाद्यस्यावत्त्वात् घटादिवत् तथा आनंदमयोप्यात्मा न भवति कादाचित्कत्वात् दुःखवत् तस्मा
दानंद एवात्मा भवितुमर्हति नित्यत्वात् य आत्मा न भवति नासौ नित्यो यथा देहादिः आत्मनः आकाशः
संभूत इत्यादिश्रुत्या आकाशादेरनित्यत्वावगमात् नैकांतिकत्वं आद्यपूर्वदिनास्य विहरणे वर्तमा

जाद्दशलेशात्मने परं स्यादित्यर्थः कारउऽरेनास्य विरूपा सूत्रादादद तदितिभवितव्यमितिचेन्न भिक्षामाददातीति
प्रयोग पद अड्-ड्वि शिष्टस्याकारस्याग्रहणेनाददातीति प्रयोगस्य साधुत्वात्सूत्रे डु-ड्विशिष्टाकारग्रहणस्या डु-
ड्विशिष्टाकाराद्युत्तरस्य दद्दातेरात्मने पदाभावज्ञापनार्थत्वात् ॥४७॥ सर्वेंद्रियालंबनं तत्त्वमेवेतिस्मारय
तियथा विषमदेशेषु स्वैरं संचारिणो ध्वानकषाभिघातेन रश्मिभिः सम्यक् निवर्त्यते कोऽवबध्नंतितथा विषम
षु विषयलक्षणेषु देशेषु स्वैरं संचारिणामिंद्रियलक्षणानां हयानां दोषदर्शनलक्षणकषाभिघातेन मनोवृत्तिलक्ष
णा रश्मिभिर्यस्मिन् परमात्मतत्त्वे धीमंतो बध्नंति तत्त्वं तत्त्वं बुद्धिमनः प्रग्रहमेव च इंद्रियाणि हयानाहुर्विषयांस्ते

विषमा विषयेषु संचारिणो क्षाम्यानदोषदर्शनकशाभिघाततः स्वैरं सन्निवर्त्यंतांतर रश्मिभिर्धीरा बध्नं
तियत्र तत्त्वमसि तत्त्वं ॥५०॥ भारतजाग्रदादिषु तुस्थूलं तेभ्योन्य दिवपुष्येभ्यइव सूत्रेन्दूतिपदे पाधि
कत्रयपृथक्त्वेन विदंति सर्वस्य तत्त्वमसि तत्त्वं ॥५१॥ पुरुष एवेदमित्यादिवेदेषु सर्वकारणतया यस्य सा
वीत्यं हाटकस्येव मुकुटादितादात्म्यं सरससाम्नायते तत्त्वमसि तत्त्वं ॥५२॥ पुगोचरान्यस्तूधिज्ञातान

भवति युक्तेन मनसा सदा तस्येंद्रियाणि वश्यानि सदश्वा इव सारथेरिति ॥५०॥ अथ जाग्रत्स्वप्नसुषुप्त्या
दिषु लक्षणं तत्त्वं तत्त्वमसीति स्मारयंति आत्मा जाग्रदादिषु पाधिभ्यो ऽन्यो न्योपमानेषु तेष्वनुस्यूतत्वात्सु १५१
पेभ्यः सूत्राभिवत्स्वेवमुपाधित्रयपृथक्त्वेन यत्स्वरूपोजानंति तत्तत्त्वं त्वमसि ॥५१॥ किंच पुरुष एवेदं सर्वं यद्भूतं यच्च
भाव्यं सर्वं खल्विदं ब्रह्म तज्जलानिति सदेव सोम्येदमेकमेवाद्वितीयमेतदात्म्यमिदं सर्वं यथा सोम्यैकेन लोहमणिना सर्वं
लोहमयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं लोहमित्येव सत्यमित्यादिवेदेषु सर्वकारणतया सवर्णस्य यथा
स्वारस्येनोपदिश्यते तत्त्वं त्वमसि ५२॥

किंच यश्चायं मस्मिन्शरीरे चक्षुषि सो सोऽसौ वर्णमंडलस्योपरि योसौ स्वर्णमंडले विभाति सोहमस्मीति एवं व्यतिहारेण वेदादिनः
प्रयत्नतो यत्त्वमध्यापयंतित्तत्त्वं त्वमसि तथा च श्रुतिः तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मंडले पुरुषो यश्चा
यं दक्षिणे ऽक्षन् पुरुषस्तावेतावन्योन्यस्मिन् प्रतिष्ठितावित्याद्याः ॥५३॥ किंच वेदानुवचनसद्दानयज्ञतपो हितमतमध्या
नानादिधर्मैः श्रद्धयानुष्ठितैः विधयोपासनया च युक्तैः रत्यंतनिर्मलानींद्रियाणि येषां ते ब्राह्मणा यद्रूपं विविदिषं
ति वेदितुमिच्छंति तत्त्वं त्वमसि ॥ तथा च श्रुतिः । तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसा

यश्चाह मत्र वर्ष्मणि भामि सोऽसौ योऽसौ विभाति रविमंडले सोहमिति वेदस्वदितो व्यतिहारतो यदध्याप
यंति परतस्तत्त्वमसि तत्त्वं ॥५३॥ वेदानुवचनसद्दानमुखधर्मैः श्रद्धानुष्ठितैर्विधया युक्तैः विविदिषंत्य
त्यंत विमलस्वांता ब्राह्मणा यद्रूपं तत्त्वमसि तत्त्वं ॥५४॥ शमदमोपरमादिसाधनैर्धीराः स्वात्मना त्मनि
पदन्विष्य कृतकृत्या अधिगता नित सच्चिदानंदरूपा न पुनरिह विशंति तत्त्वमसि तत्त्वं ॥५५॥ श्रीशंक

नशंकेन यद्दुग्ध्योपनिषदाकरोति तद्वीर्यवत्तरं भवतिरनादेः सत्त्वं तु भगवतोऽकसात्त्विकत्वं वेदानुवच
नादेः प्रज्वलितार्थशिरस्कस्य जलराशिप्रवेशेच्छा यदुक्तं च्छांप्रतिकरणत्वं न तु साम्योपच्छांप्रतिअजागलस्त
नायमानायास्तस्याः पूर्वमेवासिद्धत्वात् यथा अर्धेन ज्ञिगमिषति मूसलगमनं प्रसभस्येव गुणानं प्रसैक ५३
रणत्वमस्तु ॥५४॥ किंच शमदमोपरमतितिक्षासमाधि श्रद्धालक्षणैः साधनैः स्वात्मस्वरूपेणात्मनि बु
द्धौ पदन्विष्य साक्षात्कृतं सत्यं ज्ञानमनंतं ब्रह्म विज्ञानमानंदं ब्रह्मेत्यादिश्रुतिबोधितमनंतादिस्वरूपं येस्ते
कृतकृत्याः संतः पुनरिह संसारे जन्ममरणादिलक्षणे न विशंति तत्त्वं त्वमसि तथा च श्रुतिः शांतो दांत
उपरतस्तितिक्षुः समाहितः आत्मन्येवात्मानं पश्येदिति श्रद्धावित्तो भूत्वा निश्चयं कृत्वा शिष्याणां पृथक्पृथक् उत्कमः इति या
यं ५५

एवमधिगीयमभिं द्दिर्तवर्णितात्मयस्कश्वात्वा अर्थाधिपयार्यस्योर्दिनकारणयस्कधि तिज्ञात्नकर्तव्यंयेनससपतिः पूरिताआज्ञायेषांतोनेतान्शिष्यान्द्विसससर्ज अङ्गाद्धितीयके धीयद्भुर्दत्तलक्षणंतस्यात् ॥ यदुभयोरपिदल योरुपगीतिर्तामुनिर्भूता ॥ ५६ ॥ अभ्यायातैः पद्मपादादिभिः उद्बोधितोमूर्छामवलंब्यपूर्वोक्तन्यायेनराजशरी रान्निर्गत्यनिजंशरीरंअधिवशासदेशिकेंद्रः संञ्चैचेलतोअवाप्यचपुनरुत्थितोअभूत् ॥ व० ५७ ॥ ननुराजभृत्य विसृष्टाग्निनादह्यमानंशरीरंकथंअधिवशदित्याशंक्याह ॥ तस्मात्राजततनुतोनिर्गमनात्पश्चात्पूर्वदृष्टं

